# संस्कृतसाहित्यम्

कक्षा ९



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# संस्कृतसाहित्यम्

## कक्षा ९

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी-भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतसाहित्यविषयकपाठ्यक्रमस्याधारेण नवम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं डा. ध्रुवप्रसादः भट्टराई, डा. जीवनः अधिकारी, डा. मुकुन्दप्रसादः लामिछाने, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः वैकुण्ठप्रसादः अर्याल,

प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, निश्चलः अधिकारी, शिवराजः लामिछाने, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| | **गद्यसाहित्यम्** | |
| संस्कृतगद्यसाहित्यस्य सामान्यपरिचयः | | १ |
| प्रथमः | सूर्यमहिमवर्णनम् | ३ |
| द्वितीयः | पुष्पावचयः | ७ |
| तृतीयः | सूर्यास्तमनवर्णनम् | १२ |
| चतुर्थः | आर्यस्वभाववर्णनम् | १६ |
| पञ्चमः | चिन्तामणिवर्णनम् | २२ |
| षष्ठः | चिन्तामणिशासनवर्णनम् | २६ |
| सप्तमः | चिन्तामणेः पुत्रादिवर्णनम् | ३२ |
| अष्टमः | कन्दर्पकेतुवर्णनम् | ३९ |
| | **दृश्यकाव्यम्** | |
| नवमः | पुनर्जीवनम् | ४५ |
| | **कथासाहित्यम्** | |
| दशमः | विरूपाक्षोद्धारः | ५५ |
| | **जीवनवृत्तम्** | |
| एकादशः | वाङ्मयसेवी टीकारामोऽधिकारी | ६१ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| | **पद्यसाहित्यम्** | |
| द्वादशः | मायावत्या गर्भधारणम् | ७४ |
| त्रयोदशः | वनान्तभूमौ बुद्धजन्म | ८० |
| चतुर्दशः | बुद्धजन्मप्रभावः | ८६ |
| पञ्चदशः | सूर्यवंशवर्णनोपक्रमः | ९७ |
| षोडशः | दिलीपवर्णनम् | १०६ |
| | **प्रबन्धः** | |
| **प्रबन्धपरिचयः** | | ११४ |
| सप्तदशः | मानवजीवने धर्मस्य मूल्यम् | १२३ |
| | **छन्दःशास्त्रम्** | |
| अष्टादशः | छन्दोज्ञानम् | १३२ |
| एकोनविंशः | लघुगुरुवर्णबोधो गणयतिज्ञानञ्च | १३६ |
| विंशः | अनुष्टुभाद्युपजात्यन्तानां वृत्तानां निरूपणम् | १४१ |
| एकविंशः | इन्दिरादिद्रुतविलम्बितान्तानां वृत्तानां निरूपणम् | १४९ |
| | **अलङ्कारशास्त्रम्** | |
| द्वाविंशः | सभेदमलङ्कारस्वरूपादिज्ञानमनुप्रासयमकनिरूपणञ्च | १५४ |
| त्रयोविंशः | उपमादि-स्वभावोक्त्यन्तानामलङ्काराणां निरूपणम् | १५८ |
| चतुर्विंशः | अर्थान्तरन्यासादिदृष्टान्तान्तानामलङ्काराणां निरूपणम् | १६२ |

# संस्कृतगद्यसाहित्यस्य सामान्यपरिचयः

## उपक्रमः

वैदिकसंहितासु ब्राह्मणग्रन्थेषु च गद्यकाव्यानामाख्यानानामाख्यायिकानाञ्च प्रारम्भिकः प्रयोग उपलभ्यते । वैदिकसंहितासु यजुर्वेदो गद्यप्रधानोऽस्ति । अतो यजुर्वेदे यज्ञविधिसम्बद्धा गद्यमन्त्राः समुपलभ्यन्ते । ब्राह्मणग्रन्थेषु ऋषिवंश-राजवंशसम्बद्धाः कथाः समुपलभ्यन्ते । कथाया दृष्ट्या ब्राह्मणग्रन्था एव प्रथमा विद्यन्ते । तथैव आरण्यकेऽपि कथाः सन्ति । वैदिकसाहित्यस्यान्तिमभागे उपनिषद्वाङ्मये तु गद्यसाहित्यस्य विपुला सम्पत् सुरक्षिता वर्तते । समुद्रयात्रावर्णनम्, लोकलोकान्तरचित्रणम्, आश्चर्यानुप्राणितघटनावर्णनम्, धर्ममहत्त्वप्रतिपादनम्, नीतिशिक्षणम्, सदाचारसद्विचारशिक्षणम्, अध्यात्मकौतुकजागरणञ्चेति प्राच्यकथासाहित्यस्य प्राणभूता विषयाः सन्ति । उत्तरवर्तिकाले पञ्चतन्त्रम्, हितोपदेशः, बृहत्कथामञ्जरी, कथासरित्सागरः, वेतालपञ्चविंशतिका, विक्रमार्कचरितम्, शुकसप्ततिप्रभृतयः शताधिका गद्यकथाप्रधाना ग्रन्थाः प्रणीताः सन्ति । गद्यसाहित्यस्येमे ग्रन्था नैतिकथामाध्यमेन नैतिकगुणविकासपथे पाठकान् प्रवर्तयन्ति । वाल्मीकिव्यासप्रभृतिभिः काव्यकारैः स्वस्थसमाजसंरचनां निभाल्य सामाजिकदृष्टिभावभरितं मनोविज्ञानमहितं विपुलं पद्यमयकथासाहित्यमपि समाजाय समर्पितम् । इत्थं गद्यपद्यमयं संस्कृतकथासाहित्यं समृद्धं विशालञ्चास्ति ।

## संस्कृतगद्यकाराः

सुबन्धोर्वासवदत्ता, दण्डिनो दशकुमारचरितम्, बाणभट्टस्य हर्षचरितम्, कादम्बरी च वल्लालस्य भोजप्रबन्धः, अम्बिकादत्तव्यासस्य शिवराजविजयश्च गद्यसाहित्यस्य महत्त्वपूर्णाः प्रबन्धग्रन्थाः सन्ति । भाषायां स्वाधिकारं कलयितुं प्राक्तनसमाजसंरचनां ज्ञातुं सरलतया विषयज्ञानं विधातुञ्च प्रबन्धात्मकगद्यसाहित्यं सहायकं भवति नितराम् । उपर्युक्तकथाग्रन्थैः प्रबन्धग्रन्थैश्च समुन्नतं सच्छिक्षासद्गुणाधायकं सद्विचारप्रदं सामाजिकभावनाया विकासकं सच्चरित्रनिर्माणाभिप्रेरकञ्च संस्कृतगद्यसाहित्यं जगति विजयते ।

## अम्बिकादत्तव्यासस्य परिचयः

अम्बिकादत्तव्यासोऽर्वाचीनसंस्कृतगद्यसाहित्यस्य मूर्धन्यः कविरासीत् । शतावधान-घटिकाशतक-सद्शैरुपाधिभिर्विभूषितोऽयं विद्वान् प्रतिभायाः प्रतिमूर्तिरासीत् । अस्य जन्म १९१५ तमवैक्रमाब्दस्य

चैत्रशुक्लाष्टम्यां भारतस्य वाराणस्यामभूत् । अस्य पूर्वजा मूलतो जयपुरनिवासिन आसन् । अस्य पितामहः पण्डितो राजारामः काशीमधिवसति स्म । अस्य पिता पण्डितो दुर्गादत्तश्च काश्यामेव स्थित्वा विद्यापरम्परां विततान । चतुरस्रप्रतिभासम्पन्नोऽम्बिकादत्तव्यासश्च तत्रैव साहित्याचार्यो बभूव । ताराचरणतर्करत्न-कुञ्जलालवाजपेयि - कैलासचन्द्रभट्टचार्य-सदृशैर्विद्वद्भिः सहानेन विविधशास्त्राण्यधीतानि । पश्चादम्बिकादत्तव्यासो मधुवनीसंस्कृतपाठशालायां प्राचार्यत्वमभजत्, राजकीयसंस्कृतमहाविद्यालये प्राध्यापनञ्च व्यदधात् ।

अम्बिकादत्त व्यासस्य समये भारते आर्यसमाजस्य प्रचारः प्रकर्षतामगात् । अयञ्च सनातनधर्मस्याग्रगण्यो विद्वानासीत् । अनेन नैकधा काश्यां शास्त्रार्थेष्वार्यसमाजिनः पराजिताः । हिन्दीसाहित्यस्य संस्कृतसाहित्यस्य च श्रीवृद्धयै अनेनाहत्य ७८सङ्ख्यकानि ग्रन्थरत्नानि विरचितानि । समग्रतश्चायं नाटकम्, काव्यम्, समस्यापूर्तिम्, आत्मकथाञ्चालिखत् । हिन्दीभाषासाहित्यप्रचाराय चानेन नैकेषां ग्रन्थानां प्रणयनं विहितम् । भारतेन्दुसभायाः सदस्येनानेन विहारसंस्कृतसञ्जीवनसमाजस्य च स्थापना विहिता आसीत् । अनेन रचितास्वनेकासु कृतिषु दृश्यकाव्यक्षेत्रे यथा सामवतं नाम नाटकं प्रसिद्धमस्ति तथैव गद्यसाहित्ये शिवराजविजयनामकः संस्कृतोपन्यासो लोकप्रियो वर्तते ।

'छत्रपति'रित्युपाधिधारिणो महाराष्ट्ररत्नस्य शिवाजीति प्रसिद्धस्य शिवराजस्य संस्कृतिधर्मरक्षासमर्पितं राष्ट्रगौरवानुप्राणितं जीवनचरितमादाय निर्मिते शिवराजविजयनामके संस्कृतोपन्यासे शिवराजस्य वीरतोल्लासकं चरितं यथार्थतया प्रतिबिम्बितमस्ति । समाजं राष्ट्रगौरवानुप्राणितं सत्यसङ्कल्पं धर्मनिष्ठं कर्तव्यनिष्ठं नैतिकञ्च विधातुं सामाजिकान् सत्ये वर्त्मनि प्रेरयितुं च प्रणीतोऽयं शिवराजविजयो गद्यसाहित्यस्य मूर्धन्यो ग्रन्थो वर्तते । मुगलशासनसमुत्पाटनपटोः शिववीरस्यात्र चरित्रं त्रिषु विरामेषु द्वादशनिःश्वासेषु समुपनिबद्धं वर्तते । अत्रत्या कथा इतिहासप्रथिता अस्ति । अत्र पतन्त्यः परम्पराः, यवनानां दुराचाराः, भारतीयानां वैदिकानां सहिष्णुता, यवनदुराचारोन्मूलनबद्धपरिकरस्य शिवराजस्य शौर्यम्, नीतिचातुर्यञ्च निखिलमपि चलचित्रवद् दृक्पथमवतरति । शिववीरोऽत्र काव्यनायकः, रघुवीरसिंहश्चोपनायकः, गौरवटु-श्यामवटुरूपेण परिचितौ गौरसिंहश्यामसिंहौ परिवेशप्रदर्शकौ सहकारिणौ, ब्रह्मचारियोगिराजप्रभृतयः साधवो वैदिकाचारविचारप्रतिमूर्तयः, अवरङ्गजेवः प्रतिनायकः, जयसिंहः स्वार्थलोलुपो भारतीयः, सौवर्णी च कविकल्पनावतीर्णा भारतीया रमणी । रसोऽत्र प्रधानो वीरः, शृङ्गारकरुणादयश्चाङ्गभूताः, हास्यशान्तयोरपि वर्णनमत्रोपलभ्यते, अफजलखानवर्णने बीभत्सदर्शनञ्च जायते । एवमेवात्र साधर्म्यबोधिकोपमा, अभेदबोधकं रूपकम्, यथावसरं पुनरुत्प्रेक्षापरिसङ्ख्यानुप्रासादयोऽलङ्कारा आप्रबन्धमास्वादपदवीमागच्छन्त्येव । भाषा चात्र भावानुसारिणी, विचाराणामनुकारिणी, सरला, सरसा, सुबोधा, ओजस्विनी, यथावसरं कोमला च पाठकान् नितरां परितोषयति ।

## प्रथमः पाठः

# सूर्यमहिमवर्णनम्

विष्णोर्माया भगवती यया सम्मोहितं जगत् ।

श्रीमद्भागवतम् १०/१/२५

हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते ।

श्रीमद्भागवतम् १०/७/३१

### मूलम्

**अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः । एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य इनश्च दिनस्य । अयमेवाहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरूपतिष्ठन्ते; धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामिति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरान्निश्चक्राम कश्चिद् गुरुसेवनपटुर्विप्रवटुः ।**

### व्याख्या

पूर्वस्याम् = प्राच्यां दिशि, भगवतः = महिमशालिनः, मरीचिमालिनः - मरीचीनाम् = रश्मीनाम्, माला = माल्यम्, अस्यास्तीति मरीचिमाली = सूर्यः तस्य, एषः = पुरो दृश्यमानः, अरुणः = अव्यक्तरागः, "अव्यक्तरागस्त्वरुणः" इत्यमरः, प्रकाशः = ज्योतिः, अस्तीति शेषः । एषः = असौ, भगवान् = सूर्यनारायणः आकाशमण्डलस्य - आकाशस्य = गगनस्य, मण्डलम् = राज्यम्, तस्य, मणिः = रत्नम्, खेचरचक्रस्य, खे = आकाशे, चरन्तीति = भ्रमन्तीति, खेचराः = आकाशचारिणः चन्द्रादयः, तेषां चक्रम् = समूहः तस्य, चक्रवर्ती = सम्राट्, आखण्डलदिशः - आखण्डलस्य = इन्द्रस्य, "आखण्डलः सहस्राक्षः" इत्यमरः, दिक् = पूर्वाशा, तस्याः = पूर्वाशानायिकायाः, कुण्डलम् = कर्णवेष्टनम्, "कुण्डलं कर्णवेष्टनम्" इत्यमरः, ब्रह्माण्डभाण्डस्य - ब्रह्माण्डमेव = भुवनकोश एव, भाण्डम् = महापात्रम्, तस्य = भुवनकोशमहापात्रस्य, दीपकः = प्रदीपः, पुण्डरीकपटलस्य - पुण्डरीकाणाम् = सिताम्भोजानाम् "पुण्डरीकं सिताम्भोजम्" इत्यमरः,

पटलम् = समूहः, तस्य प्रेयान् = प्रीतिजनकः:, कोकलोकस्य - कोकानाम् = चक्रवाकानाम्, "कोकश्चक्रश्चक्रवाकः" इत्यमरः, लोकः = समूहः, तस्य, शोकविमोकः = चिन्तामोचनः, रोलम्बकदम्बस्य - रोलम्बानाम् = भ्रमराणाम्, "भ्रमरश्चञ्चरीकः स्याद् रोलम्बो मधुसूदनः" इति त्रिकाण्डशेषः, कदम्बः = समूहः तस्य, अवलम्बः = आधारः, सर्वव्यहारस्य - सर्वश्चासौ व्यवहारः, सर्वव्यवहारस्तस्य = निखिलसांसारिकप्रपञ्चस्य, सूत्रधारः = निर्देशकः, दिनस्य = दिवसस्य, ईनश्च = स्वामी च, अस्तीति शेषः, अयम् एव = सूर्य एव अहोरात्रम् - अहश्च रात्रिश्चेति तम् अहोरात्रम् = दिवानिशम्, जनयति = प्रसूते, अयम् एव = सूर्य एव, वत्सरम् = वर्षम्, द्वादशसु = द्वादशमासरूपेषु, भागेषु = कालखण्डेषु, विभनक्ति = विभजति, अयम् एव = सूर्य एव, षण्णाम् = षट्सङ्ख्यायुतानाम्, ऋतूनाम् = वसन्तादीनाम्, कारणम् = हेतुः, एष एव = सूर्य एव, उत्तरम् अयनम्, उत्तरायणम् = उत्तरमार्गम्, "अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः" इत्यमरः, दक्षिणम् अयनम्, दक्षिणायनम् = दक्षिणमार्गम्, च अङ्गीकरोति = स्वीकरोति, अनेन एव = सूर्येण एव, युगभेदाः, युगानाम् = सत्यत्रेताद्वापरकलिनामधेयानाम्, भेदाः = प्रकाराः, सम्पादिताः = प्रवर्तिताः, । असौ एव = सूर्य एव जगत् = भुवनम्, संसारं वा, "त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्" इत्यमरः, चर्कर्ति = पुनः पुनः करोति, बर्भर्ति = पुनः पुनर्बिभर्ति (पालयति), जर्हर्ति = पुनः पुनः संहरति च, वेदाः = यजुराद्याः श्रुतयः, एतस्य एव = सूर्यस्य एव, वन्दिनः = स्तुतिपाठकाः सन्ति, गायत्री = सावित्री (ब्रह्मगायत्री), अमुम् एव = सूर्यम् एव, गायति = स्तौति, ब्रह्मनिष्ठाः = परब्रह्मचिन्तकाः, ब्राह्मणाः = द्विजाः, अहरहः = प्रतिदिनम्, अमुम् एव = सूर्यम् एव, उपतिष्ठन्ते = उपासते । श्रीरामचन्द्रस्य = रघुनाथस्य, कुलमूलम् - कूलस्य = वंशस्य, मूलम् = प्रवर्तकः, कूलमूलम् = वंशप्रवर्तकः, एषः = अयम्, धन्यः = कीर्तनीयो वर्तते । एषः = अयम्, विश्वेषाम् = संसाराधिवासिनाम्, प्रणम्यः = नमस्कार्यः, वर्तते, इति = इत्थम्, उदीर्य = कथयित्वा, उदेष्यन्तम् = उदागमिष्यन्तम्, भास्वन्तम् = सूर्यम्, प्रणमन् = वन्दमानः, कश्चन = कोऽपि गुरुसेवनपटुः - गुरोः = आचार्यस्य, सेवनम् = सेवा, तस्मिन् पटुः = चतुरः, 'दक्षे चतुरपेशलपटवः' इत्यमरः, विप्रवटुः = ब्राह्मणकुमारः, निजपर्णकुटीरात् - निजस्य = स्वस्य, पर्णकुटीरम् = पर्णशाला, तस्मात् = उटजाद् वा, "पर्णशालोटजोऽस्त्रियाम्" इत्यमरः, निश्चक्राम = निर्गतः, पुष्पावचयाय निर्जगामेति भावः ।

## पाठसारः

प्रातः सूर्योदयसमये उदेष्यन्तं भास्वन्तं प्रणमन् तन्महिमानं कीर्तयन् तत्कार्यविशेषान् प्रशंसन् हृदि तस्य सर्वशक्तिमत्तां नारायणस्वरूपतां च विभावयन् कश्चन आश्रमवासी ब्रह्मचारिवटुराश्रमनियममनुसृत्य पुष्पचयनाय वाटिकां गन्तुं पर्णशालाया बहिर्निर्जगाम ।

## अभ्यासः

### १. अधोनिर्दिष्टप्रश्नानामुत्तराणि लिखत

(क) मरीचिमालिनः प्रकाशः कीदृशः ?

(ख) सूर्यस्य किं किं वैशिष्ट्यम् ?

(ग) के सूर्यस्य वन्दिनः ?

(घ) के सूर्यमहरह उपतिष्ठन्ते ?

(ङ) सूर्यः कस्य कुलमूलम् ?

(च) का सूर्यं गायति ?

(छ) कथं सूर्यो विश्वेषां प्रणम्यः ?

(ज) विप्रवटुः कीदृशः ?

### २. अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत

"असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरूपतिष्ठन्ते ।"

### ३. अधोनिर्दिष्टगद्यखण्डस्य तात्पर्यं प्रकाशयत

"धन्य एष श्रीरामचन्द्रस्य कुलमूलं प्रणम्य एष विश्वेषाम् ।"

### ४. अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत

"अयमेवाहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम् ।"

### ५. अधोनिर्दिष्टानां क्रियापदानां वाक्येषु प्रयोगं कुरुत

विभनक्ति, अङ्गीकरोति, चर्कर्ति, जर्हति, बर्भर्त्ति, गायति, उपतिष्ठन्ते ।

६. **अधोनिर्दिष्टानां पदानां पर्यायान् निर्दिशत**

मणिः, चक्रवर्ती, दीपकः, प्रेयान्, शोकविमोकः, अवलम्बः, सूत्रधारः, इनः ।

७. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

आकाशमण्डलस्य, खेचरचक्रस्य, ब्रह्माण्डभाण्डस्य, कोकलोकस्य, पुण्डरीकपटलस्य,

**रोलम्बकदम्बस्य**

८. **'सूर्यस्य महत्त्वम्' इति विषये दशपङ्क्त्यात्मकमेकमनुच्छेदं स्वसंस्कृतेन लिखत ।**

९. **सूर्यमहिमवर्णनमिति पाठस्य सारं प्रकाशयत ।**

## द्वितीयः पाठः

# पुष्पावचयः

### मूलम्

"अहो ! चिररात्राय सुप्तोऽहम्, मया महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽय-मस्मद् गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य तृणशकलैः सन्धाय पुटकं विधाय पुष्पावचयं कर्तुमारेभे। वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत्। कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयं पुण्डरीकपरिलसितं सर आसीत्। दक्षिणतश्चैको निर्झरनाद-मनोहरः सुन्दरकन्दरः पर्वतखण्ड आसीत्। यावदेष ब्रह्मचारिवटुरलिपुञ्जमुद्-धूय कुसुमकोरकानवचिनोति तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिकारुषित इव श्यामः, चन्दनचर्चितभालः, झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्- "अलं भो अलम्, मयैव अवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे, यां च सप्तवर्षकल्पां यावनत्रासेन निश्शब्दं रुदतीं परमसुन्दरीं कलितमानवदेहामिव सरस्वतीं सान्त्वयन् मरन्दमधुरा अपः पाययन् कन्दखण्डानि भोजयन् त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत् परिमार्गणीयानि एतस्याः पितरौ गृहञ्च इति संश्रुत्य उष्णं निःश्वस्य यावत् सोऽपि किञ्चिद् वक्तुमियेष, तावदकस्मात् पर्वतशिखरे निपपात उभयोर्दृष्टिः।

### व्याख्या

अहो ! = आश्चर्यम्, अहम् = गौरवटुः, चिररात्राय = चिराय "चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः" इत्यमरः, सुप्तः = निद्रितः, मया = ब्रह्मचारिणा, महान् = महनीयः, पुण्यमयः = पुण्यदायकः, पवित्रो वा, समयः = ब्राह्ममुहूर्तः, अतिवाहितः = यापितः, अयम् = एषः, अस्मद्गुरुचरणानाम् - पूज्या गुरव इति गुरुचरणाः = आचार्याः, अस्माकं गुरुचरणा इति अस्मद्गुरुचरणाः, तेषाम् = अस्मदाचार्यचरणानाम्, सन्ध्योपासनसमयः - सन्ध्यायाः = गायत्र्याः, उपासनम् = जपनम्, तस्य समयः = कालः, सन्ध्याकालो वर्तते इति भावः, तत् = तस्मात्, सपदि = झटिति, कुसुमानि = पुष्पाणि, अवचिनोमि = चिनोमि सङ्कलयामि वा, इति - इत्थम्, चिन्तयन् = विचारयन्, एकम् = .एकसङ्ख्यकम्, कदलीदलम् = रम्भापर्णम्, "कदली

वारणवुसा रम्भा मोचांशुमत्फला" इत्यमरः, आकुञ्च्य = कुञ्चितं कृत्वा, तृणशकलैः - तृणानाम् = घासानाम्, खण्डानि = शकलानि, तैः = अर्जुनखण्डैः, "तृणमर्जुनम्" इत्यमरः, सन्धाय पुटकाकृतिप्रदानाय भागद्वयेन योजयित्वा, पुटकम् = पुटम्, निर्माय = रचयित्वा, पुष्पावचयम् = कुसुमचयनम्, कर्तुम् = विधातुम्, आरेभे = प्रारभत । असौ = एषः, वटुः = ब्रह्मचारिबालकः, आकृत्या = आकारेण, सुन्दरः = मनोहरः, वर्णेन = रङ्गेण, गौरः = श्वेतः, जटाभिः = सटाभिः, "व्रतिनस्तु सटा जटा" इत्यमरः, ब्रह्मचारी ब्रह्मचर्यव्रतपालकः, वयसा = अवस्थया, षोडशवर्षदेशीयः = ईषदूनषोडशवर्षवयस्कः, कम्बुकण्ठः - कम्बुः = शङ्ख इव, कण्ठः = गलो यस्य सः, शङ्खग्रीव इत्यर्थः, आयतललाटः - आयतम् = स्फीतम्, ललाटम् - अलिकम्, निटिलं वा यस्य सः, स्फीतालिकः, स्फीतनिटिलो वा, सुबाहुः - शोभनौ = मनोहरौ, बाहू = भुजौ यस्य सः, विशाललोचनः - विशाले = दीर्घे, लोचने = नयने, यस्य सः, आसीत् = अभूत् ।

कदलीदलकुञ्जायितस्य - कदलीनाम् = रम्भाणाम्, दलानि = पत्राणि, तैः कुञ्जायितस्य = लताभवनतुल्यस्य, एतत्कुटीरस्य = ब्रह्मचार्याश्रमस्य, समन्तात् = परितः, पुष्पवाटिका = उद्यानम्, पूर्वतः = पूर्वस्यां दिशि, परमपवित्रपानीयम् - परमम् = अत्यन्तम्, पवित्रम् = शुद्धम्, पानीयम् = जलम्, यस्मिन् तत्, पुण्डरीकपरिलसितम् - पुण्डरीकैः = श्वेतकमलैः, परिलसितम् = व्याप्तम्, शोभमानं वा, सिताम्भोजसुन्दरमित्यर्थः, सरः = तडागः, आसीत् = अभूत्, दक्षिणतः च = दक्षिणस्याञ्च, एकः = केवलः, एकसङ्ख्यको वा, "एके मुख्यान्यकेवलाः" इत्यमरः, निर्झरनादमनोहरः - निर्झराणाम् = झराणाम्, नादैः = ध्वनिभिः, मनोहरः = शोभनः, झरझर्झरारावहृद्यः इत्यर्थः, सुन्दरकन्दरः - सुन्दराः = मनोहराः, कन्दराः = गुहा, यस्मिन् सः = मनोहरगह्वरः, पर्वतखण्डः = गिरिखण्डः, आसीत् = अभूत्, एषः = अयम्, ब्रह्मचारी = विप्रबालकः, यावत् = यदैव, अलिपुञ्जम् = रोलम्बकदम्बम्, उद्धूय = निरस्य, कुसुमकोरकान्- कुसुमानाम् = पुष्पाणाम्, कोरकाः = कलिकाः, "कलिका कोरकः पुमान्" इत्यमरः, तान् = पुष्पकलिकाः, अवचिनोति = चिनोति, तावत् = तदैव, अपरः = अन्यः, तस्य एव = गौरवटोरेव, सतीर्थ्यः = सहपाठी, तत्समानवयाः -तस्य इव समानम् = तुल्यम्, वयः = अवस्था, यस्य सः = तत्तुल्यवयस्कः, कस्तूरिकारुषितः - कस्तूरिकया = मृगमदेन, रुषितः = भूषित इव, श्यामः = कृष्णः, चन्दनचर्चितभालः - चन्दनेन = मलयजेन, चर्चितम् = लिप्तम्, भालम् = अलिकम् यस्य सः, मलयजलिप्तालिकः, झटिति = अकस्मादेव, समुपसृत्य = समीपमागत्य, निवारयन् = पुष्पावचयनं वारयन्, गौरवटुम् = गौरब्रह्मचारिणम्, एवम् = इत्थम्, अवादीत् = उक्तवान्, अलं भो अलम् = पर्याप्तं भो पर्याप्तम्, पुष्पावचयो नैव विधेयः, इत्यर्थः, "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इत्यमरः, मया एव = श्यामवटुनैव, कुसुमानि = पुष्पाणि, अवचितानि = सङ्कलितानि, त्वन्तु = गौरवटुस्तु, रात्रौ = गतयामिन्याम्, चिरम् = चिराय, अजागरीः = जागरणं कृतवान्, इति = हेतोः, क्षिप्रम् = शीघ्रम्, न = उत्थापितः न जागरितः, गुरुचरणाः = ब्रह्मचारिगुरवः, अत्र = इहैव, तडागतटे = सरोवरकूले, सन्ध्याम् = गायत्रीम्, उपासते = सन्ध्योपासनं कुर्वन्तः सन्ति, मया = श्यामवटुना, तेषां निकटे = गुरुचरणानां समीपे, निखिला = सन्ध्योपासनोचिता सकला, सामग्री = उपकरणम्, संस्थापिता = उपस्थापिता, त्वम् = गौरवटुः, तु सप्तवर्षकल्पाम् = ईषदूनसप्तवर्षवयस्काम्, यवनत्रासेन

- यवनस्य = यवनयुवकस्य, त्रासः = भयम्, तेन, निःशब्दम् = नीरवम्, रुदतीम् = क्रन्दन्तीम्, कलितमानवदेहाम् - कलितः = अङ्गीकृतः, मानवदेहः = नरवपुः, यया ताम्, सरस्वतीम् इव = शारदामिव, परमसुन्दरीम् = अतिमनोहररूपवतीम्, याम् = कन्यकाम्, सान्त्वयन् = आश्वासयन्, मरन्दमधुराः = मकरन्दमिष्टाः, अपः = जलानि, पाययन् = ग्राहयन्, कन्दखण्डानि - पृथ्वीगर्भसमुत्पन्नग्रन्थिफलशकलानि, भोजयन् = आशयन्, त्रियामायाः = रात्रेः, यामत्रयम् = प्रहरत्रितयम्, अनैषीः = यापितवान्, इयं सा = सा एषा कन्यका, अधुना = सम्प्रति, स्वपिति = निद्राति, उद्बुद्ध्य = जागरित्वा, तथैव = पूर्ववदेव, रोदिष्यति = क्रन्दिष्यति, तत् = तस्मात्, एतस्याः = कन्यकायाः, पितरौ = मातापितरौ, गृहञ्च = वासभवनञ्च, परिमार्गणीयानि = अन्वेषणीयानि, इति = इत्थम्भूतं श्यामवटुवचनम्, संश्रुत्य = निशम्य, उष्णम् = तप्तम्, निःश्वस्य = निःश्वासमाविष्कृत्य, यावत् = यदैव, सोऽपि = गौरवटुरपि, किञ्चित् = किमपि, वक्तुम् = कथयितुम्, इयेष = अभिलषितवान्, तावत् = तदैव, अकस्मात् = सहसा, उभयोः = गौरश्यामयोः, दृष्टिः = दृक्, "लोचनं नयनं नेत्रमीक्षणं दृग्दृष्टिर्नयनं नेत्रमीक्षणं चक्षुरक्षिणी दृग्दृष्टी च ...." इत्यमरः, पर्वतशिखरे, पर्वतस्य शिखरः, तस्मिन् = गिरिशृङ्गे, निपपात = अपतत्, पपातेत्यर्थः ।

## पाठसारः

प्रातः कालिकजागरणविधौ मया विलम्बो विहितः । गुरुचरणानां सन्ध्यावन्दनवेलेयमतो मया त्वरया पुष्पचयनं विधेयमिति धिया एको ब्रह्मचारी वाटिकां प्राप्य पुष्पचयनं प्रारब्धवान् । अयं वटुर्नितरां दर्शनीयो वर्णेन गौरो वयसा षोडशवर्षदेशीयश्चासीत् । अस्य ब्रह्मचार्याश्रमः प्राकृतिकसौन्दर्यसमन्वितः परितो वाटिकासमलङ्कृतश्चासीत् । आश्रमस्य पूर्वस्यां दिशि सिताम्भोजसौन्दर्यमण्डितः सरोवर आसीत् । आश्रमस्य दक्षिणस्यां दिशि निर्झरनादमनोहरो गिरिखण्ड आसीत् । प्रातः पुण्यमये समये प्राकृतिके रमणीये च वातावरणे सानन्दं पुष्पचयनं कुर्वतो गौरवटोः समीपे तं पुष्पचयनान्निवारयन् तदीयः सतीर्थ्यः श्यामवटुः सम्प्राप्तः । तेनोक्तम् - सतीर्थ्य ! अलम् भो अलम्, पुष्पचयनं न कर्तव्यं त्वया । यतो हि मया पूर्वमेवावचितानि गुरुचरणानां कृते आवश्यकानि पुष्पाणि । त्वं तु अनाथायाः परमसुन्दर्या यावनत्रासेन क्रन्दन्त्याः सप्तवर्षदेशीयायाः कन्यकायाः सेवायां समर्पितो रात्रौ यामत्रयं यावदजागरीरिति मया सर्वं कार्यं कृतम् । इदानीं तस्या गृहस्य जननीजनकयोश्च अन्वेषणं कर्तव्यम् । श्यामवटुवचनं श्रुत्वा गौरवटुर्यावत् किमपि वक्तुकाम आसीत् तदैवोभयोर्दृष्टिः पर्वतशिखरे निपपात ।

# अभ्यासः

## १. अधोलिखितप्रश्नानामुत्तराणि लिखत

(क) कस्य सन्ध्यावन्दनसमय आसीत् ?

(ख) गौरवटुना कदलीदलस्य पुटकं कथं निर्मितम् ?

(ग) गौरवटुः कीदृश आसीत् ?

(घ) पर्वतः कुत्र आसीत्, स च कीदृशः ?

(ङ) केन हेतुना श्यामवटुना पुष्पचयनं निषिद्धम् ?

(च) गौरवटुः त्रियामाया यामत्रयं कथमतिवाहितवान् ?

(छ) कन्यका कीदृशी आसीत् ?

## २. अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत

"यां च सप्तवर्षकल्पां यावनत्रासेन निश्शब्दं रुदतीं परमसुन्दरीं कलितमानवदेहामिव सरस्वतीं सान्त्वयन् मरन्दमधुरा अपः पाययन् कन्दखण्डानि भोजयन् त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति ।"

## ३. अधोनिर्दिष्टक्रियापदानां वाक्येषु प्रयोगं कुरुत

आरेभे, अवचिनोति, अवादीत्, अजागरीः, अनैषीः, स्वपिति, निपपात ।

## ४. अधोनिर्दिष्टगद्यखण्डस्य तात्पर्यं प्रकाशयत

"अलं भो अलम्, मयैव अवचितानि पुष्पाणि, त्वन्तु रात्रौ चिरमजागरीरिति क्षिप्रं नोत्थापितः ।"

## ५. अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत

वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चासीत् ।

६. **अधोनिर्दिष्टानां पदानां पर्यायान् लिखत**

कुसुमकोरकान्, कस्तूरिका, क्षिप्रम्, निःशब्दम्, आकुञ्च्य, सान्त्वयन्, पाययन्, भोजयन्, यामत्रयम्, सुप्तः, अतिवाहितः, सन्धाय, पुष्पावचयः ।

७. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

मरन्दमधुराः, सुन्दरकन्दरः, कस्तूरिकारुषितः, चन्दनचर्चितभालः, कलितमानवदेहाम् ।

८. **गौरवटुकृतायाः कन्यकासेवाया विषये निजेन संस्कृतेन दशपङ्क्त्यात्मकमनुच्छेदं लिखत ।**

९. **पुष्पावचयः इति पाठस्य सारांशं लिखत ।**

## तृतीयः पाठः

# सूर्यास्तमनवर्णनम्

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त ! हन्त !! नलिनीं गज उज्जहार ॥

**अथ जगतः प्रभाजालमाकृष्य, कमलानि सम्मुद्रय, कोकान् सशोकीकृत्य, सकलचराचर-चक्षुःसञ्चारशक्तिं शिथिलीकृत्य, कुण्डलेनेव निज-मण्डलेन पश्चिमामाशां भूषयन्, वारुणीसेवनेनेव माञ्जिष्ठ-मञ्जिम-रञ्जितः, अनवरतभ्रमण-परिश्रम-श्रान्त इव सुषुप्सुः, म्लेच्छ-गण-दुराचार- दुःखाऽऽक्रान्त-वसुमतीवेदनामिव समुद्रशायिनि निविवेदयिषुः वैदिक-धर्म-ध्वंस-दर्शनसञ्जातनिर्वेद इव गिरिगहनेषु प्रविश्य तपश्चिकीर्षुः, घर्म-ताप-तप्त इव समुद्रजले सिस्नासुः, सायं समयमवगत्य सन्ध्योपासनमिव विधित्सुः, "नास्ति कोऽपि मत्कुले; यः सकण्ठग्रहं धर्म-ध्वंसिनो यवनहतकान् यज्ञियादस्माद् भारत-गर्भान्निस्सारयेत्" इति चिन्ताऽऽक्रान्त इव कन्दरिकन्दरेषु प्रविविक्षुर्भगवान् भास्वान् क्रमशः क्रूरकरानपहाय, दृश्यपरिपूर्णमण्डलः संवृत्य, श्वेतीभूय, पीतीभूय, रक्तीभूय च गगनधरातलाभ्यामुभयत आक्रम्यमाण इवाऽण्डाकृतिमङ्गीकृत्य, कलि-कौतुक-कबलीकृत-सदाचारप्रचारस्य पातकपुञ्ज-पिञ्जरितधर्मस्य च यवन-गण-ग्रस्तस्य भारतवर्षस्य च स्मारयन्, अन्धतमसे च जगत् पातयन् चक्षुषामगोचर एव सञ्जातः ।**

### व्याख्या

अथ = अनन्तरम्, अफजलखानस्य ससेनावस्थानानन्तरमित्यर्थः, जगतः = संसारस्य, प्रभाजालम् = प्रकाशपुञ्जम्, आकृष्य = कर्षयित्वा, कमलानि = पद्मानि, सम्मुद्रय = मुकुलीकृत्य, कोकान् = चक्रवाकान् "कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः" इत्यमरः, सशोकीकृत्य = दुःखिनो विधाय, सकलचराचरचक्षुःसञ्चारशक्तिम् - सकलानाम् = अशेषाणाम्, चराचराणाम् = स्थावरजङ्गमानाम्, चक्षुषोः = नयनयोः, सञ्चारशक्तिम् = दर्शनसामर्थ्यम्, अशेषस्थावरजङ्गमनेत्रावलोकनक्षमतामित्यर्थः शिथिलीकृत्य = स्वल्पीकृत्य, कुण्डलेनेव = कर्णभूषणेनेव, "कुण्डलं कर्णभूषणम्" इत्यमरः । निजमण्डलेन = स्वबिम्बेन, पश्चिमाम् = प्रतीचीम्, आशाम् = दिशम्, "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः,

भूषयन् = अलङ्कुर्वन्, वारुणीसेवनेनेव - वारुण्याः = सुरायाः, पश्चिमाशायाः वा, “सुरा प्रत्यक् च वारुणी” इत्यमरः, सेवनेन = अवलम्बनेनेव, माञ्जिष्ठमञ्जिमरक्तः - माञ्जिष्ठस्य = मण्डुकपर्ण्याः, यः मञ्जिमा = रक्तिमा, तेन रक्तः = रक्तवर्णः, अनवरतभ्रमणपरिश्रमश्रान्तः - अनवरतम् = निरन्तरम्, यत् भ्रमणम् = सञ्चरणम्, तेन परिश्रान्तः = शिथिलः, सततसञ्चलनखेदखिन्नः इत्यर्थः, इव = यथा, सुषुप्सुः = शयनं कर्तुमिच्छुः, म्लेच्छगणदुराचारदुःखाऽऽक्रान्तवसुमतीवेदनामिव - म्लेच्छगणानाम् = यवनसमूहानाम्, दुराचारदुःखेन = कदाचारपीडया, आक्रान्ता = पीडिता, या वसुमती = वसुधा, तस्याः वेदनाम् = पीडामिव, समुद्रशायिनि - समुद्रे शेते इति समुद्रशायी, तस्मिन् = क्षीरसागरशयनरते, विष्णावित्यर्थः, निविवेदयिषुः = निवेदयितुमिच्छुः, वैदिक-धर्मध्वंसदर्शनसञ्जातनिर्वेद इव - वैदिकधर्मस्य = सनातनधर्मस्य, यो ध्वंसः = विनाशः, तस्य दर्शनेन = अवलोकनेन, सञ्जातः = उत्पन्नः, निर्वेदः = वैराग्यम्, इव = यथा, श्रौतधर्मनाशावलोकनोत्पन्नवैराग्य इवेत्यर्थः, गिरिगहनेषु- गिरीणाम् = पर्वतानाम्, गहनेषु = कन्दरासु, प्रविश्य = प्रवेशं विधाय, तपश्चिकीर्षुः = तपःकर्तुमिच्छुः, घर्मतापतप्तः - घर्मस्य = ग्रीष्मस्य, तापेन = सन्तापेन, तप्तः = पीडितः, निदाघोष्णतापीडितः इत्यर्थ, इव = यथा, समुद्रजले = सागराम्भसि, सिस्नासुः = स्नातुमिच्छुः, सायंसमयम् = निशामुखकालम्, अवगत्य = विज्ञाय, सन्ध्योपासनमिव = सन्ध्यावन्दनमिव, विधित्सुः = चिकीर्षुः, नास्ति = न वर्तते, कोऽपि = कश्चिदपि, मत्कुले = मदीयवंशे, यः सकण्ठग्रहम्- कण्ठग्रहः यस्मिन् कर्मणि यथा स्यात् तथा = गलग्रहणपूर्वकम्, धर्मध्वंसिनः = सनातनधर्मविनाशकान्, यवनहतकान् = तुरुष्कदुष्टान्, यज्ञियात् = यजनयोग्याद्, अस्माद् = एतस्माद्, भारतगर्भात् = हिन्दुस्थानमध्यात्, निःसारयेत् = बहिः कुर्यात्, इति = एवम्, चिन्ताक्रान्तः - चिन्तया = व्यथया, आक्रान्तः = ग्रस्तः, दुश्चिन्तापीडितः इत्यर्थः, इव = यथा, कन्दरिकन्दरेषु = गिरिगह्वरेषु, प्रविविक्षुः = प्रवेष्टुमिच्छुः, भगवान् = षडैश्वर्यसम्पन्नः, भास्वान् = रविः, क्रमशः = क्रमेण, क्रूरकरान् = तीक्ष्णकिरणान्, अपहाय = परित्यज्य, दृश्यपरिपूर्णमण्डलः - दृश्यम् = दर्शनीयम्, परिपूर्णमण्डलम् = सम्पूर्णमण्डलम्, यस्य सः = विलोक्यमानसकलबिम्बः, संवृत्य = भूत्वा, श्वेतीभूय = धवलीभूय, पीतीभूय = पीतिमानमाश्रित्य, रक्तीभूय = रुधिरवर्णो भूत्वा, गगनधरातलाभ्याम् - गगनतलम् = व्योमतलम्, च धरातलम् = पृथ्वीतलञ्च ते, गगनधरातले, ताभ्याम् = आकाशभूपृष्ठाभ्याम्, उभयतः = उभयस्मात् स्थलात्, आक्रम्यमाण इव = आक्रान्त इव, अण्डाकृतिम् = अण्डाकारम्, अङ्गीकृत्य = स्वीकृत्य, कलिकौतुककवलीकृतसदाचारप्रचारस्य-कलेः = कलिकालस्य, कौतुकेन = कुतूहलेन, कवलीकृतः = विनाशितः, सदाचारप्रचारः = सदाचारविस्तारः, यस्य तस्य = कलिकुतूहलविनष्टशुभाचारप्रचारस्य, पातक-पुञ्जपिञ्जरितधर्मस्य - पातकानां पुञ्जं पातकपुञ्जम् = पापसमूहः, तेन पिञ्जरितः = पीतवर्णतां गमितः, धर्मः = सुकृतम्, यस्य तस्य = पापसमूहपीतवर्णधर्मस्य च, यवनगणग्रस्तस्य- यवनगणैः = म्लेच्छसमूहैः, ग्रस्तः = व्याप्तः, तस्य = तुरुष्क-समुदयग्रस्तस्य, भारतवर्षस्य च = हिन्दुस्थानस्य च, स्मारयन् = स्मृतिविषयतामापादयन्, अन्धतमसे = प्रगाढध्वान्ते, “ध्वान्ते गाढेऽन्धतमसम्” इत्यमरः, च, जगत् = लोकम्, “त्रिष्वथो

जगती लोको विष्टपं भुवनं जगत्" इत्यमरः पातयन् = निमज्जयन्, पतनविषयतामापादयन्नित्यर्थः, चक्षुषाम् = नयनानाम्, अगोचरः = अदृश्य एव, सञ्जातः = सम्पन्नः ।

**पाठसारः**

भगवान् सूर्यः स्वकीयां किरणावलीं समाकृष्य, कमलानि मुकुलीकृत्य, कोकान् शोकाकुलान् विधाय, लोकानां दृष्टिसामर्थ्यं दुर्बलीकृत्य, कुण्डलसदृशेन निजमण्डलेन पश्चिमदिशं विभूष्य, मञ्जिष्ठरागमिव नैजं लालित्यं प्रकाश्य निखिलं विश्वमन्धकारे निपात्य अस्ताचलं प्रति जगाम । तस्मिन् समये असौ भगवान् अविरतभ्रमणपरिश्रमम् अपनोदमिच्छुरिव शयनेच्छुः, वसुमतीवेदनां नारायणं निवेदयितुकाम इव, पर्वतकन्दरेषु तपश्चिकीर्षुरिव, घर्मार्तः सन् महासागरजले स्नातुमिच्छुरिव, सन्ध्यां विधातुमिच्छुरिव च विलोक्यते स्म । दर्शनीयमण्डलोऽसौ क्रमशः श्वेतपीतरक्तवर्णानङ्गीकृत्य धरणीगगनतलाभ्यामाक्रान्त इवाण्डाकारं गृहीत्वा कलिकाल-कवलित-सदाचारस्य भारतवर्षस्य च दशां दर्शयन्निव अवलोक्यते स्म ।

## अभ्यासः

१. **अधोलिखितप्रश्नानामुत्तराणि लिखत**

(क) सूर्यः समुद्रशायिनि किं कुर्वन्निव विलोक्यते स्म ?

(ख) सूर्यः किमर्थं गिरिगहनेषु प्रविश्य तपश्चिकीर्षुरिव अवलोक्यते स्म ?

(ग) सूर्यः केनेव पश्चिमामाशां भूषयन् आसीत् ?

(घ) जगत् कुत्र पातयन् सूर्यश्चक्षुषाम् अगोचरः सञ्जातः ?

(ङ) सूर्यः किमर्थम् अण्डाकृतिम् अङ्गीकरोति स्म ?

(च) के जना धर्मध्वंसिन आसन् ?

(छ) सूर्यः किमर्थं समुद्रजले सिस्नासुरिव आसीत् ?

२. **अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत**

नास्ति कोऽपि मत्कुले; यः सकण्ठग्रहं धर्म-ध्वंसिनो यवनहतकान् यज्ञियादस्माद् भारत-गर्भान्निस्सारयेत् ।

३. **अधोनिर्दिष्टक्रियापदानां वाक्येषु प्रयोगं कुरुत**

सम्मुद्र्य, शिथिलीकृत्य, भूषयन्, सुषुप्सुः, चिकीर्षुः, पीतीभूय, सिस्नासुः, विधित्सुः, अपहाय ।

४. **अधोनिर्दिष्टगद्यखण्डस्य तात्पर्यं प्रकाशयत**

म्लेच्छ-गण-दुराचार-दुःखाऽऽक्रान्त-वसुमतीवेदनामिव समुद्रशायिनि निविवेदयिषुः, वैदिक-धर्म-ध्वंस-दर्शनसञ्जातनिर्वेद इव गिरिगहनेषु प्रविश्य तपश्चिकीर्षुः ।

५. **अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत**

श्वेतीभूय, पीतीभूय, रक्तीभूय च गगनधरातलाभ्यामुभयत आक्रम्यमाण इवाऽण्डाकृतिमङ्गीकृत्य, कलि-कौतुक-कवलीकृत-सदाचारप्रचारस्य पातकपुञ्ज-पिञ्जरितधर्मस्य च यवन-गण-ग्रस्तस्य भारतवर्षस्य च स्मारयन्, अन्धतमसे च जगत् पातयन् चक्षुषामगोचर एव सञ्जातः ।

६. **अधोनिर्दिष्टशब्दानां पर्यायान् लिखत**

प्रभाजालम्, कोकान्, निजमण्डलेन, विधित्सुः, सकण्ठग्रहम्, क्रूरकरान्, आकृष्य, पातयन्, अगोचरः, कुण्डलेन, मण्डलेन, आक्रम्यमाणः ।

७. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

माञ्जिष्ठमञ्जिमरञ्जितः, यवनहतकान्, कलिकौतुककवलीकृतसदाचारप्रचारस्य, पातकपुञ्ज-पिञ्जरितधर्मस्य, यवनगणग्रस्तस्य ।

८. **सरलया संस्कृतगिरा सूर्यास्तगमनं वर्णयत ।**

## चतुर्थः पाठः

# आर्यस्वभाववर्णनम्

**शिववीरः – अथ कथ्यतां को वृत्तान्तः ? का च व्यवस्था अस्मन्महाव्रताश्रमपरम्परायाः ?**

**गौरसिंहः – भगवन् सर्वं सुसिद्धम्, प्रतिगव्यूत्यन्तरालमङ्गीकृत-सनातनधर्म-रक्षा-महाव्रतानां धारित-मुनि-वेषाणां वीरवराणामाश्रमाः सन्ति। प्रत्याश्रमं च वलीकेषु गोपयित्वा स्थापिताः परश्शताः खड्गाः, पटलेषु तिरोभाविताः शक्तयः, कुशपुञ्जान्तःस्थापिताः भुशुण्ड्यश्च समुल्लसन्ति। उञ्छस्य, शिलस्य, समिदाहरणस्य, इङ्गुदीपर्य्यन्वेषणस्य, भूर्जपत्र-परिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य, सत्सङ्गस्य च व्याजेन केचन जटिलाः, परे मुण्डिनः, इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च बहवः पटवो वटवश्चराः सञ्चरन्ति। विजयपुरादुड्डीयाऽत्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तःस्थितं वयं विद्मः, किं नाम एषां यवनहतकानाम् ?**

**शिववीरः – साधु साधु, कथं न स्यादेवम् ? भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः, तमेते जाल्माः समूलमुच्छिन्दन्ति, अस्ति च "प्राणाः यान्तु, न च धर्मः" इत्यार्याणां दृढः सिद्धान्तः। महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न च धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा निशीथेष्वपि, वर्षास्वपि, ग्रीष्म-घर्मेष्वपि, महारण्येष्वपि, कन्दरिकन्दरेष्वपि, व्यालवृन्देष्वपि, सिंहसङ्घेष्वपि, वारण-वारेष्वपि चन्द्रहासचमत्कारेष्वपि च निर्भया विचरन्ति। तद् धन्याः स्थ यूयं वस्तुत आर्यवंशीयाः वस्तुतश्च भारतवर्षीयाः।**

### व्याख्या

शिववीरः - अथ = अनन्तरम्, कथ्यताम् = उच्यताम्, को वृत्तान्तः = का वार्ता (विद्यते) ? अस्मन्महाव्रताश्रमपरम्परायाः, अस्माकं महाव्रतस्य = महानुष्ठानस्य, यः आश्रमः = तपोवनम्, तस्य परम्परा = सञ्चालनव्यवस्था, तस्याः = अस्मन्महत्तपोवनसञ्चालनस्य, का व्यवस्था = कीदृशः प्रबन्धः ?

गौरसिंहः - भगवन् ! = श्रीमन् ! सर्वम् = निखिलम्, सुसिद्धम् = सुव्यवस्थितम्, प्रतिगव्यूत्यन्तरालम्- गव्यूतिं गव्यूतिं प्रति प्रतिगव्यूति, तदेवान्तरालं यत्र तत् = प्रत्येकक्रोशद्वयमध्ये, अङ्गीकृतसनातनधर्मरक्षामहाव्रतानाम्- अङ्गीकृतम् = स्वीकृतम्, सनातनधर्मरक्षायाः (सनातनधर्मस्य = वैदिकधर्मस्य, रक्षा = सुरक्षा, तस्याः) वैदिकसनातनधर्मरक्षायाः, महाव्रतम् = महानियमः, यैस्ते, तेषाम् = स्वीकृतार्यधर्मरक्षाव्रतानाम्, धारितमुनिवेषाणाम्- धारितः = कलितः, मुनिवेषः = मुनिस्वरूपम्, यैस्ते तेषाम् = स्वीकृतमुनिस्वरूपाणाम्,

वीरवराणाम् = विशिष्टभटानाम्, आश्रमाः = आवासाः सन्ति = विद्यन्ते । प्रत्याश्रमञ्च = प्रत्यावासञ्च, वलीकेषु = पटलप्रान्तेषु, गोपयित्वा = सङ्गोप्य, स्थापिताः = निहिताः, परश्शताः = शताधिकाः, खड्गाः = असयः, पटलेषु = शुष्कपलाशेषु, छादनेषु वा, तिरोभाविताः = गोपिताः, शक्तयः = शस्त्रविशेषाः, कुशपुञ्जान्तः = दर्भसमूहाभ्यन्तरे, स्थापिताः = निहिताः, भुशुण्ड्यश्च = बन्दूकनामकास्त्रविशेषाश्च, समुल्लसन्ति = विलसन्ति । उञ्छस्य = कणश आदानस्य, शिलस्य = क्षेत्रादौ स्वामिपरित्यक्तानां कणिकानां ग्रहणस्य, समिदाहरणस्य = यज्ञेन्धनानयनस्य, इङ्गुदीपर्यन्वेषणस्य = पिण्याकमार्गणस्य, भूर्जपत्रपरिमार्गणस्य = भूर्जपत्रान्वेषणस्य, कुसुमावचयनस्य = प्रसूनसङ्कलनस्य, तीर्थाटनस्य = तीर्थभ्रमणस्य, सत्सङ्गस्य = सज्जनसमागमस्य, च, व्याजेन = माध्यमेन, केचन जटिलाः = जटाधारिणः, परे = इतरे, मुण्डिनः= मुण्डितशिरस्काः, इतरे = अन्ये, काषायिणः = गैरिकवसनाः, अन्ये = अपरे, मौनिनः = मौनव्रताः, अपरे = इतरे, ब्रह्मचारिणः = ब्रह्मचारिवेषधारिणः च, बहवः = भूरिशः, पटवः = निपुणाः, बटवः = ब्रह्मचारिणः, बालकाः वा, चराः = स्पशाः, सञ्चरन्ति = विचरन्ति । विजयपुरात् = रिपुनगरादेतन्नामकात् स्थानात्, उड्डीय = उत्पत्य, अत्र = भवत्समीपम्, आगच्छन्त्याः = आयान्त्याः, मक्षिकाया अपि = क्षुद्रजीवस्यापि, अन्तः स्थितम् = हृदये वर्तमानं भावम्, वयम् = चराः, विद्मः = जानीमः, किं नाम = का कथा, एषाम् = वार्ताविषयत्वेन समुपस्थापितानाम्, यवनहतकानाम् = दुष्टयवनानाम् ।

शिववीरः - साधु साधु = सुष्ठु सुष्ठु, कथम् = किमर्थम्, न = नहि, स्यादेवम् = इत्थं भवेत् ? भारतवर्षीया = भारतदेशोत्पन्नाः, यूयम् = भवन्तः, तत्रापि = तस्मिन्नपि, महोच्चकुलजाताः, महोच्चकुले = लब्धप्रतिष्ठवंशे, जाताः = उत्पन्नाः, अस्ति = वर्तते, च इदम् = अस्माभिः संसेव्यमानम्, भारतं वर्षम् = भारतभूमिः, भवति च = सम्पद्यते च, स्वाभाविकः - स्वभावादागतः स्वाभाविक एव = नैसर्गिक एव, अनुरागः = स्नेहः, सर्वस्यापि = निखिलस्यापि, स्वदेशे = निजमातृभूमौ, पवित्रतमश्च = पूततमश्च, यौष्माकीणः - युष्माकम् अयं यौष्माकीणः = युष्माकम्, सनातनो धर्मः = वैदिको धर्मः, एते यवनाः, जाल्माः = अविवेकिनः, तम् = वैदिकं धर्मम्, समूलमुच्छिन्दन्ति = आमूलादुत्पाटयन्ति, अस्ति च = वर्तते च, प्राणाः = असवः, यान्तु = निर्गच्छन्तु, न च धर्मः = न हि स्वकीयः सनातनो धर्मः, इति = एतत्, आर्याणाम् = वैदिकमतावलम्बिनाम्, दृढः = कठोरः, सिद्धान्तः = नियमः, महान्तः = महामहिमशालिनः, हि धर्मस्य कृते = धर्मार्थम्, लुण्ठ्यन्ते = चौर्यन्ते, पात्यन्ते = पर्वताद्युच्चस्थानाद् अधो नीयन्ते, हन्यन्ते = मार्यन्ते, न = नहि, धर्मं त्यजन्ति = स्वधर्मं न मुञ्चन्ति, किन्तु = परन्तु, धर्मस्य = निजधर्मस्य, रक्षायै = रक्षणाय, सर्वसुखान्यपि- सर्वाणि च तानि सुखानि सर्वसुखानि अपि = सकलशर्माण्यपि, "शर्मशातसुखानि च" इत्यमरः, त्यक्त्वा = परित्यज्य, निशीथेष्वपि = अर्धरात्रेष्वपि, वर्षास्वपि = प्रावृट्स्वपि, ग्रीष्मघर्मेष्वपि - ग्रीष्मस्य घर्माः ग्रीष्मघर्माः, तेष्वपि = निदाघधूपेष्वपि, महारण्येष्वपि- महान्ति चेमानि अरण्यानि, तेष्वपि = भयानकजङ्गलेष्वपि, कन्दरिकन्दरेष्वपि - कन्दरिणां कन्दराः, तेषु = पर्वतगह्वरेष्वपि, व्यालवृन्देष्वपि - व्यालानां वृन्दानि, तेष्वपि = पन्नगव्रातेष्वपि, सिंहसङ्घेष्वपि- सिंहानां सङ्घाः, तेष्वपि = मृगेन्द्रसमूहेष्वपि, वारणवारेष्वपि- वारणानां वाराः, तेष्वपि = हस्तिगणेष्वपि, चन्द्रहासचमत्कारेष्वपि- चन्द्रहासानां = खड्गानाम्, चमत्काराः = शौर्यातिशयाः, तेष्वपि = चन्द्रहासचमत्कारेषु = खड्गप्रभामण्डलेष्वपि, च = पुनः, निर्भयाः

- निर्गतं भयं येषां ते निर्भयाः = भीतिविरहिताः, विचरन्ति = चलन्ति, तत् = तस्माद्, यूयम् = भवन्तः, धन्याः = धन्यवादार्हाः, स्थ = भवथ, । वस्तुतः = यथार्थतः, आर्यवंशीयाः = आर्यकुलोत्पन्नाः, वस्तुतश्च = यथार्थतश्च, भारतवर्षीयाः = भारतवर्षोद्भवाः ( सन्तीति शेषः) ।

## पाठसारः

शिववीरः संन्यासिवेषेण आत्मना सह मेलितुमागतं गौरसिंहम् आश्रमवासिनाम्, महाव्रतधारिण्याः आश्रमपरम्परायाश्च वृत्तान्तं पृच्छति । गौरसिंहस्तमुत्तरति - "सर्वं समीचीनं सुव्यवस्तिञ्च अस्ति । प्रतिक्रोशयुगलं मुनिवेषेण भ्रममाणानां श्रेष्ठवीराणामाश्रमाः सन्ति । प्रत्याश्रमं खड्गभुशुण्डीप्रभृतीनि आयुधानि सुसज्जितानि सन्ति । अनेके गुप्तचरा वटवः शिलसमित्कुसुमाहरणादिव्याजेन तीर्थाटनादिच्छलेन च जटिलाः, काषायिणः, मौनिनः, ब्रह्मचारिणश्च भूत्वा इतस्ततो भ्रमन्ति । अतो यवनानां सर्वं वृत्तान्तं वयं जानीम इति ।" तस्योत्तरेण नितान्तं प्रसन्नः शिववीरो जगाद - "शोभनम्, अतितरां शोभनम् । अवश्यमेव भवता यथोक्तं तथैव स्यात् । यतो हि भवन्तः भारतदेशोत्पन्नाः । तत्रापि विशालकुलसम्भवाः । अतः भारतदेशं प्रति भवतां नैसर्गिकी निष्ठाऽस्ति । तत्रापि भवतां वैदिकधर्मः सर्वाधिकः पवित्रः । दुष्टयवनास्तं समूलं ध्वंसयितुं वाञ्छन्ति । परं "प्राणाः यान्तु न च धर्माः" इति भवतां दृढः सिद्धान्तोऽवश्यमेव यवनान् विफलीकरिष्यति । महापुरुषा धर्मस्य कृते सर्वाणि सुखानि विहाय कठोरातिकठोरं कष्टमपि सोढुं तत्परा भवन्ति । अतो भवादृशा आर्यवंशीया भारतीया धन्याः सन्ति" इति ।

## अभ्यासः

### १. अधोलिखितप्रश्नानामुत्तराणि लिखत

(क) कः कं महाव्रताश्रमपरम्पराया वृत्तान्तं पृच्छति ?

(ख) प्रतिगव्यूत्यन्तरालं केषामाश्रमाः सन्ति ?

(ग) आश्रमेषु कीदृशाश्चरा विलोक्यन्ते ?

(घ) के विजयपुरादुड्डीयागताया मक्षिकाया अपि अन्तःस्थितं वृत्तान्तं जानन्ति ?

(ङ) शिववीरः कं भृशं प्रशंसति ?

(च) "प्राणाः यान्तु, न च धर्मः" इति केषां दृढः सिद्धान्तः ?

(छ) के सनातनधर्ममुच्छिन्दन्ति ?

(ज) के धर्मस्य कृते लुण्ठ्यन्ते ?

(झ) महान्तो धर्मस्य कृते किं किं कुर्वन्ति ?

(ञ) किमर्थं गौरसिंहसदृशा वटवो धन्याः सन्ति ?

२. **अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत**

“विजयपुरादुड्डीयाऽत्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तःस्थितं वयं विद्मः, किं नाम एषां यवनहतकानाम् ?”

३. **अधोनिर्दिष्टक्रियापदानां वाक्येषु प्रयोगं कुरुत**

उच्छिन्दन्ति, अस्ति, यान्तु, लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, त्यजन्ति, विचरन्ति, विद्मः, समुल्लसन्ति, त्यक्त्वा ।

४. **अधोनिर्दिष्टगद्यांशस्य तात्पर्यं प्रकाशयत**

अस्ति च “प्राणाः यान्तु, न च धर्मः” इत्यार्याणां दृढः सिद्धान्तः ।

५. **अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत**

महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न च धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा निशीथेष्वपि, वर्षास्वपि, ग्रीष्म-घर्मेष्वपि, महारण्येष्वपि, कन्दरिकन्दरेष्वपि, व्यालवृन्देष्वपि, सिंहसङ्घेष्वपि, वारण-वारेष्वपि चन्द्रहासचमत्कारेष्वपि च निर्भया विचरन्ति ।

६. **अधोनिर्दिष्टपदानां पर्यायान् लिखत**

सुसिद्धम्, वलीकेषु, खड्गाः, पटलेषु, उञ्छस्य, शिलस्य, व्याजेन, जटिलाः, मुण्डिनः, काषायिणः, मौनिनः, चराः ।

७. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

समिदाहरणस्य, इङ्गुदीपर्य्यन्वेषणस्य, भूर्जपत्र-परिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य, धारित-मुनि-वेषाणाम्, प्रतिगव्यूत्यन्तरालम्, कुशपुञ्जान्तःस्थापिताः, अङ्गीकृत-सनातनधर्म-रक्षा-महाव्रतानाम्, वीरवराणाम्, यवनहतकानाम्, चन्द्रहासचमत्कारेषु, कन्दरिकन्दरेषु ।

८. **सरलसंस्कृतभाषायाम् आर्याणां चरित्रं वर्णयत ।**

९. **सरलसंस्कृतगिरा गौरसिंहवर्णितरीत्या वीरवराणाम् आश्रमान् वर्णयत ।**

१०. **शिववीरदृष्ट्या संक्षेपेण गौरसिंहं वर्णयत ।**

# सुबन्धोः परिचयः

संस्कृतवाङ्मये गद्यकाव्यस्य गौरवशालिनी परम्परा विराजते । वस्तुतः कवेः प्रतिभायाः पूर्णं प्रकाशनं गद्यस्यैव माध्यमेन भवति । गद्यकाव्ये कविः स्वकल्पनाप्रौढेः प्रकाशने सर्वथा स्वतन्त्रो भवति । तत्र छन्दसां नहि भवति बन्धनम् । तथाविधे गद्ये काव्ये समर्थः कविः स्वशब्दार्थयो- र्देशकालपात्रानुसारिण्या शक्तेः प्रकाशने सर्वथा समर्थं विधिमाश्रयति । येन छन्दोभिर्विनाऽपि गद्ये काव्ये गेयात्मकताया आभासो भवति । शब्दालङ्काराणामर्थालङ्काराणाञ्च कृतेन स्थानानुकूलप्रयोगेण कविः सहृदयानां परमप्रेमास्पदतां भजते । अत एव प्राहुः केचनालोचकाः "गद्यं कवीनां निकषं वदन्ति" इति । तथाविधेषु संस्कृतसाहित्यस्य समर्थगद्यकाव्यप्रणयनकर्तृषु कालदृष्ट्या सर्वप्रथमं कठिनी सुबन्धोरेव नामनि पतति । यद्यपि तदीयं जीवनवृत्तमद्यापि तिमिराच्छन्नमेव वर्तते । सुबन्धोः कालस्य विषये किञ्चिदपि बाह्यप्रमाणं नोपलब्धं भवति । अथापि कतिपयैरन्तरङ्गसाधनैः सुबन्धोः कालस्य निर्णयः क्रियते । तथाहि –

१. **सा रसवत्ता विहता नवका विलसन्ति चरति नो कङ्कः ।**

**सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये ॥ वासवदत्ताया दशमं पद्यम् ।**

इत्यस्मिन् पद्ये सुबन्धुः स्वयमेव विक्रमादित्यस्य स्मरणमकार्षीत् । परञ्चास्य सुबन्धुना संस्मृतस्य विक्रमादित्यस्य विषये विवेचकानां विप्रतिपत्तिर्विद्यते । अधिकतराणामालोचकानां मतमास्ते यदयं सुबन्धुना संस्मृतो विक्रमादित्यो यशोवर्माऽपराभिधानो बालादित्यसख एव वर्तते । ऐतिह्यज्ञा यशोवर्मणः कालं षष्ठशतकस्य मध्यभागं स्वीकुर्वन्ति । अत एव सुबन्धोः कालः षष्ठशताब्द्या मध्यो भागो निश्चीयते ।

२. बाणभट्टः "धिया निबद्धेयमतिद्वयी कथा ।" इति मङ्गलपद्यांशस्य माध्यमेन सुबन्धोः वासवदत्तामस्मार्षीत् । अत एवाऽपि सुबन्धोः कालः बाणभट्टस्य कालादर्वाक् षष्ठशतकमेव निश्चीयते ।

३. सुबन्धुर्वासवदत्तायाः श्लेषद्वारा उद्योतकरं स्मरति - "न्यायस्थितिमिवोद्यतकरस्वरूपम्" इत्यस्मिन् वाक्ये । उद्योतकरस्य कालः षष्ठसप्तमशताब्द्योरन्तराले स्वीक्रियते । अत एवापि सुबन्धोः समयः षष्ठशताब्दी निश्चीयते ।

सुबन्धोरेक एव ग्रन्थः समुपलभ्यते वासवदत्तानामकः । अनेनैव ग्रन्थेन सुबन्धुर्गद्यलेखकेषु प्रसिद्धिमवाप । एतच्च संस्कृतसाहित्यस्यैव प्रथमं गद्यकाव्यरत्नमस्ति । सुबन्धुनात्र काव्ये श्लेषमय्यां शैल्यां प्रौढपाण्डित्यं विशिष्टं वैदुष्यञ्च प्रस्तुतं विलोक्यते । वासवदत्ता तादृशं विलक्षणं गद्यकाव्यमस्ति यत्र प्रत्यक्षरं श्लेषगुम्फितं वर्तते । स्वयमेव सुबन्धुर्लिलेख वासवदत्तायाम् -

**सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः ।**
**प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिं निबन्धम् ॥**

## वासवदत्ताविषयवैशिष्ट्यम्

वासवदत्तनामके गद्यकाव्ये श्लेषेण सहैवानेन महाकविना मुक्तकवृत्तगन्धिचूर्णकोत्कलिकाप्रायाणां चतुर्णामेव गद्यप्रकाराणां प्रयोगो विहितः । सुबन्धुः कोमलभावप्रधानवाक्यरचनायामपि अद्वितीयं वैशिष्ट्यमासादयति । तद्यथा - "रविविरहविधुरायाः कमलिन्या हृदयमिव द्विधा पपाट चक्रवाकमिथुनम् । आगमिष्यतो हिमकरदयितस्य पार्श्वे सञ्चरन्ती कुमुदिन्या भ्रमरमाला दूतीवाऽलक्ष्यत ।" आलङ्कारिकचमत्कारम्, श्लेषबाहुल्यम्, वक्रोक्तिच्छटाञ्चासौ सत्काव्यस्य प्राणाधायकं तत्त्वत्रयं मेने - "सुश्लेषवक्रघटनापटुसत्काव्यविरचनमिव ।" सुबन्धुप्रणीता वासवदत्ता तदीयां धर्मनीतिदर्शनसाहित्यलोकसम्बद्धां विलक्षणां व्युत्पत्तिं विजृम्भयति । तत्रत्यानि अधिकांशपदानि सुबन्धुर्न्यायमीमांसाबौद्धादिदर्शनशास्त्राणां शास्त्रान्तराणाञ्च पारदृश्वाऽऽसीदिति प्रमाणयन्ति ।

चिन्तामणिपुत्रः कन्दर्पकेतुरत्र काव्यनायकः, पाटलीपुत्रराजकुमारी वासदत्ता चात्र नायिका, अनयोः प्रगाढानुरागोऽत्र विषयः, मकरन्दः कन्दर्पहेतुसहायकः, शुकदम्पती च नायिकानायकोपकारकौ, किरातसमूहौ चात्र प्रतिनायकपक्षभूतौ, रसोऽत्र सम्भोगशृङ्गारः प्रधानः, विप्रलम्भशृङ्गार-करुणादयश्चाङ्गभूताः, श्लेषोपमारूपकव्यतिरेकपरिसङ्ख्याविरोधाभासयमकानुप्रासादयश्चालङ्काराः । 'वासवदत्ता' कल्पनाप्रधानत्वात् कथाकोटावेवाटीकते गद्यकाव्यस्य । केचनास्या वासवदत्ताया आख्यायिकात्वमपि स्वीकुर्वन्ति । कारणमास्ते उदयनकथाया प्रधाननायिकाया वासवदत्ताया नाम्ना ग्रन्थनामविधानम् । बाणभट्टः स्वयमेव सुबन्धोर्वासवदत्तां सस्मार सादरम् । तथाहि-

**कवीनामगलद्दर्पो नूनं वासवदत्तया ।**
**शक्त्येव पाण्डुपुत्राणां नूनं वासवदत्तया ॥**

यद्यपि वासवदत्ता गद्यकाव्येषु प्रथमं पदं निधत्ते तथापि वहतीदं काव्यं शब्दार्थयोरलङ्काराणां सौष्ठवातिशयम् । यमकानुप्रासोपमाविरोधाभासपरिसङ्ख्यादिका अलंकारास्तत्र तत्र स्थाने लब्धप्रवेशाः सन्ति । अलङ्काराणां प्रयोगाः कृता वर्तन्ते कविना तत्र तत्र सप्रयासम् । अत एवायं ग्रन्थः काठिन्यमपि बिभर्त्ति । अतश्चात्र सामान्यपाठकानां न भवति सुगमः प्रवेशः । वासवदत्तायामाख्यायिकोपयोगिनः कतिचन श्लोकाः समुपलभ्यन्ते । एभिः श्लोकैः सुबन्धोः कवितापाटवमेवाभिव्यज्यते । यथा च ते श्लोकाः -

**अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।**
**अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला ॥**
**विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः ।**
**यदयं नकुलद्वेषी सकुलद्वेषी पुनः पिशुनः ॥**

## पञ्चमः पाठः

# चिन्तामणिवर्णनम्

**अभूदभूतपूर्वः सर्वोर्वीपतिचक्रचारुचूडामणिश्रेणीशाणकोणकषणनिर्मलीकृतचरणनखमणिः, नृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः, कृष्ण इव कृतवसुदेवतर्पणो नारायण इव सौकर्यसमासादितधरणिमण्डलः, कंसारातिरिव जनितयशोदानन्दसमृद्धिरानकदुन्दुभिरिव कृतकाव्यादरः, सागरशायीवानन्तभोगिचूडामणिमरीचिरञ्जितपादपद्मो वरुण इवाशान्तरक्षणोऽगस्त्य इव दक्षिणाशाप्रसाधको जलनिधिरिव वाहिनीशतनायकः समकरप्रचारश्च हर इव महासेनानुगतो निवर्तितमारश्च मेरुरिव विबुधालयो विश्वकर्माश्रयश्च रविरिव क्षणदानप्रियश्छायासन्तापहरश्च कुसुमकेतुरिव जनितानिरुद्धसम्पद्रतिसुखप्रदश्च विद्याधरोऽपि सुमना धृतराष्ट्रोऽपि गुणप्रियः क्षमानुगतोऽपि सुधर्माश्रितो बृहन्नलानुभावोऽप्यन्तःसरलो महिमहिषीसम्भवोऽपि वृषोत्पादी, अतरलोऽपि महानायको राजा चिन्तामणिर्नाम ।**

'अभूदभूतपूर्व' इति ... चिन्तामणिर्नाम इत्यनेन सम्बन्धः ।

**सर्वोर्वीपतिचक्रचारुचूडामणिश्रेणीशाणकोणकषणनिर्मलीकृतचरणनखमणिः** - सर्वेषाम् = अखिलानाम्, उर्वीपतीनाम् = राज्ञाम्, चक्रस्य = समूहस्य, मनोहरा = मनोहारिणी, चूडामणिश्रेणी = शिरोरत्नपङ्क्तिरेव, शाणो = निकषः, "शाणस्तु निकषः कषः" इत्यमरः, तस्य कोणेन = अग्रभागेन, कषणेन = घर्षणेन, निर्मलीकृताः = उज्ज्वलीकृताः, चरणनखाः = पादनखराः यस्य सः । राजसमूहप्रणत इत्यर्थः । नृसिंह इव = नृसिंहावतार इव, **दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः** - दर्शितः = प्रदर्शितः, लोकानामिति शेषः, हिरण्यस्य = सुवर्णस्य, कशिपोः = अन्नवस्त्रभोजनाच्छादनादेः, दानेन = प्रदानेन, विस्मयः = आश्चर्यम् "विस्मयोऽद्भुतमाश्चर्यम्" इत्यमरः, येन सः । नृसिंहपक्षे - दर्शितः = लोके ख्यापितः, हिरण्यकशिपोः = एतन्नामकदैत्यविशेषस्य क्षेत्रस्य = शरीरस्य, दानेन = विदारणेन, विस्मयः = आश्चर्यम्, येन स तथोक्तः । कृष्ण इव = वासुदेव इव, **कृतवसुदेवतर्पणः**, कृतं = विहितम्, वसुभिः = धनैः, देवानाम् = सुराणाम्, तर्पणम् = तृप्तिः, येन सः । प्रभूतयज्ञानुष्ठानेन कृतदेवतृप्तिः । कृष्णपक्षे - कृतं = विहितम्, वसुदेवस्य = स्वपितुः, तर्पणम् = तृप्तिः, येन सः तथोक्त । नारायण इव = विष्णुरिव, **सौकर्यसमासादितधरणिमण्डलः**, सौकर्येण (सुकरस्य भावः सौकर्यं तेन) = सुकर्मणा, समासादितम् = सम्प्राप्तम्, धरणिमण्डलम् = पृथ्वीमण्डलम्, येन सः । नारायणपक्षे - सूकरस्य भावः कर्म वा सौकर्यं तेन = सूकरशरीरेण वराहावतारधारिणा, सम्यक् = समीचीनतया, आसादितम् = उद्धृतम्, धरणिमण्डलम् = पृथ्वीगोलकम्, येन सः । कंसारातिः = कंसशत्रुः इव, **जनितयशोदानन्दसमृद्धिः** -

जनिता = उत्पादिता, यशोदा = यशोदायिनी, आनन्दा = आनन्दकारिणी, समृद्धिः = उपचयो येन सः । पक्षे - कंसस्यारातिः = श्रीकृष्णः, इव = तद्वत्, जनिता = प्रकटिता, यशोदायाः = स्वमातुः नन्दस्य = स्वपितुः, समृद्धिः = अभिवृद्धिः, येन सः । आनकदुन्दुभिः = वसुदेव इव, "वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः" इत्यमरः, **कृतकाव्यादरः** - कृतः = विहितः, काव्यैः = देवैः, आदरः = सम्मानः, यस्य सः, कृतकाव्यादरः । वसुदेवजन्मसमये देवैर्दुन्दुभिं वादयित्वा तस्यादरः कृतः । सागरशायी - सागरे शयितुं शीलम् अस्येति सागरशायी = विष्णुः, इव **अनन्तभोगिचूडामणिमरीचिरञ्जितपादपद्मः** - अनन्तभोगी = शेषस्तस्य, चूड़ामणीनाम् = शिरोरत्नानाम्, मरीचिभिः = किरणैः, रञ्जितम् = प्रकाशितम्, पादपद्मम् = चरणकमलम्, यस्य सः । पक्षे - सागरशायीव = विष्णुरिव, अनन्तानाम् = असङ्ख्यातानाम्, भोगिनाम् = नृपाणाम्, चूड़ामणिमरीचिभिः = मुकुटमणिमयूखैः, रञ्जितम् = रक्तीकृतम्, पादपद्मम् = चरणकमलम्, यस्य सः । वरुण इव = पाशी इव, **अशान्तरक्षणः** - अशान्तम् = अनवरतम्, रक्षणम् = रक्षाकार्यम्, यस्य सः । वरुणपक्षे - आशान्ते = चतुर्दिक्पर्यन्ते, रक्षणम् = रक्षा, यस्य सः । अगस्त्य इव = कुम्भसम्भव इव, **दक्षिणाशाप्रसाधकः** - दक्षिणाभिः = दक्षिणाद्रव्यैः, आशायाः = आकाङ्क्षायाः, प्रसाधकः = पूरकः, यद्वा दक्षिणानाम् = कुशलानाम्, आशा = आकाङ्क्षा, तस्याः प्रसाधकः = पूरयिता । अगस्त्यपक्षे - अगस्त्यमुनिरिव दक्षिणाशाप्रसाधकः = दक्षिणदिगलङ्कर्ता । जलनिधिरिव = समुद्र इव, **वाहिनीशतनायकः** - वाहिनीनाम् = सेनानाम्, "ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः" इत्यमरः, शतस्य = शतसङ्ख्यकस्य, नायकः = नेता । सागरपक्षे - वाहिनीनाम् = नदीनाम्, शतस्य = शतकस्य, नायकः = पतिः । **समकरप्रचारश्च** - समः = पक्षपातरहितः, अन्यूनाधिको वा, करस्य = कर्षकादिराज्यग्राह्यभागस्य, प्रचारः = उद्घोषो यस्य सः । सागरपक्षे - मकराणाम् = जलजन्तूनाम्, प्रचारेण = इतस्ततो गमनेन सहितश्च । हर इव = महादेव इव, **महासेनानुगतः** - महती = बृहती, या सेना = चमूः, तया अनुगतः = अनुसृतः । हरपक्षे - महासेन = कार्तिकेयः, तेन अनुगतः = अनुसृतः । **निवर्तितमारश्च** - निवर्तितः = विनाशितः, मारः = कामदेवः, येन सः । हरपक्षे - निवर्तितः = भस्मीकृतः, मारः = मदनः, कामदेवो वा "मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः" इत्यमरः, येन सः । मेरुरिव = सुमेरुरिव, "मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः" इत्यमरः, **विबुधालयः** - विबुधानाम् = विदुषाम्, आलयः = आश्रयदाता, **विश्वकर्माश्रयश्च** - विश्वानि = सकलानि, यानि कर्माणि = प्रजापालनादीनि, तेषाम् आश्रयः= अनुष्ठाता । मेरुपक्षे - विबुधानाम् = देवानाम्, "त्रिदशाः विबुधाः सुराः" इत्यमरः, आलयः = निवासभूमिः, विश्वकर्मणः = देवशिल्पिनः, सूर्यस्य च, आश्रयः = निवासः । रविरिव = सूर्य इव, **क्षणदानप्रियः** - क्षणेषु = उत्सवेषु, दानप्रियः = त्यागशीलः, यद्वा क्षणम् = प्रतिक्षणम्, सर्वदेति यावत्, दानप्रियः = त्यागशीलः । **छायासन्तापहरश्च** - छायया = आश्रयदानेन, संतापहरः = दुःखहर्त्ता । रविपक्षे - क्षणदा = रात्रिः, न प्रिया यस्य सः, रात्रिविनाशकत्वादिति भावः । छायायाः = एतन्नाम्न्याः स्वप्रियायाः, संतापहरः = क्लेशहर्त्ता, यद्वा छायया = स्वकान्त्या, सन्तापहरः = व्याधिहर्त्ता, छायया चक्रवाकादीनां वियोगजन्यसन्तापहर्त्ता इति वा । कुसुमकेतुरिव = कामदेव इव, **जनितानिरुद्धसम्पत्** - जनिता = समुत्पादिता, अनिरुद्धा = सततस्थायिनी, सम्पत् = ऐश्वर्यम्, येन सः । **रतिसुखप्रदश्च** - रतौ = रतिक्रीडायाम्, स्वप्रियायाः सुखप्रदः = आनन्दजनकः । पक्षे - कुसुमकेतुः = कामः इव, जनिता = उत्पादयिता, प्रद्युम्नरूपेण

मायावत्यां पुत्ररूपा, सम्पत् = ऐश्वर्यम्, येन । यद्वा जनिता अनिरुद्धाय उषारूपा, सम्पद् = ऐश्वर्यं येन सः । बाणासुरविजयं कृत्वा अनिरुद्धायोषां सम्पादितवानिति पौराणिकी प्रसिद्धिः । रतेः = स्वप्रियायाः, सुखप्रदः = आनन्ददायकः । **विद्याधरोऽपि सुमनाः** - विद्याधरः = देवयोनिविशेषः सन्नपि सुमनाः = देवः, इत्यत्र यः देवयोनिविशेषः स कथं देव एव ? इति विरोधः । परिहारस्तु विद्याधरः = अष्टादशविद्यानां धारकः, सुमनाः = प्रसन्नहृदयश्चेति । **धृतराष्ट्रोऽपि गुणप्रियः** धृतराष्ट्रः = अम्बिकासुतः अपि, गुणप्रियः = भीमसेनप्रियः, इति विरोधः । विरोधपरिहारस्तु धृतम् = पालितम्, राष्ट्रम् = देशः, येन सः तथाभूतोऽपि गुणाः = सन्धिविग्रहादयः, दयादाक्षिण्यादयो वा प्रिया यस्य स तादृशः । **क्षमानुगतोऽपि सुधर्माश्रितः** - क्षमाम् = पृथिवीम्, अनुगतः = संश्रितोऽपि, सुधर्माम् = देवसभाम्, "स्यात् सुधर्मा देवसभा" इत्यमरः, आश्रितः = अधिष्ठितः, ननु यः पृथ्वीमाश्रितः स कथं देवसभामाश्रयेदिति विरोधः । परिहारस्तु - क्षमया = शान्त्या, अनुगतः = युक्तः, सुधर्माम् = प्रजापालनादिशोभनधर्मां वृत्तिम्, आश्रित इति । **बृहन्नलानुभावोऽप्यन्तःसरलो** - बृहत् = महान् यो नलः = तृणविशेषः, तस्य इव, अनुभावः = चित्तवृत्तिः, स्थितकटाक्षादिभावप्रकाशकः । ननु तादृशतृणविशेषे कथं चित्तभावप्रकाशकत्वमिति विरोधः, परिहारस्तु बृहन्नलानुभावः = अर्जुनसदृशप्रभाववानित्यर्थः । अन्तःसरलः = मध्ये सरलः, अर्जुनपक्षे - अत्यन्तमृजुः । **महिमहिषीसम्भवोऽपि वृषोत्पादी** - महामहिष्या = विशालमहिषीयोनेः, सम्भवः = जन्म, यस्य तादृशोऽपि, वृषोत्पादी = वृषोत्पादनशीलः, नन्वयं विरोधः महिषीपुत्रान्महिष एव सम्भवति न वृषः, इति विरोधः, परिहारस्तु - महिष्याम् = कृताभिषेकायां राजपत्न्याम्, "कृताभिषेका महिषी" इत्यमरः, सम्भवोऽपि वृषम् = धर्ममुत्पादयति तच्छीलः इति । **अतरलोऽपि महानायकः** - अतरलः = हारमध्यमणिभिन्नोऽपि, "तरलो हारमध्यगः" इत्यमरः, महानायकः = हारमध्यमपि स्थितः । परिहारस्तु - अतरलोऽपि = शान्तमतिरपि, महानायकः = महानेता । एवं भूतः, चिन्तामणिर्नाम = चिन्तामणिनामकः, अभूतपूर्व - पूर्वं भूतः भूतपूर्वः, न भूतपूर्वः अभूतपूर्वः = अद्वितीयः राजाऽभूदिति पूर्वेणान्वयः ।

## पाठसारः

प्राचीनकाले चिन्तामणिनामधेय एको महानायको भूपतिर्बभूव । स सर्वैः पृथ्वीपतिभिर्वन्दितचरणः, नृसिंह इवाश्चर्यजनककार्यकारी चासीत् । भगवता नारायणेन इव तेन सरलतया भूमण्डलं परिपालितमासीत् । यशोदानन्दकरः कृष्ण इव स वसुदेवानां परितोषकश्चासीत् । दक्षिणराज्यप्रशासकोऽयं शताधिकमहासेनानुगतो महादेव इवावलोक्यते स्म । सूर्य इव प्रतापी चायं सुमेरुपर्वत इव विबुधानामाश्रय आसीत् । नृपोऽसौ उदारहृदयः गुणप्रियः क्षमाशीलः साधुसमागमशीलः धीरः स्वान्तः सरलः परमोदारश्च बभूव ।

## अभ्यासः

**१. अधोनिर्दिष्टप्रश्नानामुत्तराणि लिखत**

(क) महानायकः कः आसीत् ?
(ख) चिन्तामणिः कथं नृसिंह इवासीत् ?
(ग) चिन्तामणिः कथं कृष्ण इवासीत् ?
(घ) चिन्तामणि क इव विबुधालयो बभूव ?
(ङ) चिन्तामणिः कथं धृतराष्ट्रोऽपि गुणप्रियो बभूव ?
(च) चिन्तामणिः कथं दक्षिणाशाप्रसाधकोऽभूत् ?
(ज) चिन्तामणिः कथं सागरशायीव विलोक्यते स्म ?

**२. अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत**

विद्याधरोऽपि सुमना, धृतराष्ट्रोऽपि गुणप्रियः, क्षमानुगतोऽपि सुधर्माश्रितो बृहन्नलानुभावोऽप्यन्तःसरलो महिमहिषीसम्भवोऽपि वृषोत्पादी, अतरलोऽपि महानायको राजा चिन्तामणिर्नाम ।

**३. अधोनिर्दिष्टगद्यखण्डस्य तात्पर्यं प्रकाशयत**

मेरुरिव विबुधालयो विश्वकर्माश्रयश्च रविरिव क्षणदानप्रियश्छायासन्तापहरश्च कुसुमकेतुरिव जनितानिरुद्धसम्पद्रतिसुखप्रदश्च

**४. अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत**

अभूदभूतपूर्वः सर्वोर्वीपतिचक्रचारुचूडामणिश्रेणीशाणकोणकषणनिर्मलीकृतचरणनखमणिः, नृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः, कृष्ण इव कृतवसुदेवतर्पणो नारायण इव सौकर्य-समासादितधरणिमण्डलः ।

**५. अधोनिर्दिष्टानां पदानां वाक्येषु प्रयोगं कुरुत**

कंसारातिः, जलनिधिः, विबुधालयः, विश्वकर्माश्रयः, कुसुमकेतुः ।

**६. अधोनिर्दिष्टानां शब्दानां पर्यायान् निर्दिशत**

विद्याधरः, सुमना, धृतराष्ट्रः, गुणप्रियः, वृषोत्पादी ।

**७. अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

अभूतपूर्वः, कृतवसुदेवतर्पणः, सौकर्यसमासादितधरणिमण्डलः, कृतकाव्यादरः, समकरप्रचारः ।

**८. राज्ञश्चिन्तामणेः कानि वैशिष्ट्यानि आसन् ? दशपङ्क्त्यात्मकमेकमनुच्छेदं विरचय्य स्पष्टीकुरुत ।**

**९. चिन्तामणिवर्णनमिति पाठस्य सारं प्रकाशयत ।**

**षष्ठः पाठः**

# चिन्तामणिशासनवर्णनम्

**यत्र च शासति धरणिमण्डलं छलनिग्रहप्रयोगो वादेषु नास्तिकता चार्वाकेषु कण्टकयोगो नियोगेषु परीवादो वीणासु खलसंयोगः शालिषु द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु करच्छेदः क्लृप्तकर-ग्रहणेषु नेत्रोत्पाटनं मुनीनां द्विजराजविरुद्धता पङ्कजानां सार्वभौमयोगो दिग्गजस्याग्नितुलादिशुद्धिः सुवर्णानां सूचीभेदो मणीनां शूलभङ्गो युवतिप्रसवे दुःशासनदर्शनं भारते करपत्रदारणं जलजानाम् । महावराहो गोत्रोद्धरणप्रवृत्तेऽपि गोत्रोद्दलनमकरोत् । राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश । भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत् । नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः । पृथुरपि गोत्रसमुत्सारणविस्तारितभूमण्डलः । इत्थं नास्ति वागवसरः पूर्वतरराजसु । स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः । तथा हि स पर्वतः कटकसञ्चारिणो गन्धर्वान् दर्शितशृङ्गोन्नतिः सुखयन् न विरराम । स हिमालयो नावश्यायोच्छलितो नो मायाजन्मने हितश्च । स हि मानी गिरि स्थितो वृषध्वजः । असौ सदागतिरवधूताखिलकान्तारः पावकाग्रसरो नभोगोत्सुकः सुमनोहरश्च । स रत्नाकरोऽनहिमयो कथमगाधः समर्यादो नोद्वेगोऽप्यस्य विस्मया सदा हिमकराश्रयोऽमृतमयः सपोतस्तस्याचलो नक्रोधो महानदीनः समुद्रः । स चन्द्र इव क्षणदानन्दकरः कुमुदबन्धुः सकलकलाकुलगृहं नतारातिबलः । मित्रोदयहेतुः काञ्चनशोभां विभ्रदचलाधिकलक्ष्मीः सुमेरुरिव ।**

यत्र = यस्मिन्, चिन्तामणौ राजनि, **धरणिमण्डलम्** = पृथ्वीवलयम्, शासति सति = प्रशासति सति, वादेषु = शास्त्रार्थेषु, **छलनिग्रहप्रयोगः** - छलश्च = प्रवञ्चनञ्च, निग्रहश्च = प्रतिज्ञाहान्यादिन्यायशास्त्रोक्तो विधिश्च,तयोःप्रयोगः = उपयोगः,आसीत् = बभूव,नतुप्रजासुछलस्य = कपटस्य,निग्रहस्य = बन्धनदण्डादेः वा प्रयोगः, उपयोगोऽभवत्, प्रजानां धर्मवृत्तित्वात् छलवधादियोग्यापराधाभावाच्च । नास्तिकता - ईश्वराभावबुद्धिः, वेदशास्त्रेश्वरपरलोकाभावस्वीकारत्वं वा । चार्वाकेषु = बृहस्पतिप्रणीतशास्त्रानुयायि-नास्तिकेष्वासीत्, प्रजासु न आसीत् इति शेषः । नास्ति परलोक इत्येवं मतिर्यस्य सः तस्य भावः नास्तिक्यमिति व्युत्पत्तेः । नियोगेषु = अपुत्रभ्रातृपत्नीपुत्रार्थं गर्भाधानेषु, **कण्टकयोगः** = रोमाञ्चस्थितिः, राज्ये प्रजासु वा कण्टकयोगः = कण्टकादिप्रयोगेण जनपीडा न भवति स्म इति भावः । वीणासु = वल्लकीषु, परीवादः = सामरस्येन वादनं, वीणावादनदण्डसम्बन्ध आसीत् । न तु राज्ये प्रजासु परितः सामरस्येन, वादः = निन्दावचनम्, आसीत् । **शालिषु** = धान्येषु **खलसंयोगः** - खलस्य= धान्यमर्दनस्थानस्य (खलो इति भाषायाः), संयोगः = सम्बन्धः आसीत् । न तु प्रजासु खलैः =दुष्टैः सह, संयोगः= सम्बन्ध आसीत् । **आहितुण्डिकेषु** - अहितुण्डेन = सर्पमुखेन, दीव्यन्तीति = क्रीडन्तीति, आहितुण्डिकाः = व्यालग्राहिणः, “विषवैद्यो जाङ्गुलिको व्यालग्राह्याहितुण्डिकः” इत्यमरः, तेषु । **द्विजिह्वसङ्गृहीतिः** द्विजिह्वानाम् = सर्पाणाम्, सङ्गृहीतिः = सङ्ग्रहणम्, द्विजिह्वानाम् = मिथ्याभाषणशीलानां निन्दकानां वा संग्रहः = सङ्कलनम्, तस्य

प्रजासु नासीत्। निन्दकैः सह कस्यचिदपि सम्बन्धो नासीदित्यर्थः। **क्लृप्तकरग्रहणेषु** - क्लृप्ताः = यथायथं निश्चिताः, ये कराः = राज्यग्राह्यभागाः, तेषां ग्रहणेषु = सङ्कलनेषु, **करच्छेदः** = राज्यग्राह्यभागन्यूनीकरणता आसीत्। वर्षाभावादन्नादीनां न्यूनतायां जातायां करभागोऽपि न्यूनीक्रियते स्म प्रजासु तदानीम्। परम्, करच्छेदः = हस्तकर्तनम्, दण्डरूपेण न जायते स्म तादृशदण्डप्रयोगापराधाभावादिति भावः। मुनीनाम् = यतीनाम्, **नेत्रोत्पाटनम्** - नेत्राणाम् = शिरःस्थितजटानाम्, उत्पाटनम् = कर्तनमुन्मूलनं वा जायते स्म न तु प्रजानां नेत्रयोश्चक्षुषोरुत्पाटनं भवति स्म तादृशदुष्कर्माभावादिति भावः। **पङ्कजानाम्** = कमलानामेव, **द्विजराजविरुद्धता** - द्विजराजस्य = चन्द्रस्य, विरुद्धता = प्रातिकूल्यम्, आसीत्, उदिते चन्द्रमण्डले कमलानि निमीलितानि भवन्ति एष विरोधः। तत्प्रजासु द्विजराजविरुद्धता = श्रेष्ठब्राह्मणानां प्रातिकूल्यं नासीत्। तदानीं कोऽपि श्रेष्ठब्राह्मणप्रातिकूल्यं नाचरति स्मेति भावः। दिग्गजस्य = तन्नाम्नः गजस्य, **सार्वभौमयोगः** सार्वभौम इति रूढस्य = पदस्य, योगः = सम्बन्धः तन्नाम्नः - दिग्गजस्य आसीत्तदुक्तं च "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः॥" इति। न तु एतद्भिन्ने राजनि सर्वभूमेरीश्वरः इत्यर्थे व्युत्पन्नस्य सार्वभौमपदस्य प्रयोग आसीत्।

सुवर्णानाम् = कनकानामेव। **अग्नितुलादिशुद्धिः** - अग्निना = वह्निना, तुलया = तुलाकोट्या च शुद्धिः = वर्णमानज्ञानम्, न तु लोकानाम्, तादृशशुद्धियोग्यापराधाभावात्। मणीनाम् = मुक्तानामेव, **सूचीभेदः** - सूच्या = सीवयन्त्रेण, भेदः = वेधः, सूत्रप्रवेशनाय रन्ध्रविधानार्थम्, अभवत्, न तु लोकानां सूचेः =दृष्टेः, भेदः = विदारणम्, आसीत्, तादृशापराधाभावात्। **युवतिप्रसवे** - युवतीनाम् = तरुणीनाम्, प्रसवे = गर्भमोचनव्यापारे, **शूलभङ्गः** - शूलेन = उदरपीडया, भङ्गः = आमर्दः, कष्टमिति यावत्, अभवत्, न तु तदानीं, शूलेन = अयःकीलेन भङ्गः = वधः, भवति स्म। भारते = महाभारते, **दुःशासनदर्शनम्** - दुःशासनस्य = दुर्योधनानुजस्य, दर्शनम् = ज्ञानमासीत्, प्रजासु दुःशासनस्य = दुष्टशासनस्य दर्शनं नाभवदिति भावः। जलजानाम् = कमलानाम्, करपत्रदारणम् - करैः = सूर्यकिरणैः, पत्राणाम् = किसलयानाम्, दारणम् = विकासनमभवत्, न तु लोकानां करपत्रेण = क्रकचेन, दारणम् = भेदनम्, संभवति स्म। अधुना पूर्वतनेषु राजसु दोषानुद्भाव्य तदीयश्रेष्ठत्वं वर्णयति। **महावराहो** महावराहः - महांश्चासौ वराहः = सूकरः, **गोत्रोद्धरणप्रवृत्तेऽपि**- गाः = पशुरूपजीवान् त्रायते इति गोत्रा = पृथ्वी, तस्याः, उद्धरणाय = समुद्धाराय, प्रवृत्तोऽपि = संलग्नोऽपि, गोत्रोद्दलनम् = पृथ्वीविनाशमकरोत्। यस्या उद्धाराय प्रवृत्तः तस्यैवोद्दलनमिति विरोधः परिहारस्तु गोत्राणाम् = पर्वतानाम्, दलनम् = चूर्णनमकरोदित्यर्थः व्यत्ययेन भवति। **राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश।**- राघवः =रामः, जनकभुवम् - जनकस्य = पितुर्दशरथस्य, भुवम् = पृथ्वीम्, परिहरन् = परित्यजन्, तया जनकभुवा = सीतया सह, वनम् = दण्डकारण्यम्, जगाम = ययौ। यस्याः परित्यागस्तया सह वनगमनमनुचितमिति विरोधः। जनकभुवा सीतया सहेत्यर्थव्यत्ययेन परिहारः। **भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत्** - भरतः = कैकेयीपुत्रः, रामे = स्वकीयाग्रजे, दर्शिता = प्रकटीकृता, भक्तिः = अनुरागो येन तथा भूतः अपि राज्ये = सिंहासने, विरामम् = रामाभावम्, अकरोत् = व्यदधात्, इति विरोधः, विरामम् = विरतिं वैराग्यं वाऽकरोदिति परिहारः। **नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः** - दमयन्त्या = स्वपत्न्या सह, मिलितस्य = सम्प्राप्तस्यापि,

नलस्य = नलाभिधस्य भूपस्य, पुनर्भूपरिग्रहः = पुनरूढास्वीकारोऽभवदिति विरोधः, दमयन्त्या पुनरूढत्वाभावाद्गृह्यते या यथाविधि सा पुनर्भूः । परिहारस्तु पुनर्द्वितीयवारं भूपरिग्रहः = पृथ्वीपरिग्रहणमित्येव रीत्या कर्तव्यः । जातः = सम्पन्नः । **पृथुरपि गोत्रसमुत्सारणविस्तारितभूमण्डलः** - पृथुः = राजविशेषः, गोत्राणाम् = स्ववंशजानाम्, समुत्सारणानन्तरम् = निर्वासनानन्तरम्, विस्तारितम् = विस्तीर्णतां नीतं भूमण्डलं = पृथ्वीमण्डलं येन स तथोक्त आसीत् । स्ववंशजान् निर्वास्य स्वराज्यवर्धनमनुचितमिति विरोधः । परिहारस्तु - गोत्राणाम् = पर्वतानाम्, समुत्सारणेन = विक्षेपेन, विस्तारितम् = प्रविभक्तम्, भूमण्डलं येन स इत्यर्थव्यत्ययेन सुलभः । **इत्थं नास्ति वागवसरः पूर्वतरराजसु** - इत्थमनेन = प्रकारेण, सदोषत्वात्, पूर्वतरराजसु = प्राक्तनभूपालेषु, वागवसरः = स्तुतियोग्यता नास्ति । **स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः** - न्यक्कृतसर्वोर्वीपतिचरितः - न्यक्कृतम् = तिरस्कृतम्, सर्वेषाम् = निखिलानाम्, उर्वीपतीनाम् = भूपतीनाम्, चरितम् = चरित्रम्, येन स तथोक्तः, स = चिन्तामणिनामको देवः, पुनः = भूयः, अन्य एव = वर्णितेभ्योऽन्यगुणविशिष्टः, देवः = राजा, आसीत् ।

**तथा हि स पर्वतः कटकसञ्चारिणो गन्धर्वान् दर्शितशृङ्गोन्नतिः सुखयन् न विरराम** - तथाहि = एवमेव, सः = चिन्तामणिः, पर्वतः - पर्व उत्सवो विद्यते यस्य सः = सर्वदोत्सवप्रवृत्तः, दर्शिता = लोकेषु प्रकाशिता, शृङ्गस्य = स्वप्रभुत्वस्य, उन्नतिः = उच्चैस्त्वं येन सः, जगति प्रकटितस्वकीयोन्नतत्वमित्यर्थः, कटकसञ्चारिणः- कटके = सैन्ये, सञ्चरन्ति = सञ्चलन्ति, तच्छीलास्तान्, गन्धर्वान् = अश्वान्, सुखयन् = आह्लादयन्, न विरराम = विरतो नाभूदिति, पक्षे स प्रसिद्धः पर्वतः = सुमेरुः, दर्शिता = प्रकटिता, श्रृङ्गाणाम् = कूटानाम्, उन्नतिः - औन्नन्त्यम् येन सः कटके = श्रृङ्गा पर्वतनितम्बभागे मध्यभागे वा सञ्चारिणः = भ्रमणशीलान्, गन्धर्वान् = हाहाप्रभृतीन् देवयोनिविशेषान्, “हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्” इत्यमरः, सुखयन् = सुखं प्रापयन्, न विरराम = नैव विश्रान्तः । **स हिमालयो नावश्यायोच्छलितो नो मायाजन्मने हितश्च** - स = राजा, हि = निश्चयेन, मायाः = लक्ष्म्याः, निवासः किञ्च अवश्यायेन = गर्वेण, न उच्छलितः = उद्धतो नाभूत् । मर्यादातिक्रमणं नाकरोदिति भावः । मायाजन्मने = कपटप्रवृत्त्यै हितः = अनुकूलश्च न जातः । मर्यादां नातिलङ्घितवान् । कपटाचारिणां निराकरणं चाकरोदिति भावः । स प्रसिद्धः हिमालयः = हिमवान्, पर्वतस्तु अवश्यायेन = हिमेन, “अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्” इत्यमरः, उच्छलितः = प्रवृद्धोऽस्त्येव । किं वा स उमाया जन्मने = उत्पत्त्यै, हितः = उपयुक्तश्चास्त्येव । पूर्ववाक्यद्वये नास्ति, अपरवाक्यद्वये वास्तीति व्यतिरेकः । **स हि मानी गिरि स्थितो वृषध्वजः** - स हि = निश्चयेन, चिन्तामणिः, गिरि - स्ववाचि, मानी = स्वप्रतिज्ञा-पालकः, धर्मिष्ठश्चासीदिति भावः, स्थितः = आरूढः, वृषः = धर्मो ध्वजे = पताकायाम्, यस्य सः वृषध्वजः तादृशोऽभूत् । स हि, । पक्षे - महद्धिमं = हिमानी हिमसन्ततिरूपः, स गिरिः = पर्वतः कैलासस्तत्र स्थितः, हिमानीगिरिः स्थित इत्येकं पदम् । वृषध्वजः = महादेव आसीत् । **असौ सदागतिरवधूताखिलकान्तारः पावकाग्रसरो नभोगोत्सुकः सुमनोहरश्च** - सताम् = सज्जनानाम्, गतिः = निर्वाहकः । यद्वा सताम् = साधूनाम्, आगतिः = आगमनं यत्र तादृशः । **अवधूताखिलकान्तारः** - अवधूता = दूरीकृताः, कान्ताराः = दुस्तरमार्गाः, दुर्भिक्षा वा येन सः, **पावकाग्रसरः**:- पावयन्ति ये ते पावकाः = पवित्रताहेतवः, तेषामग्रेसरः = मुख्यः, तदुक्तं मनुना -

**अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः ।**
**दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्तु नित्यशः ॥**

नभोगोत्सुकः - भोगेषु = स्त्र्यादिषु सुखेषु, नोत्सुकः = नोत्कण्ठितः । यद्वा नभो गच्छन्तीति नभोगाः = देवाः, तेषु = देवेषु, उत्सुकः = उत्कण्ठितः, तदाराधनपर इत्यर्थः । सुमनोहरः = प्रियदर्शी, अथवा सुमनसः = पण्डितान्, हरति = आकर्षतीति तथाभूतः, विदुषामाह्लादकर्तेत्यर्थः । पक्षे - सदागतिः = वायुः, अवधूतानि = कम्पितानि, अखिलानि = समस्तानि, कान्ताराणि = दुर्गवनानि, "कान्तारं वर्त्म दुर्गमम्" इत्यमरः, येन सः, पावकस्य = अग्नेः अग्रेसरः = सखा । नभोगेषु = आकाशचारिमेघेषु, उत्सुकः, सुमनसः = पुष्पाणि "स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्" इत्यमरः, हरतीति तथा भूतः । **स हि रत्नाकरोऽनहिमयः कथमगाधः समर्यादो नोद्रोकोऽप्यस्य विस्मया सदा हिमकराश्रयोऽमृतमयः सपोतस्तस्याचलो नक्रोधो महानदीनः समुद्रः ।** स = चिन्तामणिः, रत्नानामाकरः = निधिः, अहिः = खलः, तत्स्वभावो न भवतीति अनहिमयः = दुर्जनसंसर्गरहितः । यद् वा अहेः = सर्पस्य, विकारोऽहिमयः तन्न भवतीति अनहिमयः = द्विजिह्वितादोषरहितः । कथम् = केन प्रकारेण, न गाधः, अगाधः = गभीराशयः, निर्लोभो वा गाधनं गाधः = लिप्सा इति व्युत्पत्तेः । समर्यादः- मर्यादया = न्यायपथस्थित्या, सह वर्तत इति समर्यादः = कुलशास्त्रमर्यादापालकः । उद्रोकः, उत्थितः = उत्पन्नः, रोकः = दीप्तिर्यस्य सः, यद्वा उद्रोकः = संवृद्धिः, तथाभूतोऽप्यस्य विस्मयः = गर्वः, न = नास्ति । सदा = सर्वदा, हिमकरः = चन्द्रः, तद्वदाश्रयः = आह्लादकः, यद्वा सदा= सर्वदा, ग्रीष्माद्यृतुष्वपि, हिमकरः= शीतलः, आश्रयो यस्य सः । अमृतमयः = सुधापूर्णः, अमृतस्य विकार इति व्युत्पत्तेः । पोताः = दशवर्षीयाः गजा विद्यन्ते यस्य सः सपोतः, तस्य = चिन्तामणेः, क्रोधः = कोपः, अचलः = इति न, प्रणिपाताच्चलोऽपि, महान् = असाधारणः, अदरिद्रः = सर्वसम्पत्परिपूर्णः, राजलक्षणलक्षितो वा आसीत् । समुद्रपक्षे च - रत्नानाम् = मथनाज्जातानां तत्तद्विशेषचतुर्दशरत्नानां मौक्तिकादीनाम्, आकरः = निधिः, न विद्यते अहिः = शैत्यम्, यस्मिन् सोऽहिमः = सूर्यस्तेन याति शोषमुपगच्छतीति अहिमयस्तादृशो न भवतीति अनहिमयः । कासारादिव रविसम्पर्केण शोषं नोपगच्छत्यगाधत्वादिति भावः । समर्यादः = वेलानतिक्रमणशीलः किञ्च सदा अहिमकराणामाश्रयः - अहीनाम् = सर्पाणाम्, मकराणाम् = मत्स्यानाञ्च आश्रयः, यद् वा हिमकरस्य = चन्द्रस्याश्रयः समुद्रोत्पन्नत्वात् चन्द्रस्य, अमृतमयः = जलमयः, सपोतः सयानपात्रः । यस्य = समुद्रस्य, अगाधः अचलः = मैनाकः पर्वतः, नक्राः = कुम्भीराश्च वर्तन्ते महतीनां नदीनाम् = सरित्प्रवराणाम्, ईनः = स्वामी, महानदीनः । **स चन्द्र इव क्षणदानन्दकरः कुमुदबन्धुः सकलकलाकुलगृहं नताराातिबलः** - स = चिन्तामणिर्देवः चन्द्र इव = शशीव, क्षणदानन्दकरः - क्षणम् = यात्रादौ शुभमुहूर्तं ददतीति क्षणदाः = गणकाः = तेषामानन्दकरः = हर्षप्रदः । यद्वा क्षणम् = उत्सवम्, ददातीति क्षणदः स चासावानन्दकरश्च क्षणदेन = जलेन, आनन्दकरः = मरुदेशेऽपि वापीकूपकुल्यादिनिर्माणेन तद्देशवासिनामानन्दकरः । कुमुदवनबन्धुः -मुदा = हर्षेण, अवनम् = प्रजारक्षणम् इति मुदवनम्, कोः = पृथिव्याः, मुदवनम् तेन बन्धुरिव बन्धुरित्यर्थः । सकलकलाकुलगृहम् - सकलानाम् = समस्तानाम्, चतुःषष्टिकलानाम् = गीतवाद्यनृत्यादीनाम्, कुलगृहम् = आश्रयः । नतारातिबलः- नतम् = प्रणिपातेन

नम्रीभूतम्, अरातिबलम् = शत्रुसैन्यम्, यस्य सः। चन्द्रपक्षे - क्षणदायाः = रात्रेः, "निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा" इत्यमरः, आनन्दकरः = आह्लादकारकः, कुमुदवनस्य = कैरवसमूहस्य, "सिते कुमुदकैरवे" इत्यमरः, बन्धुः = उपकारकः, विकासकरणात्। किञ्च सकलानाम् = षोडशसङ्ख्यकानां, चतुष्षष्ट्या वा कलानाम्, आश्रयः = आधारः। न = नहि, तारा = तारकाः, नक्षत्राणि = ऋक्षाणि, अतिबलाः = प्रबलाः, यस्मात्तादृशः। **मित्रोदयहेतुः काञ्चनशोभां विभ्रदचलाधिकलक्ष्मीः सुमेरुरिव** - स चिन्तामणिः, सुमेरुः = सुमेरुपर्वत इव, मित्रोदयहेतुः- मित्राणाम् = सुहृदाम्, "अथ मित्रं सखा सुहृत्" इत्यमरः, उदयहेतुः = समुन्नतिकारणम्। काञ्चनानाम् = सुवर्णानाम्, अनिर्वचनीयाम् = अव्याख्येयाम्, शोभाम् = सौन्दर्यम्, दधानः = धारयन्, अचला = स्थिरा अधिकाः = अन्येभ्यो विशिष्टा, लक्ष्मीः यस्य सः। सुमेरुपक्षे - मित्रस्य = सूर्यस्य, उदये = आविर्भावे, हेतुः = निमित्तम्, काञ्चनस्य = सुवर्णस्य, शोभां दधानः। अचलेभ्यः = पर्वतेभ्यः, अधिकाः = अत्यधिका, लक्ष्मीः = शोभा यस्य सः, तादृश आसीदिति शेषः।

## पाठसारः

चिन्तामणिशासनकाले राज्ये छलछद्मादिव्यवहारः नास्तिकता जनपीडा लोकापवादाः दुर्जनसंसर्गः करच्छेदादयो दण्डप्रयोगाश्च न कुत्रापि द्रष्टुं शक्यन्ते स्म। ते तु विषयान्तरेष्वेव केवलं द्रष्टुमवाप्यन्ते स्म। तस्य शासनसमये सूचीभेदः, शूलप्रयोगः, दुःशासनदर्शनम्, नेत्रोत्पाटनञ्चेत्यादीनां दण्डविधानानामावश्यकतैव न भवति स्म। तस्य शासने रामभरतादीनां शासकानामिव व्यवहारा द्रष्टुं पार्यन्ते स्म। राज्ये चिन्तामणिं विलोक्य जना तत्तद्दोषमुक्तं हिमालयं वृषध्वजं पावकं रत्नाकरं चन्द्रं सुमेरुञ्च स्मरन्ति स्म। चिन्तामणिर्वृषध्वजहिमालयादिभ्योऽपि विशेष आसीत्।

# अभ्यासः

१. **अधोनिर्दिष्टप्रश्नानामुत्तराणि लिखत**

(क) चिन्तामणिशासने नास्तिकता कुत्र आसीत् ?

(ख) चिन्तामणिशासने खलसंयोगः कुत्र आसीत् ?

(ग) चिन्तामणिशासने दुःशासनदर्शनं कुत्र भवति स्म ?

(घ) चिन्तामणिः महावराह इव कथं गोत्रोद्धरणप्रवृत्तोऽपि गोत्रोद्दलनमकरोत् ?

(ङ) चिन्तामणी राघव इव जनकभुवं परिहरन्नपि कथं जनकभुवा सह वनं विवेश ?

(च) चिन्तामणिः कथं सुमेरुरिव विलोक्यते स्म ?

(ज) चिन्तामणिः कथं रत्नाकर इव भूमण्डलं शास्ति स्म ?

२. **अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत**

यत्र च शासति धरणिमण्डलं छलनिग्रहप्रयोगो वादेषु नास्तिकता चार्वाकेषु कण्टकयोगो नियोगेषु परीवादो वीणासु खलसंयोगः शालिषु ।

३. **अधोनिर्दिष्टगद्यखण्डस्य तात्पर्यं प्रकाशयत**

राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश। भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत् । नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः । पृथुरपि गोत्रसमुत्सारणविस्तारितभूमण्डलः ।

४. **अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत**

असौ सदागतिरवधूताखिलकान्तारः पावकाग्रसरो नभोगोत्सुकः सुमनोहरश्च । स रत्नाकरोऽनहिमयो कथमगाधः समर्यादो नोद्रोकोऽप्यस्य विस्मया सदा हिमकराश्रयोऽमृतमयः सपोतस्तस्याचलो नक्रोधो महानदीनः समुद्रः ।

५. **अधोनिर्दिष्टानां पदानां वाक्येषु प्रयोगं कुरुत**

करच्छेदः, पङ्कजानाम्, सूचीभेदः, समर्यादः, कुमुदबन्धुः, सुमेरुः ।

६. **अधोनिर्दिष्टानां शब्दानां पर्यायान् निर्दिशत**

सुवर्णानाम्, भारते, जनकभुवा, विरराम, मानी ।

७. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

द्विजिह्वसङ्गृहीतिः, गोत्रसमुत्सारणविस्तारितभूमण्डलः, न्यक्कृतसर्वोर्वीपतिचरितः, क्षणदानन्दकरः, सकलकलाकुलगृहम्

८. **दशाधिकाभिः पङ्क्तिभिः राज्ञश्चिन्तामणेः शासनपद्धतिं वर्णयत ।**

९. **चिन्तामणेः शासनवर्णनमिति पाठस्य सारं प्रकाशयत ।**

# चिन्तामणेः पुत्रादिवर्णनम्

**यस्य च रिपुवर्गः सदा पार्थोऽपि न महाभारतरणयोग्यः, भीष्मोऽप्यशान्तनवेहितः, सानुचरोऽपि न गोत्रभूषितः । अपि च त्रिशङ्कुरिव नक्षत्रपक्षस्खलितः, शङ्करोऽपि न विषादी, पावकोऽपि न कृष्णवर्त्मा, आश्रयाशोऽपि न दहनः, नान्तक इवाकस्मादपहृतजीवनः, न राहुरिव मित्रमण्डलग्रहणविवर्द्धितरुचिः, न नल इव कलिविघटितः, न चक्रीव शृगालवधस्तुतिसमुल्लसितः, नन्दगोप इव यशोदयाऽऽश्रितः, जरासन्ध इव घटितसन्धिविग्रहः, भार्गव इव सदानभोगः, दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च, दिलीप इव सुदक्षिणानुरक्तो रक्षितगुश्च, राम इव जनितकुशलवयोरूपोच्छ्रायः । तस्य च पारिजात इवाश्रितनन्दनः, हिमालय इव जनितशिवः, मन्दर इव भोगिभोगाङ्कितः, कैलास इव महेश्वरोपभुक्तकोटिः, मधुरिव नानारामानन्दकरः, क्षीरोदमथनोद्यतमन्दर इव मुखरितभुवनः, रागरज्जुरिवोल्लासितरतिः, ईशानभूतिसञ्चय इव सन्ध्योच्छलितः, शरन्मेघ इवावदातहृदयो विष्णुपदावलम्बी च, पार्थ इव समरसाहसोचितः, कंस इव कुवलयापीडभूषितः, तार्क्ष्य इव विनतानन्दकरः सुमुखनन्दनश्च, विष्णुरिव क्रोडीकृतसुतनुः, शान्तनव इव स्ववशस्थापितकालधर्मः, कौरवव्यूह इव सुशर्माधिष्ठितः, जलधरसमय इव विमलतरवारिधारात्रासितराजमण्डलः, सुबाहुरपि रामानन्दी, समदृष्टिरपि महेश्वरः, मुक्तामयोऽप्यतरलमध्यः, वंशप्रदीपोऽप्यक्षतदशस्तनयोऽभूत्कन्दर्पकेतुर्नाम ।**

**व्याख्याः - यस्य च रिपुवर्गः सदा पार्थोऽपि न महाभारतरणयोग्यः,** यस्य = चिन्तामणिदेवस्य, रिपुवर्गः = शत्रुसमूहः, "रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः" इत्यमरः, पार्थः = अर्जुनोऽपि सन्, महाभारतरणयोग्यः - महाभारते = महाभारतयुद्धे, यद्रणम् = युद्धम्, तस्य योग्यः = समुचितः, न = नाभवत् । अर्जुनस्य कथं महाभारतरणस्य कृते अयोग्यत्वम् इति विरोधः, यस्य रिपुवर्गः महतो भारस्य = सैन्यसञ्चालनादेर्महाकार्यस्य, तरणे = धारणे सम्पादने योग्योऽपि न, अत एव सदा सर्वस्मिन्काले अपार्थः अपगतः = विनष्टः, अर्थः = प्रयोजनम्, औचित्यं वा, यस्य सः तादृशः इत्यर्थकरणेन परिहारः । **भीष्मोऽप्यशान्तनवेहितः,** यः भीष्मः = देवव्रतोऽपि, शान्तनुपुत्रोऽपि, अशान्तनवे = पितृभिन्नाय, हितः = हितकारकः, पित्रे न हितः । पुत्रस्य पितृविरोधित्वमनुचितमिति विरोधः । यः भीष्मोऽपि = राजगुणैर्भयानकोऽपि, अशान्तम् = अविरतम्, नवम् = स्तुत्यम्, नवम् = नूतनम्, ईहितम् = चेष्टितं यस्य स इत्यर्थकरणेन विरोधपरिहारः । शन्तनुवाचको दीर्घादिशान्तनुशब्दोऽप्यस्ति । **सानुचरोऽपि न गोत्रभूषितः-** सानुचरोऽपीति - सानुषु = पर्वतशिखरेषु, चरतीति सानुचरः, तथाभूतोऽपि न गोत्रस्य = पर्वतस्य, भुवि = भूमौ, उषितः = स्थितः, इति विरोधः, अनुचरैः = सेवकैः सहितः, सानुचरः, गोत्रैः = गोत्रजैः, भूषितः = अलङ्कृतः, न = नहीति कृते तत्परिहारः । **अपि च त्रिशङ्कुरिव नक्षत्रपक्षस्खलितः,**

अपि च = एवमेव, त्रिशङ्कुः = राजविशेषः, स इव, क्षत्रपक्षात् = क्षत्रियधर्मात्, न स्खलितः = अविच्युतः, इति विरोधः त्रिशङ्कोः क्षात्रधर्मत्यागादिति । त्रिशङ्कुः = प्रभावमन्त्रोत्साहादित्रिशक्तिसमन्वितः, अयं क्षत्रियधर्मात् न स्खलितः = चलितः, त्रिशङ्कुपक्षे - त्रिशङ्कुः = एतन्नामको राजा, नक्षत्रपथात् = आकाशात्, स्खलितः = पतितः, इति करणे विरोधपरिहारः । **शङ्करोऽपि न विषादी**, शङ्करः = महादेव अपि, न विषादी = न विषभक्षकः, इति विरोधः, शङ्करस्य समुद्रोत्पन्नहालाहलविषभक्षणादिति । राजपक्षे शम् = लोककल्याणं करोतीति शङ्करः, अपि अयं विषादी = दुःखितः (विषादः अस्य अस्तीति विग्रहलभ्यः अर्थः) न = नाभूदित्यर्थकरणे तत्परिहारः । **पावकोऽपि न कृष्णवर्त्मा** - पावकः = अनलोऽपि, "कृशानुः पावकोऽनलः" इत्यमरः, न कृष्णवर्त्मा = न अग्निः, इति विरोधः । पावकः = अन्येषां पावयिता अपि, न = नहि, कृष्णम् = कलुषितम्, पापमयं वा वर्त्म = आधारपद्धतिर्यस्य सः, आचारपरिपालकः इत्यर्थकरणेन परिहारः । **आश्रयाशोऽपि न दहनः**, आश्रयाशः, आश्रयः = काष्ठभूतं स्वाधिष्ठानम्, तद् अश्नातीति आश्रयाशः = काष्ठदाहकः वह्निरपि, "आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः" इत्यमरः, न दहनः = न दाहकः, इति विरोधः अग्नेर्विरुद्धगुणाविष्कारात् । आश्रयाणाम् = स्वाश्रये स्थितानाम्, स्वोपजीविनामित्यर्थः, आशा = आकाङ्क्षा, यस्मिंस्तादृशः सन् न दहनः = न सन्तापजनकः, इति विरोधपरिहारः । **नान्तक इवाकस्मादपहृतजीवनः**- अन्तकः = यमः, इव अकस्मात् = सहसा, अपहृतम् = गृहीतम्, जीवनम् = जीविका, येन सः तथा अयं न । अन्तकपक्षे अकस्मात् = सहसा, अपहृतम् = कारणं विनैव विनाशितं जीवितं येन सः । **न राहुरिव मित्रमण्डलग्रहणविवर्द्धितरुचिः** - मित्राणाम् = स्वसुहृदाम्, मण्डलस्य = राष्ट्रस्य, ग्रहणे = स्वायत्तीकरणे, विवर्द्धिता = विशेषेण वर्द्धिता रुचिः = इच्छा, येन सः, तादृशोऽयं देवो नाभूत् । राहुस्तु मित्रमण्डलस्य = सूर्यमण्डलस्य, ग्रहणे = ग्रसने, विवर्द्धिता रुचिः = दीप्तिर्यस्य तादृशोऽस्त्येव । **न नल इव कलिविघटितः** - कलिना= कलहेन कलियुगेन वा विघटितः = बन्धुभिर्विश्लेषितो नल इव = नलनामको नरपतिरिव, अयं न = न आसीत्, यथा नलः कलियुगेन विघटित आसीदिति तथा नायमिति भावः । **न चक्रीव शृगालवधस्तुतिसमुल्लसितः** - चक्री = विष्णुः, इव शृगालवधेन = शृगालमारणेन, स्तुत्या = प्रशंसावचनेन, समुल्लसितः = दृप्तः, अयं न = नाभूत् । भीतवधेनायं नात्मानं बहुमन्यते किन्तु शूरवीराणां वधेन सन्तुष्टो भवति । विष्णुस्तु शृगालनामकराजविशेषस्य वधेन स्तुत्या जनैः सम्प्रीणित आसीदिति पौराणिकी कथा ऊह्या । **नन्दगोप इव यशोदयाऽऽश्रितः**, यशसा = कीर्त्या, दयया च = परदुःखप्रहाणेच्छया च आश्रितः । नन्दपक्षे - यशोदया = निजभार्यया, आश्रितो नन्दगोप इव । **जरासन्ध इव घटितसन्धिविग्रहः** - घटितः = विहितः, सन्धिः = सन्धानम्, विग्रहः = युद्धं राजभिर्येन सह तथाभूतोऽयम् । पक्षे - घटितः = विहितः, शरीरशकलद्वयस्य सन्धिः = संयोजनम्, यस्तादृशो विग्रहः शरीरं यस्य सः तादृशः जरासन्ध इव । तदुक्तम्-

**अन्यस्यामपि भार्यायां शकले द्वे बृहद्रथात् ।**
**ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धितः ॥**
**जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत्सुतः ॥**

**भार्गव इव सदानभोगः** - भार्गवः = शुक्रः इव, राजपक्षे - दानेन = दीनविप्रादिभ्यो वितरणेन, भोगेन = सर्वसुखानुभवेन च सहितः । अन्यत्र सदा = सर्वदा, नभः = आकाशस्तेन गच्छतीति तेन

आकाशगामिना = गगनचारिणा । **दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च** - दशरथः = अयोध्याधिपो राजविशेषः, स इव सुमित्रैः = सुहृद्भिः, उपेतः = अन्वितः, सुमन्त्रेण = गुप्तमन्त्रेण, रहसि एकान्ते कर्तव्याधारेण अधिष्ठितः = आश्रितः । पक्षे सुमित्रया = लक्ष्मणजनन्या, उपेतः = युक्तः, सुमन्त्रेण = एतन्नामकसचिवेन, अधिष्ठितः = आश्रितः । **दिलीप इव सुदक्षिणानुरक्तो रक्षितगुश्च** - सुदक्षिणेषु = उदारान्तःकरणेषु, अनुरक्तः = प्रसन्नः, रक्षिता = पालिता, गौः = पृथ्वी, रक्षिताः = पालिताः, गावः = धेनवः, वा येन सः, तादृशः । पक्षे सुमित्रया = लक्ष्मणजनन्या स्वभार्यया, उपेतः = युक्तः, सुदक्षिणासु = दक्षिणाद्रव्यप्रदानेषु वा अनुरक्तः = अनुरागशीलः, अन्यत्र सुदक्षिणायाम् = एतन्नामकस्वभार्यायाम्, अनुरक्तः = प्रेमबद्धः, रक्षिता = सुरक्षिता, सिंहाक्रमणादिभ्य इति भावः, गौः = नन्दिनी, कामधेनुसूतेत्यर्थः । **राम इव जनितकुशलवयोरूपोच्छ्रायः** - रामः = दाशरथिरिव, जनितः = सम्पादितः, कुशलः = पर्याप्तः, वयसः = यौवनादेः, रूपस्य = सौन्दर्यस्य, उच्छ्रायः = औन्नत्यं येन सः । अथवा जनितः = सम्पादितः, वयसाम् = पक्षिणाम्, रूपाणाम् = पशूनाम्, च उच्छ्रायः = औन्नत्यम्, येन सः । रामपक्षे च - जनितः = समुत्पादितः, कुशलवयोः = एतन्नामकस्वापत्ययोः, रूपस्य = सौन्दर्यस्य उच्छ्रायः = औन्नत्यम्, येन सः । "कारणगुणाः कार्यगुणानालभन्ते" इति न्यायेनापत्ययोरपि सन्निवेशितस्वसौन्दर्य इति भावः । यथोक्तं कालिदासेन रघुवंशे -

**रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।**
**न कारणात् स्वाद् विभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥**

**तस्य च पारिजात इवाश्रितनन्दनः** - तस्य = चिन्तामणेश्च, आश्रितान् = स्वशरणागतान् स्वोपजीविनो वा नन्दयतीति नन्दनः = सन्तोषकः, पक्षे आश्रितम् = अधिष्ठितम्, नन्दनम् = इन्द्रवनम्, येन सः तथाभूतः पारिजातः = मन्दारः, "मन्दारः पारिजातकः" इत्यमरः, इव = यथा । **हिमालय इव जनितशिवः** - जनितः = विहितम्, शिवम् = कल्याणम्, प्रजानामिति शेषः, येन सः । हिमालयपक्षे - च जनिता = उत्पादिता, शिवा = पार्वती, येन सः, हिमालय इव = पर्वतराज इव । **मन्दर इव भोगिभोगाङ्कितः** - भोगिनाम् = विलासिनाम्, भोगैः = चिह्नैः, अङ्कितः = युक्तः । पक्षे च भोगिनः = समुद्रमथनकाले वेष्टितस्य वासुकेः, भोगेन = शरीरेण, अङ्कितः = शरीरसम्पर्करेखया चिह्नितः, मन्दरः = मन्दराचल इव । **कैलास इव महेश्वरोपभुक्तकोटिः** - महेश्वरैः = महैश्वर्यसम्पन्नैः, उपभुक्ताः = स्वभोगार्थमुन्नीताः, कोटयः = असङ्ख्यधनानि यस्य सः, पक्षे - महेश्वरेण = सदाशिवेन, उपभुक्ता = स्वनिवासार्थमनुष्ठिता, कोटिः = अग्रभागो यस्य सः तादृशः, कैलासः = कैलासपर्वत इव, **मधुरिव नानारामानन्दकरः** - नानानाम् = अनेकासाम्, रामाणाम् = प्रमदानाम्, "सुन्दरी रमणी रामा कोपना सैव भामिनी " इत्यमरः, आनन्दम् = सुखम्, करोतीति तादृशः, अनेकयोषित्सुखप्रद इति भावः । पक्षे - नानारामेषु = अनेकोपवनेषु, आनन्दकरः = सुखजनकः । अथवा नानारामेषु तत्तत्पुष्पविकासादिना आनन्दकरः = शोभाजनकः । **क्षीरोदमथनोद्यतमन्दर इव मुखरितभुवनः**, क्षीरोदस्य = क्षीरसमुद्रस्य, मथनाय = आलोडनाय, उद्यतः = उत्सुकः, मन्दरः = मन्दरपर्वत इव, मुखरितम् = स्वजयघोषेण अप्रतिहतशब्दायमानं कृतम, भुवनम् = लोको येन सः अप्रतिहतयशाः । पक्षे- मुखरितम् = स्वभ्रमणजन्यशब्देन चञ्चलीकृतम्,

भुवनम् = जलम्, येन सः । **रागरज्जुरिवोल्लासितरतिः** - रागः = प्रजानुरागोः, रज्जुरिव यस्य सः । उल्लसिता = वर्द्धिता, रतिः = प्रजानुरागो येन सः, अथवा उल्लासिता देवेषु गुरुषु रतिः = भक्तिः येन सः तादृशः । कामदेवपक्षे च - रागो रज्जुरिव यस्य सः । नायिकानायकयोरन्योन्यासङ्गबद्धत्वात् उल्लासिता = प्रहृष्टं नीता, रतिः = स्वपत्नी येन सः । **ईशानभूतिसञ्चय इव सन्ध्योच्छलितः** - ईशानस्य = महेश्वरस्य, भूतेः = ऐश्वर्यस्य, "विभूतिर्भूतिरैश्वर्यम्" इत्यमरः, सञ्चयः = राशिः, इव सम्यग् ध्यायतीति सन्ध्यः = विचारवान्, तेन अच्छलितः = अप्रतिहतः, पक्षे ईशानस्य = महेश्वरस्य, भूतेः = भस्मनः, सञ्चयः = राशिः, सन्ध्यासु = सायङ्कालेषु, अच्छलितः = प्रसन्नः । **शरन्मेघ इवावदातहृदयो विष्णुपदावलम्बी च** - शरन्मेघः = शारदमेघः इव, अवदातम् = विशुद्धं निष्कल्मषम्, हृदयम् = अन्तःकरणम्, यस्य सः, किञ्च विष्णुपदम् = हरिचरणम्, अवलम्बते = आश्रयते तथाभूतः । महान् हरिभक्त इत्यर्थः । पक्षे - अवदातम् = शुभ्रम्, हृदयम् = अन्तः प्रदेशो यस्य सः । विष्णुपदम् = आकाशम्, अवलम्बते तच्छीलः = आकाशस्थितिशीलः । **पार्थ इव समरसाहसोचितः** - पार्थः = अर्जुन इव, समरे = रणप्राङ्गणे, युद्धे वा, यत्साहसम् = शौर्यम्, तत्रोचितः = योग्यः । पक्षद्वयेऽपि समानः । **कंस इव कुवलयापीडभूषितः** - कोः = पृथिव्याः, वलयमेव आपीडः = शिरोभूषणं तेन भूषितः अलङ्कृतः, पक्षे च - कुवलयापीडेन = एतन्नामकेन प्रसिद्धगजेन भूषितः = युक्तः, कंस इव = कृष्णमातुल इव । **तार्क्ष्य इव विनतानन्दकरः सुमुखनन्दनश्च** - तार्क्ष्यः = गरुड इव, "गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः" इत्यमरः, विनतानाम् = विनयशीलानाम्, नम्राणां वा आनन्दकरः = सुखकरः, पक्षे - विनतायाः = एतन्नाम्न्याः स्वमातुः, आनन्दकरः = प्रीतिवर्धनः । सुमुखान् = पण्डितान्, आनन्दयति = प्रीणयतीति तादृशश्च । पक्षे - सुमुखः = स्मितपूर्वाभिभाषी, नन्दनः = एतन्नामा च पुत्रो यस्य सः । **विष्णुरिव क्रोडीकृतसुतनुः**, क्रोडीकृता = स्वाङ्के स्थापिता, आश्लेषिता आलिङ्गिता वा सुतनवः = शोभनावयवाः सुन्दर्यः येन सः । पक्षे सूकररूपम् = वराहरूपम्, आस्थिता = स्थापिता, शोभना = मनोरमा, तनुः = शरीरं येन सः तादृशः, विष्णुरिव = नारायण इव । **शान्तनव इव स्ववशस्थापितकालधर्मः** - शन्तनोरपत्यं पुमान् इति शान्तनवः = भीष्मः इव, स्ववशे = स्वाधीनतया, स्थापितः = अधिकृतः, कालधर्मः = कालकर्म, येन सः,

**कालो वा कारणं राज्ञो राजा वा कालकारणम् ।**
**इति ते संशयो मा भूद् राजा कालस्य कारणम् ॥**

इति विदुलोपाख्याने, राजा धर्मस्य कारणमिति स्मृतेश्च । पक्षे - स्ववशे स्थापितः, कालधर्मः= मृत्युर्येन सः तथोक्तः । पितृप्रसादाद् भीष्मस्येच्छामृत्युताप्राप्तेः । **कौरवव्यूह इव सुशर्माधिष्ठितः** - कौरवाणाम् = सुयोधनादीनामिव, व्यूहः = सेनाविन्यासरचना इव, सुशोभनं शर्म सुशर्म = सुसुखम्, तेन अधिष्ठितः = समन्वितः । पक्षे - सुशर्मणा = त्रिगर्तदेशीयराजेन अधिष्ठितः = स्थितः, सुरक्षितो वा । **जलधरसमय इव विमलतरवारिधारात्रासितराजमण्डलः**, जलधरसमयः = वर्षाकाल इव, विमला = स्वच्छा, तरवारेः = खड्गस्य, धारा = अग्रभागः, तेन सन्त्रासितम् = भीषितम्, राजहंसानाम् = उत्तमोत्तमनृपाणाम्, मण्डलम् = समूहो येन सः । एतेन एकाकिना तेन नृपेण प्रत्यर्थिनृपाणां समूहो धर्षित इति ध्वनितम् । अत्र राजानो हंसा इवेति "उपमितं व्याघ्रादिभि"रित्यनेन समासः । पक्षे - विमलतराभिः = अतिशयेन स्वच्छाभिः,

वारिधाराभिः = जलम्पातैः सन्त्रासितम् = त्रासितम्, राजहंसानाम् = लोहितचञ्चुचरणानां श्रेष्ठहंसानाम्, मण्डलम् = समूहो येन सः । अत्र हंसानां राजानो राजहंसाः राजदन्तादित्वात् हंसशब्दस्य परनिपातः । वर्षासमये भीता हंसा मानसं प्रविशन्तीति कविप्रसिद्धिः । **सुबाहुरपि रामानन्दी** - सुबाहुः = सुबाहुनामा राक्षसः विश्वामित्राध्वरे रामेण पातितः सः, रामानन्दी, राममानन्दयतीति विरोधः । शोभनौ बाहू = सुन्दरौ भुजौ यस्य सः सुबाहुः, रामाः = सुन्दर्यः, ताः आनन्दयतीति अर्थव्यत्ययेन तत्परिहारः । **समदृष्टिरपि महेश्वरः** - समाः = समसङ्ख्याका, दृष्टयः = लोचनानि यस्य सः तादृशः, महेश्वरः = महादेव इति विरोधः शिवस्य त्रिनेत्रत्वादिति । समाः = सर्वत्र तुल्या, पक्षपातरहिता वा, दृष्टिः = दर्शनं यस्य सः तादृशः । अथवा मया सहिता समा = सलक्ष्मीका दृष्टिः = लोचनं यस्य इति परिहारः । **मुक्तामयोऽप्यतरलमध्यः** -मुक्ताभिः = मौक्तिकैः प्रचुरः =मुक्तामयः, प्राचुर्यार्थे मयट् मुक्ताहार इत्यर्थः, न तरलः अतरलः = अचञ्चलः मध्ये भवति सोऽतरलमध्यः, ननु मुक्ताहारस्य अतरलमध्यत्वं विरुद्धम्, मुक्तः = परित्यक्तः, आमयः = रोगो येन सः नीरोग इत्यर्थः । किञ्च अतरलम् = अचञ्चलम्, मध्यम् = हृदयं यस्य स तथोक्तः स्थिरबुद्धिरिति यावत् । अथवा तरलाः = चञ्चलाः, अस्थिराः बुद्धयो मध्या = नीचाश्च न विद्यन्ते यस्य सः इत्यर्थेन परिहारः । उत्तमाः स्थिरबुद्धयोऽस्य सहचरा इति भावः । **वंशप्रदीपोऽप्यक्षतदशस्तनयोऽभूत्कन्दर्पकेतुर्नाम** - वंशे = वेणौ, प्रदीपः = उद्दीप्तः अपि, अक्षता = अदग्धा दशवर्तिर्यस्य तादृशः । नन्वयं विरोधः प्रदीपस्य दग्धवर्त्तित्वादिति । वंशस्य = स्वकुलस्य, प्रदीपः, स्वकर्मभिस्तत्प्रकाशकत्वादित्यर्थेन परिहारः । अस्मिन् पक्षे - अक्षता = सुशोभना, दशा = अवस्थाजीविकाद्यागमविधिर्यस्येत्यर्थः । एतादृशः कन्दर्पकेतुर्नाम = कन्दर्पकेतुरितिनामधेयः, तनयः = पुत्रः, अभूदिति सम्बन्धः ।

## पाठसारः

यद्यपि चिन्तामणेः शत्रुसमूहाः पार्थभीष्मसदृशाः सानुचरा आसन्, तथाप्यनेन सह योद्धुं न शक्नुवन्ति स्म । अयं यम-शङ्कर-पावकसदृशः सन्नपि विषादिता-कृष्णवर्त्मतादिदुर्गुणै रहित आसीत् । असौ स्वकीयैस्तत्तद्गुणैः कृष्ण-जरासन्ध-भार्गव-दशरथ-दिलीप-रामादिभिस्सह साम्यमावहति स्म । अपि च तस्य राज्ञः स्वकीयैरनेकैर्विशिष्टगुणैः पारिजात-हिमालय-मन्दराचल-कैलास-मधुमासादिभिः सार्धं तुलनीयः कन्दर्पकेतुनामकः पुत्रो बभूव । असौ कन्दर्पकेतुरनेकवनितानन्दकरः मुखरितभुवनमण्डलः महादेवविभूतिसञ्चयसदृशः शरन्मेघविमलहृदयः पार्थ इव पराक्रमी चासीत् । वनिताजनानन्दकरः, महैश्वर्ययुक्तः, समानदृष्टिश्चायं नृपकिशोरः कदाचन कुवलयापीडयुक्तः कंस इव, विनतानन्दकरो गरुड इव क्रोडीकृतनिजतनुर्विष्णुरिव सुशर्माधिष्ठितः कौरवव्यूह इव भीषणवारिधारायुक्तो जलधरकाल इव च विलोक्यते स्म ।

## अभ्यासः

### १. अधोनिर्दिष्टप्रश्नानामुत्तराणि लिखत

(क) कस्य रिपुवर्गो न महाभारतरणयोग्यः ?

(ख) चिन्तामणेः शत्रवः कीदृशाः आसन् ?

(ग) चिन्तामणिः कथं दिलीपवंश इव विलोक्यते स्म ?

(घ) चिन्तामणेः पुत्रः क आसीत् ?

(ङ) चिन्तामणेः पुत्रः कीदृश आसीत् ?

(च) चिन्तामणेः शत्रवः कथं सानुचरा अपि न गोत्रभूषिता आसन् ?

(छ) चिन्तामणिः कथं जरासन्ध इव विलोक्यते स्म ?

### २. अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत

नन्दगोप इव यशोदयाऽऽश्रितः, जरासन्ध इव घटितसन्धिविग्रहः, भार्गव इव सदानभोगः, दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च, दिलीप इव सुदक्षिणानुरक्तो रक्षितगुश्च, राम इव जनितकुशलवयोरूपोच्छ्रायः ।

### ३. अधोनिर्दिष्टगद्यखण्डस्य तात्पर्यं प्रकाशयत

यस्य च रिपुवर्गः सदा पार्थोऽपि न महाभारतरणयोग्यः, भीष्मोऽप्यशान्तनवेहितः, सानुचरोऽपि न गोत्रभूषितः ।

### ४. अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत

अपि च त्रिशङ्कुरिव नक्षत्रपक्षस्खलितः, शङ्करोऽपि न विषादी, पावकोऽपि न कृष्णवर्त्मा, आश्रयाशोऽपि न दहनः, नान्तक इवाकस्मादपहृतजीवनः, न राहुरिव मित्रमण्डलग्रहणविवर्द्धितरुचिः, न नल इव कलिविघटितः, न चक्रीव शृगालवधस्तुति- समुल्लसितः, नन्दगोप इव यशोदयाऽऽश्रितः, जरासन्ध इव घटितसन्धिविग्रहः, भार्गव इव सदानभोगः ।

### ५. अधोनिर्दिष्टानां पदानां वाक्येषु प्रयोगं कुरुत

रिपुवर्गः, विषादी, दहनः, नलः, वंशप्रदीपः ।

६. **अधोनिर्दिष्टानां शब्दानां पर्यायान् निर्दिशत**

भार्गवः, उच्छ्रायः, पारिजातः, शरन्मेघः, कौरवव्यूहः ।

७. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

घटितसन्धिविग्रहः, सुदक्षिणानुरक्तः, जनितकुशलवयोरूपोच्छ्रायः, क्षीरोदमथनोद्यतमन्दरः, विमलतरवारिधारात्रासितराजमण्डलः ।

८. **दशाधिकाभिः पङ्क्तिभिश्चिन्तामणिं वर्णयत ।**

९. **दशाधिकैर्वाक्यैः कन्दर्पकेतुं वर्णयत ।**

१०. **चिन्तामणेः शत्रुपुत्रादिवर्णनमिति पाठस्य सारं प्रकाशयत ।**

## अष्टमः पाठः

# कन्दर्पकेतुवर्णनम्

**येन च चन्द्रेणेव सकलकलाकुलगृहेण शर्वरीतिहारिणा दलितकैरवेण प्रसाधिताशेन विलोकिता जलधय इव समुल्लसितगोत्राः सुदूरविवर्द्धितजीवनाः प्रसन्नसत्त्वाः सन्तः परामृद्धिमवापुः । यस्य च जनितानिरूद्धलीलस्य रतिप्रियस्य, कुसुमशरासनस्य मकरकेतोरिव दर्शनेन, वनिताजनस्य हृदयमुल्ललास । यस्मै चानुगतदक्षिणसदागतये, नेत्रश्रुतिसुखदाय, कोमलकोकिलरुताय, विकासितपल्लवाय कृतकान्तारतरङ्गाय सुरभिसुमनोऽभिरामाय, सर्वजनसुलभपद्माय विस्तृतकनकसम्पदे अतिक्रान्तदमनकाय वसन्तायेव उपवनलता इवोत्कलिकासहस्रसङ्कुलाः, भ्रमरसङ्गताः, प्रवालहारिण्यो विलसद्वयसस्तरुण्यः स्पृहयाञ्चक्रुः । यस्य च समरभुवि भुजदण्डेन कोदण्डं कोदण्डेन शराः शरैररिशिरः अरिशिरसा भूमण्डलं भूमण्डलेनानुभूतपूर्वो नायकः नायकेन कीर्तिः, कीर्त्या च सप्तसागराः, सागरैः कृतयुगादिराजचरितस्मरणम्, स्मरणेन स्थैर्यम्, स्थैर्येण प्रतिक्षणमाश्चर्यमासादितम् । यस्य च प्रतापानलदग्धदयितानां रिपुसुन्दरीणां करतलताडनभीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः । यस्य च निशितनाराचजर्जरितमत्तमातङ्गकुम्भस्थलविगलितनिस्तलमुक्ताफलनिकरदन्तुरित-परिसरे पतत्पत्ररथे रक्तवारिसमुड्ड्यमानद्विरदपदकच्छपे विलसदुत्पलपुण्डरीके, वाहिनीशतसमाकुले, नृत्यत्कबन्धविधुरे सुरसुन्दरीसमागमोत्सुकभटाहङ्कारभाषणरवभीषणे सागर इव समरशिरसि भिन्नपदातिकरितुरगरुधिरार्द्रलक्ष्मीपादालक्तकरागरञ्जित इव खड्गो रराज ।**

**येन च चन्द्रेणेव सकलकलाकुलगृहेण, शर्वरीतिहारिणा, दलितकैरवेण, प्रसाधिताशेन विलोकिताः, जलधय इव समुल्लसितगोत्राः, सुदूरविवर्द्धितजीवनाः, प्रसन्नसत्त्वाः सन्तः, परामृद्धिमवापुः ।** कन्दर्पकेतुपक्षे - सकलानां कलानाम् = चतुःषष्टिसङ्ख्यकानां नृत्यवाद्यगीतादीनाम्, कुलगृहम् = आश्रयो यस्मिंस्तथाभूतेन, चन्द्रपक्षे - सकलानाम् = षोडशसङ्ख्यकानां कलानाम्, आश्रयः = अधिष्ठानम्, तेन, शर्वरीतिहारिणा - शर्वस्य = महादेवस्य, रीतिम् = ऐश्वर्यसत्त्वेऽप्यनासक्तिरूपादिकम्, हरति = अनुकरोतीति तच्छीलस्तेन, चन्द्रपक्षे - शर्वर्याः = रात्रेः, ईतिः = तमः, तद्धरति = विनाशयति तच्छीलस्तेन । दलितकैरवेण - कन्दर्पपक्षे - दलिताः = मर्दिताः, कैरवाः = शत्रवो येन सः, तेन । चन्द्रपक्षे- दलितानि = विकासितानि, कैरवाणि = कुमुदवनानि, येन सः, तादृशेन । प्रसाधिताशेन - प्रकर्षेण साधिता = पूर्णतां नीताः, आशा = अपेक्षा, याचकानां येन सः, चन्द्रपक्षे - प्रसाधिता = अलङ्कृता, आशाः = दिशो येन सः, तादृशेन, विलोकिताः = अवलोकिताः, जलधय इव = समुद्रा इव समुल्लसितम् = दिक्षु प्रख्यापितं गोत्रम् = स्वकुलं यैस्ते तादृशाः, पक्षे - समुल्लसिता = विवृद्धा, गोत्रा = पृथिवी, गोसमूहो वा "गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही" इत्यमरः, येषां ते तादृशाः । यदनुग्रहतः सन्तः भूमेर्गोसमूहानां

वा स्वामिनः सञ्जाताः, इत्यर्थः । सुदूरविवर्द्धितजीवनाः- सुदूरम् = अत्यन्तम्, विवर्द्धितम् = वृद्धिं नीतम्, जीवनम् = जीविका, येषान्ते । पक्षे - सुदूरम् = अत्यन्तमुच्चैः, विवर्द्धितम् = उत्थापितम्, जीवनम् = जलं येषान्ते । प्रसन्नसत्त्वाः- प्रसन्नम् = निर्मलम्, सत्त्वम् = अन्तःकरणम्, येषां ते तादृशाः, पक्षे प्रसन्नाः = दृष्टाः, सत्त्वाः = प्रकृतयो येषां ते, तादृशाः सन्तः = साधवः, पराम् = उत्कृष्टाम्, ऋद्धिम् = समृद्धिम्, आपुः = प्रापुः । **यस्य च जनितानिरूद्धलीलस्य** - मकरकेतोः = कामदेवस्य इव, कन्दर्पकेतोः = राजकुमारस्य यस्य दर्शनेन वनिताजनस्य हृदय समुल्ललासेत्यन्वयः । **जनितानिरूद्धलीलस्य-** जनिता = समुत्पादिता विहिता वा अनिरुद्धा = अवारिता, लीला = खेला विलासा वा येन सः तस्य । पक्षे च - जनिता = समुत्पादिता, अनिरुद्धस्य = एतन्नामकस्य स्वपुत्रस्य, लीला = खेला, येन तस्य, कामपुत्रो ह्यनिरुद्धः । **रतिप्रियस्य** - रतिः = रागः, क्रीडा वा यस्य सः, तादृशस्य । पक्षे - रतिः = प्रिया यस्य तस्य । **कुसुमशरासनस्य** - कुसुमशरम् = कामम्, अस्यति = क्षिपति तिरस्करोति वा स्वसौन्दर्येणेति तस्य । पक्षे - कुसुमानि = पुष्पाणि, शरासनम् = धनुः, यस्य तादृशस्य, मकरकेतोः = कामस्येव दर्शनेन, वनिताजनस्य = प्रमदाजनस्य । हृदयम् = अन्तःकरणम्, उल्ललास = हर्षं प्राप । यस्मै च तरुण्यः स्पृहयाञ्चक्रुरिति सम्बन्धः । **यस्मै चानुगतदक्षिणसदागतये**, अनुगतानाम् = सेवकानाम्, कुशलानां पण्डितानां वा सताम् = साधूनाम्, चागतिः = आगमनस्थानं तस्मै । वसन्तपक्षे - अनुगतः = अनुसृतः, दक्षिणः = दक्षिणदिग्भवः, सदागतिः = वायुः, यं तस्मै । वसन्तागमनेन दक्षिणदिग्वायोरपि सञ्चलनादिति भावः ।**नेत्रश्रुतिसुखदाय** - नेत्रयोः = नयनयोः, श्रुत्योः = कर्णयोश्च, स्वरूपेण कीर्त्या च सुखदाय = आनन्ददात्रे, लोकानामिति शेषः । पक्षे - नेत्रमेव = नयनमेव, श्रुतिः = श्रवणेन्द्रियं येषां ते नेत्रश्रुतयः = सर्पाः, तेषां सुखदाय = आनन्दप्रदाय, वायुभक्षकाणां तेषां शीतलकोमलदक्षिणपवनसञ्चरणाद्वसन्तस्य तेषां सुखप्रदत्वमस्त्येव । **कोमलकोकिलरुताय** - कोमलम् = मधुरं कर्णसुखावहम्, कोकिलस्यैव = पिकस्यैव "वनप्रियः परभृतः कोकिलः पिक इत्यपि" इत्यमरः, रुतम् = शब्दो यस्य तस्मै, पक्षे - कोमलम् = मधुरम्, कोकिलरुतम् = पिकध्वनिः, यत्र । **विकासितपल्लवाय** - विकासिताः = विस्तारिताः, पल्लवाः = सैन्यबलानि येन तस्मै । पक्षे- विकासिताः = विकासं नीताः, पल्लवाः = किसलयानि, "पल्लवोऽस्त्री किसलयम्" इत्यमरः, येन तस्मै । **कृतकान्तारतरङ्गाय** - कृतः = जनितः, कान्तासु = प्रमदासु, "प्रमदा मानिनी कान्ता" इत्यमरः, रतेः = रतिविषये, रङ्गः = अभिलाषो येन स तस्मै, कन्दर्पः प्रमदासु सुरतविकारं जनयतीति भावः । वसन्तपक्षेऽपि - तस्य कामोद्दीपकत्वादियमेव व्याख्या । अथवा वसन्तपक्षे - कृतः = विहितः, कान्ताराणाम् = वनानाम्, तरङ्गः = कम्पनम्, येन स तस्मै । **सुरभिसुमनोऽभिरामाय-** सुरभिभिः = सुगन्धिभिः, सुमनोभिः = पुष्पैः, अभिरामः = मनोज्ञः, तस्मै । राजपक्षे - वसन्तपक्षे उभयत्र समानमेव । अथवा राजपक्षे - सुरभयः = प्रसिद्धाः, सुमनसः = विद्वांसः, तैः, अभिरामः = मनोहर इति विशेषः । **सर्वजनसुलभपद्माय** - सर्वजनानाम् = सामान्यजनानाम्, कृते सुलभा = सुखप्राप्या, पद्मा = लक्ष्मीर्यस्य तस्मै । पक्षे - सर्वजनसुलभं पद्मम् = कमलम्, यस्मिन् स तस्मै । **विस्तृतकनकसम्पदे अतिक्रान्तदमनकाय वसन्तायेव** - विस्तृता = प्रभूता, कनकसम्पद् = स्वर्णादिसम्पत्, तस्मै वसन्तपक्षे- विस्तृता = पर्याप्ता, कनके = धत्तूरे, "धत्तूरः कनकाह्वयः" इत्यमरः, किंशुके = नागकेशरे, चम्पके वा, स्वसम्पद् = सौन्दर्यम्, येन तस्मै । **अतिक्रान्तदमनकाय** - अतिक्रान्ताः = पराभवं नीता, दमनकाः = दमनशीलाः, महावीरा

येन स तस्मै । पक्षे च - अतिक्रान्ताः = अतिशयेन व्याप्ताः, दमनकाः = सुगन्धिलताविशेषा यस्मिन् तस्मै । अतिक्रान्ता दमनकाः = कुन्दपुष्पाणि, येन तस्मै । वसन्ताय = पुष्पप्रसवकालाय इव । **उपवनलता इवोत्कलिकासहस्रसङ्कुलाः भ्रमरसङ्गताः**, उपवनलता = उपवनवल्लय इव । उत्कलिकानाम् = उत्कण्ठानाम्, सहस्रेण = दशशतेन, अभिलाषसहस्रेण तद्यथा "अहमनेन सह एवं रंस्ये, एवमालपिष्यामि" इत्यादिरूपेण, सङ्कुलाः = व्याप्ताः । पक्षे - हृद्गतानाम् = आविर्भूतानाम्, कलिकानाम् = कोरकाणाम्, सहस्रेण सङ्कुलाः = परिव्याप्ताः । भ्रमरैः = कामुकैः, सङ्गताः = मिलिताः, कामुकान्विताः अपि ताः कन्दर्पकेतवे स्पृहयाञ्चक्रुरित्यहो तेषां तस्मिन्नभिलाषातिशयः । पक्षे - भ्रमरैः = भृङ्गैः, "द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः" इत्यमरः, सङ्गताः = व्याप्ताः, भ्रमराधिष्ठिता इत्यर्थः । **प्रवालहारिण्यः विलसद्वयसस्तरुण्यः स्पृहयाञ्चक्रुः**- प्रवालानाम् = विद्रुमाणाम्, हाराः = मालाः, यासां ताः किञ्च वबयोरभेदात् प्रकृष्टैः बालैः केशहारिण्यः = मनोहारिण्यः । पक्षे - प्रवालैः = किसलयैः, हारिण्यः = मनोहराः । **विलसद्वयसः** विशेषेण लसत् = प्रस्फुरत्, शोभमानं वा अङ्गेषु वयः = यौवनम्, यासां ताः । पक्षे - विलसन्ति = शोभमानानि वयांसि = पक्षिणो यासु ताः, तरुण्यः = सुन्दर्यः, स्पृहयाञ्चक्रुः = अभिलषन्ति स्म ।

इदानीं मालादीपकालङ्कारमिषेण कन्दर्पकेतोः कीर्तिवर्णनमुपस्थापयन्नाह - यस्य च = कन्दर्पकेतोः, समरभुवि = रणप्राङ्गणे, भुजदण्डेन= बाहुदण्डेन, कोदण्डम् = धनुः, कोदण्डेन = धनुषा, शराः = बाणाः, शरैः = बाणैः, अरिशिरः = शत्रोर्मस्तकम्, अरिशिरसा = शत्रुमस्तकेन, भूमण्डलम् = भुवः प्रदेशः, भूमण्डलेन = भुवनमण्डलेन, न अनुभूतपूर्वः भवतीत्यननुभूतपूर्वः = अनिर्वचनीयः नायकः = अधिभूः, नेता वा, नायकेन = नेत्रा, कीर्तिः = यशः, कीर्त्या = यशसा च, सप्तसागराः = सप्तसमुद्राः, सप्तसागरैः = सप्तसमुद्रैः, कृतयुगादिराजचरितस्मरणम् = सत्ययुगादिराज-चरित्रस्मृतिः, स्मरणेन = स्मृत्या च, स्थैर्यम् = स्थिरता, स्थैर्येण = स्थिरतया च, प्रतिक्षणम् = प्रतिपलम्, आश्चर्यम् = विस्मयः, आसादितम् = सम्प्राप्तम् । **यस्य च प्रतापानलदग्ध-दयितानां रिपुसुन्दरीणां करतलताडनभीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः** - यस्य च = कन्दर्पकेतोः, प्रतापः = कोशदण्डतेजोभ्यः जातः प्रभावः, एव अनलः = वह्निः, तेन दग्धाः = भस्मीकृताः, दयिताः = स्वामिनो यासां ताः, तासां रिपुसुन्दरीणाम् = शत्रुवनितानाम्, मुक्ताहारैः = मौक्तिकमालाभिः, करतलेन = रिपुसुन्दरीणाम्, हस्तेन = करेण, यत्ताडनम् = खेदः, वैधव्यदुःखेन वक्षसः ताडनं तस्माद् भीतैः = सन्त्रस्तैरिव, इत्युत्प्रेक्षा । स्वस्यापि तत्सन्निधानाद् वक्षसस्ताडनेनास्माकमपि ताडनं निश्चितमिति बुद्ध्या पयोधरयोः = कुचयोः, परिसरः = उपान्तप्रदेशः, मुक्तः = परित्यक्तः । रिपुस्त्रीभिः स्ववक्षसि मुक्ताहारो न धृतः । तदधारणेन स्वकीयवैधव्यं प्रकाशितमिति भावः । यस्य च = कन्दर्पकेतोः, यस्य च... खड्गो रराज इति सम्बन्धः ।

**निशितनाराचजर्जरितमत्तमातङ्गकुम्भस्थलविगलितनिस्तलमुक्ताफलनिकरदन्तुरितपरिसरे** - निशितैः = तीक्ष्णैः, नाराचैः = सर्वलोहमयैः बाणैः, जर्जरितानि = शिथिलभूतानि भिन्नानीति वा मत्तानाम् = मदस्राविणाम्, मातङ्गानाम् = गजानाम्, कुम्भस्थलानि = गण्डप्रदेशास्तेभ्यो विगलितैः = प्रच्युतैः, निस्तलैः = वर्तुलैः, मुक्ताफलनिकरैः = मौक्तिकसमूहैः, दन्तुरितः = परिव्याप्तः, परिसरः = उपान्तदेशो यस्य तस्मिन्

तादृशे । **पतत्पत्ररथे** - पतन्ति पत्राणि = वाहनानि, रथाः = स्यन्दनाश्च यस्मिन् । समुद्रपक्षे - पतन्तः सलिलपानार्थमागच्छन्तः पत्ररथाः पक्षिणः, यस्मिन् तस्मिन् । **रक्तवारिसमुड्ड्यमानद्विरदपदकच्छपे** - रक्तमेव = वारि, समुड्यमानानि, उत्प्लवमानानि, द्विरदपदानि = हस्तिपादाः, कच्छपा इव = कूर्मा इव "कूर्मे कमठकच्छपौ" इत्यमरः, यस्मिन्, तस्मिन् । रक्तमिव वारि तस्मिन् समुड्यमानानि = उन्मज्जितानि, द्विरदपदानि इव कच्छपा यस्मिन् तथोक्ते, **विलसदुत्पलपुण्डरीके** - विलसन्ति = शोभमानानि, उद्गतं पलम् = मांसम्, येभ्यः तानि उत्पलानि = मांसशून्यानि, अस्थिमात्रावशिष्टानि पुण्डरीकाणि = सितच्छत्राणि, मृतपुरुषाणाम्, हृत्पद्मानि वा यस्मिन् तथोक्ते, पक्षे - विलसन्ति उत्पलानि = कुमुदानि पुण्डरीकाणि = सिताम्भोजानि, यस्मिन् तस्मिन् । **वाहिनीशतसमाकुले** - वाहिनीनाम् = सेनानाम्, "ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः" इत्यमरः, शतैः = शतसङ्ख्यकैः, समाकुले = व्याप्ते, पक्षे - वाहिनीनाम् = नदीनाम्, शतैः = शतकैः, समाकुले = परिव्याप्ते, **नृत्यत्कबन्धवन्धुरे** - नृत्यद्भिः = इतस्ततः प्रधावद्भिः, कबन्धैः = रुण्डैः, बन्धुरे = उन्नतानते, "बन्धुरं तून्नतानतम्" इत्यमरः, **सुरसुन्दरीसमागमोत्सुकभटाहङ्कारभाषणरवभीषणे**- सुरसुन्दरीणाम् = अप्सरसाम्, समागमे = सहवासलाभे, उत्कटाः = उत्कण्ठिताः, ये भटाः = सैनिकाः, तेषाम् अहङ्कारेण = गर्वेण, भाषणरवः = सम्भाषणकोलाहलः, तेन भीषणे = भयानके, "दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्" इत्यमरः, यत्राप्सरसां समागमोत्सुका भटाः सगर्वं परस्परमाहूयन्ते तत्रेत्यर्थः, पक्षे- सुरसुन्दरीणाम् = मत्स्यविशेषाणाम्, समागमे = सम्प्राप्तौ, उत्सुकानाम् =उत्कण्ठितानाम्, भटानाम् = कैवर्त्तादीनाम्, साहङ्कारभाषणरवेण = सगर्वभाषणकोलाहलेन, भीषणे = भयानके । **सागर इव समरशिरसि**- समरस्य = रणप्राङ्गणस्य, शिरसि = अग्रभागे, अन्यत्र - समरशिरसि = रणसम्मुखे इव सागरे = समुद्रे, **भिन्नपदातिकरितुरगरुधिरार्द्रलक्ष्मीपादालक्तकरागरञ्जित**- भिन्नानाम् = विदारितानां मृतानामित्यर्थः, पदातीनाम् = पत्तीनाम्, करिणाम् = गजानाम्, तुरगाणाम् = अश्वानाम्, रुधिरेण = लोहितेन, आर्द्रः = क्लिन्नः, अत एव जयलक्ष्म्याः = विजयलक्ष्म्याः, पादयोः = चरणयोः, अलक्तकरागेण = लाक्षारसेन, रञ्जितः = रक्तवर्णीकृतः, खड्गः = कृपाणः, इव रराज = शुशुभे ।

## पाठसारः

यथा सर्वकलापरिपूर्णस्य चन्द्रस्य दर्शनेन समस्तजलजन्तुसहितो महासागरो वृद्धिं गच्छति तथैव सकलकलाकुशलस्य शत्रुसंहारकस्य नीतिज्ञस्य राजकुमारस्य कन्दर्पकेतोर्दर्शनेन जना बहुविधां समृद्धिं प्राप्नुवन्ति स्म । अनेकलीलाविलासधुरन्धरं राजकुमारममुं विलोक्य सुन्दर्यो मुग्धा भवन्ति स्म । विलासिन्यस्तरुण्यः सदैव रूपेण, मधुरस्वरेण, दयया, पराक्रमेण, विलासप्रियतया च समृद्धस्यास्य साहचर्यं वाञ्छन्ति स्म । युद्धे चासौ धनुःकौशलेन, शौर्येण, नैपुण्येन, स्थैर्येण च सर्वान् शत्रून् व्यापाद्य प्रतिक्षणं सर्वेषां कृते विस्मयं जनयति स्म । अनेन शत्रुवनिताः सदैव शृङ्गारशून्या विधीयन्ते स्म । अस्य तीक्ष्णबाणैः मदमत्तकरिकुम्भा भिद्यन्ते स्म, शत्रुसैनिकानां शिरांसि छिद्यन्ते स्म, युद्धभूमौ शत्रुकबन्धा नृत्यन्ति स्म । शत्रूणां वाहिनीशतसम्मीलिते रक्तसमुद्रेऽस्य हस्तिनः कच्छपा इवोत्प्लवन्ते स्म । विजयलक्ष्म्या अलक्तरागेणेव शत्रुरुधिरेणास्य खड्गः सततं रञ्जितो भवति स्म ।

## अभ्यासः

### १. अधोनिर्दिष्टप्रश्नानामुत्तराणि लिखत

(क) केन कीदृशाः सन्तः परां वृद्धिमवापुः ?

(ख) सुन्दरीणां हृदयं किमर्थमुल्ललास ?

(ग) कन्दर्पकेतुः कीदृशः आसीत् ?

(घ) तरुण्यः कस्मै स्पृहयाञ्चक्रुः ?

(ङ) कन्दर्पकेतोः केन केन साधनेन प्रतिक्षणमाश्चर्यमासादितम् ?

(च) कन्दर्पकेतोः रिपुसुन्दरीणां मुक्ताहारैः किमर्थं पयोधरपरिसरो मुक्तः ?

(ज) कन्दर्पकेतोः खड्गः कथं रराज ?

### २. अधोनिर्दिष्टगद्यखण्डस्य सरलया संस्कृतगिरा व्याख्यां कुरुत

यस्य च समरभुवि भुजदण्डेन कोदण्डं, कोदण्डेन शराः, शरैररिशिरः, अरिशिरसा भूमण्डलं, भूमण्डलेनानुभूतपूर्वो नायकः, नायकेन कीर्तिः, कीर्त्या च सप्तसागराः, सागरैः कृतयुगादिराजचरितस्मरणम्, स्मरणेन स्थैर्यम्, स्थैर्येण प्रतिक्षणमाश्चर्यमासादितम् ।

### ३. अधोनिर्दिष्टगद्यखण्डस्य तात्पर्यं प्रकाशयत

येन च चन्द्रेणेव सकलकलाकुलगृहेण, शर्वरीतिहारिणा, दलितकैरवेण, प्रसाधिताशेन विलोकिताः, जलधय इव समुल्लसितगोत्राः, सुदूरविवर्द्धितजीवनाः, प्रसन्नसत्त्वाः सन्तः, परामृद्धिमवापुः ।

### ४. अधोनिर्दिष्टगद्यखण्डस्य नेपालिभाषायामर्थं लिखत

यस्मै चानुगतदक्षिणसदागतये, नेत्रश्रुतिसुखदाय, कोमलकोकिलरुताय, विकासितपल्लवाय, कृतकान्तारतरङ्गाय सुरभिसुमनोऽभिरामाय, सर्वजनसुलभपङ्काय, विस्तृतकनकसम्पदे अतिक्रान्तदमनकाय वसन्तायेव, उपवनलता इवोत्कलिकासहस्रसङ्कुलाः भ्रमरसङ्गताः, प्रवालहारिण्यः विलसद्वयसस्तरुण्यः स्पृहयाञ्चक्रुः ।

### ५. अधोनिर्दिष्टानि क्रियापदानि प्रयुज्य वाक्यानि रचयत

अवापुः, स्पृहयाञ्चक्रुः, उल्ललास, रराज, आसादितम् ।

६. **अधोनिर्दिष्टानां शब्दानां पर्यायान् निर्दिशत**

जलधयः, रतिप्रियस्य, दर्शनेन, अभिरामाय, कोदण्डेन ।

७. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

शर्वरीतिहारिणा, सुदूरविवर्द्धितजीवनाः, कोमलकोकिलरुताय, निशितनाराचजर्जरितमत्तमातङ्ग-कुम्भस्थलविगलितनिस्तलमुक्ताफलनिकरदन्तुरितपरिसरे, सुरसुन्दरीसमागमोत्सुक-भटाहङ्कारभाषण-रवभीषणे ।

८. **दशाधिकाभिः पङ्क्तिभिः कन्दर्पकेतुं वर्णयत ।**

९. **दशाधिकैर्वाक्यैः कन्दर्पकेतोर्युद्धशक्तिं वर्णयत ।**

१०. **कन्दर्पकेतुवर्णनमिति पाठस्य सारं प्रकाशयत ।**

## नवमः पाठः

# पुनर्जीवनम्

*- रामहरिदाहालः*

### पात्रपरिचयः

| | |
|---|---|
| मनोजः | - नवमकक्षायाश्छात्रः |
| पिता | - मनोजस्य जनकः |
| माता | - मनोजस्य जननी |
| प्राचार्यः | - उच्चमाध्यमिकविद्यालयस्य प्रमुखशिक्षकः |
| चिकित्सकः | - मनोजस्योपचारको भिषक् |
| भगिनी | - मनोजस्यानुजा |
| योगाचार्यः | - योगप्रशिक्षकः |

### प्रथमं दृश्यम्

(चिकित्सालयस्योपचारकक्षः । मनोजो रोगशय्यायां सुप्तोऽस्ति । निकटे तलद्वययुते आयसकण्डोले कतिचनौषधानि विकीर्णानि सन्ति । जलपानाय कंसः स्थापितोऽस्ति । रोगिणो दक्षिणपार्श्वे पिता पुत्रस्य स्वास्थ्यावस्थायाः सम्बन्धे चिकित्सकेन सह विमृशन्नस्ति ।)

**पिता** चिकित्सकमहोदय ! अधुना रोगिणः स्थितिः कीदृशी अस्ति ? रक्तचापस्य, श्वाससञ्चालनस्य चावस्था कथंविधा वर्तते ?

**चिकित्सकः** पितः, भयस्यावस्था नास्ति । इदानीं रोगिणः स्वास्थ्यं सुधारोन्मुखं जायमानं वर्तते, श्वासप्रश्वासप्रणाली च स्वाभाविकगत्या चलन्ती दृश्यते । प्राणवायोरवस्थितिर्नवतेरुपरि विद्यते । रक्तचाप ईषन्मन्दः सन्नपि पश्चात् स्वाभाविको भवतीति मन्ये । पितः, अयं किशोरः कथं रुग्णो जातः ? भोजनविकारः, अन्यद् वा किं कारणम् ?

**पिता** भोजनविकारो न कारणं चिकित्सकमहोदय ! स्वल्पे वयसि विद्यार्जनवेलायामसौ मादकौषधसेवी अभवत् । धूमपानव्यसनी च जातः । एवंविधे दुर्व्यसनेस्य संलग्नता नापेक्षिताऽऽसीत् । अस्माकं दौर्भाग्यादधुना पुत्र एवमवस्थां प्राप्तः ।

**चिकित्सकः** पितः, अत्र दुर्भाग्यस्य वार्ता न । स्वकर्मणोऽनुसारेण जनः सुखं दुःखञ्च लभते । भाग्याय दोषारोपणं निरर्थकम् । यथा च पठनसमये तत् परित्यज्य अनेन मादकौषधं सेवितम् । ततोऽध्ययनं विनष्टम् । समयो व्यर्थं व्यतीतः । शरीरञ्च रोगाक्रान्तं जातम् । किमेतद् भाग्यस्य कारणमिति भवान् मनुते ?

**पिता** भिषग्वर्य ! भवतः कथनं सत्यम् । स्वस्यैव दुर्व्यसनकारणाद् अनेन दुःखं लब्धम् । कथमसौ दुर्व्यसनी जात इति वयमपि न जानीमः । असौ विद्यालयं प्राप्य पठतीति अस्माभिर्विश्वसितमासीत् । परं पठनापेक्षयाऽसौ मादकौषधसेविनां सम्पर्के प्राप्तो येनेदृशी शोच्या दशाऽभवत् ।

**चिकित्सकः** (मध्ये निवार्य) पितः, अस्मिन् सन्दर्भे केवलं स्वसन्ततेरेव दोषो न मन्तव्यः । भवद्भिरपि सन्ततिर्विद्यालये यथासमयं प्राप्नोति न वा ? गत्वा पठति न वा ? समये गृहमागच्छति न वा ? किशोरः कदा कुत्र गच्छतीति मुहुर्मुहुर्विचारणीयमासीत् । केवलं विद्यालये प्रेषणमात्रेण अभिभावकीयं कर्तव्यं प्रपूरितं न भवति । अप्यस्मिन् सन्दर्भे भवद्भिर्ध्यातम् ?

**पिता** (काञ्चिद् भीतिमभिनीय) न ध्यातम् । पठ पुत्र, गृहकार्यं समापय इति तु मध्ये मध्येऽस्माभिः कथितमेवासीत् । एवं कुव्यसने पुत्रः पतितोऽस्तीति न ज्ञातम् । एकदा प्राचार्येण भवतः पुत्रः कक्षायां नियमितो न भवति, कदाचित् पूर्वाह्णे, कदाचिन्मध्यदिनेऽनवसरे एव विद्यालयं त्यक्त्वा यातीति सूचितम् । तदनन्तरमेवास्माभिः किञ्चिद् ज्ञातम् ।

**चिकित्सकः** विद्यार्थिनो घण्टाषट्कं यावद् विद्यालये तिष्ठन्ति, अवशिष्टसमये तु गृहमेवाधिवसन्ति । तदवधौ स्वसन्ततेः सम्बन्धेऽभिभावकैर्ध्यानं दातव्यमेव । स्वास्थ्यस्य, पठनलेखनयोः, सख्यादिभिस्सह व्यवहरणस्य च विषयेषु प्रतिक्षणं विचारणीयम् । एतस्याभिप्रायो भर्त्सनताडनादिभिः सन्ततेर्मनसि भयसर्जनं न वर्तते । स्वल्पत्रुट्यापि कदाचिन्महाननर्थो घटिष्यते ।

(रुग्ण ईषदीषन्नयने उन्मीलयति)

**पिता** (रोगिणः सम्मुखो भूत्वा) पुत्र, सम्प्रति शारीरकं कष्टं कीदृशं वर्तते ? भोजनेच्छाऽस्ति न वा ? त्वं यदि समये एव चिकित्सालये आनीतो नाभविष्यस्तर्हि प्राणेभ्योऽपि मुक्तोऽभविष्यः । अतः परमेवंविधं दुराचरणं मा कुरु ।

(पुत्रो मूकवत् पितरं विलोकयति)

**चिकित्सकः** चिकित्सालये रोगिणः पार्श्वे बहु न वक्तव्यम् । तस्य दुष्कृत्यादयोऽपि न गणनीयाः । तथा कृते सुधारोन्मुखं स्वास्थ्यं विकृतायते । भवान् स्वल्पमात्रं वदतु । अहमन्यान् रुग्णान् द्रष्टुं यामि ।

(इति निष्क्रान्तः । यवनिका स्वल्पसमयाय आक्षिप्ता भवति ।)

## द्वितीयं दृश्यम्

(गृहे स्वस्थप्रायः किशोरो दृश्यते । तस्य पार्श्वयोः प्राचार्यः पितरौ भगिनी कतिचन सम्बन्धिनश्च सन्ति ।)

**प्राचार्यः** (किशोरं प्रत्यभिमुखो भूत्वा) भो मनोज ! त्वं कथं दुर्व्यसनिनां सम्पर्कं प्राप्तवानसि ? सम्प्रति तवाध्ययनक्रमस्त्रुटितः । शरीरं शिथिलायितम् । मनसि पश्चात्तापो वर्धते । भण, को वा लाभस्त्वया लब्धः ? तथा हि -

**बलवदपि शरीरं निर्बलं कान्तिहीनं**
**भवति, मनसि पीडा वर्धते दुष्कृतोत्था ।**
**चलति विभवजातं क्षीयते बुद्धिशक्तिस्**
**तदिह न हि सुसेव्यं मादकं खाद्यपेयम् ॥**

**माता** (शान्तस्वरेण) वत्स ! कथं त्वं मादकौषधसेवी अभवः ? एतादृशं मादकौषधसेवनं केन शिक्षितम् ? पितरौ न कदापि तवाहितं चिन्तयतः । एतयोर्मनो दुःखयित्वा त्वया किं प्राप्तम् ? सत्यं भण, सर्वं भण । (रोदिति)

**मनोजः** (किञ्चित् किञ्चिद् रुदित्वा) मातर्मया दुराचरणं विहितम् । क्षम्यताम् । (मध्ये पुना रोदिति)

**माता** वत्स ! मा रुदिहि । रोदनात् शरीरमाम्लानपुष्पवत् शिथिलायते । शृणु -

**शृणु सुत गुरुवाणीं निश्छलां सत्यमूलां**
**तदनु नय क्रियायामात्मकल्याणहेतोः ।**
**धरति गुरुवचो यो मानसे नित्यमेव**
**भवति भुवि स धन्यो लोकमान्यो गुणी च ॥**

**प्राचार्यः** पठनशीलेन विद्यार्थिना पाठतालिकां निर्माय तदनुसारेणैव पठनीयम् । प्रतिदिनं प्रातः न्यूनान्यूनमपि पञ्चवादने उत्थातव्यमेव । तदनु क्षणमात्रं किन्न स्यात्, हृदि परेशं संस्मृत्य, शारीरकं मलं विसृज्य, स्नात्वा च शरीरे स्फूर्तिरानेतव्या । प्रातः कालोऽमृतवेला मन्यते । स्वास्थ्यसंरक्षणाय आरोग्यवृद्धये चासौ कालोऽनुकूलः । विद्याया बोधायाऽपि समयोऽसौ नितरामुपयोगी मन्यते । प्रातर्नववादनं यावद् घण्टातालिकानुसारेण निर्धारिताः पाठ्यविषयाः पठनीयाः मननीयाश्च । ततो भोजनं भुक्त्वा विद्यालये गन्तव्यम् । अपि त्वया ज्ञातम् ?

**मनोजः** (मन्दस्वरेण) ज्ञातं सम्यगाचार्यवर ! स्वास्थ्यलाभानन्तरं पाठतालिकानुसारेणैव पठामि लिखामि च ।

**प्राचार्यः** (मनोजस्य सम्मुखो भूत्वा) साधु, साधु ! एतदेव मया त्वत्तोऽपेक्षितमासीत् । शीघ्रं स्वस्थो भव । अहं त्वत्कृते खण्डितां त्रैमासिकपरीक्षां पृथगेव सञ्चालयिष्यामि । नवमकक्षाया

विज्ञच्छात्रान् खण्डितकक्षापाठान् बोधयितुं शिक्षणक्रमे प्रदत्तां पाठटिप्पणीमर्पयितुञ्च प्रेरयिष्यामि । पश्चादपि अहं मेलयिष्यामि । अधुना यामि ।

(इति निष्क्रान्तः)

**पितरौ** (स्वल्पं स्वल्पं फलरसं पाययन्तौ) वत्स ! त्वं चिन्तां मा कुरु । साम्प्रतं त्वं पश्चात्तापेन पीडितोऽसि । पश्चात्तापान्मतिः शुद्ध्यति । कृतं दुष्कार्यमपि दोषाय न कल्पते ।

**पिता** पूर्णस्वास्थ्यलाभानन्तरं त्वामहं योगगुरोः समक्षं नेष्यामि । स ममापि गुरुर्वर्तते । तेन बहुशो रोगग्रस्ता जना योगाभ्यासस्य माध्यमेन नीरोगिणः कारिताः सन्ति । स त्वां ध्यान-प्राणायामादिप्रक्रियां शिक्षयिष्यति येन त्वं शरीरेण मनसा च स्वस्थो भविष्यसि ।

**मनोजः** भवति पितः !

**भगिनी** योगशिक्षणस्य पश्चादहमपि भ्रातुर्योगं शिक्षिष्यामि ।

**मनोजः** कथं न भवति ? भवत्येव भगिनि ! अहं न त्वामेव परं बहून् जनान् शिक्षयिष्यामि ।

(भगिनी सस्मितं विलोकयति । सर्वे निष्क्रान्ताः ।)

## तृतीयं दृश्यम्

(लम्बाकारो योगप्रकोष्ठः । किशोराः प्रौढाश्च योगक्रियां कुर्वाणाः सन्ति । योगाचार्यस्तान् शिक्षयन्नस्ति ।)

**पितरौ, मनोजश्च** (युगपदेव) प्रणमामो योगाचार्यम् !

**योगाचार्यः** नमामि सर्वान् । उपविशन्तु । (वस्तुं मञ्चान् निर्दिशति)

**पिता** अयं मे सुतः । सम्प्रति नवमकक्षायां पठति । पठनक्रमे दुर्विचारवशाद् मादकौषधसेविनां सम्पर्कं प्राप्तः, येनास्य शरीरं दुर्बलं जातम् । मानसञ्च पश्चात्तापाकुलं वर्तते । कृपया भवान् अस्य चिन्तामपाकरोतु ।

**योगाचार्यः** वत्स ! यज्जातं जातम् । समये एव त्वं मत्पार्श्वे आगतोऽसि । अहं त्वाम् अत्यावश्यकानेव ध्यानासनप्राणायामान् शिक्षयामि । अस्मिन्नभ्यासे प्रतिदिनं त्वया घण्टैका दातव्या भवति ।

**मनोजः** भवदनुशासनं पालयामि, गुरुवर !

**योगाचार्यः** त्वं विद्यार्थी असि । तव पठने व्यवधानमकृत्वैव अहं शिक्षयामि । प्रातः पञ्चवादनात् षड्वादनं यावत् त्वया स्वगृहे एव योगाभ्यासः कर्तुं शक्यते । तथा कृते अचिरादेव त्वं स्फूर्तिमान् तेजस्वी मेधावी च भविष्यसि ।

**मनोजः** योगाचार्य ! अहं शरीरेण, मनसा च स्वस्थो भवितुमिच्छामि ।

**योगाचार्यः** योगस्य महत्त्वमद्वितीयमेव । तथा हि –

**योगाद् बलं प्रचुरमेव तनावुदेति**
**चेतः प्रसीदति रुचिः पठनादिषु स्यात् ।**
**दूरं प्रयात्यलसता समुदेति शान्ति–**
**र्योगात् फलं हितकरं न मिलेद्धि किं किम् ॥**

**पिता** योगगुरो ! योगक्रियया पठनेऽपि रुचिर्जागर्ति ?

**योगाचार्यः** कथं न जागर्ति ? सर्वत्र रुचिर्जागर्ति । पठने लेखने पथ्यभोजने मृदुभाषणेऽनुकूलचिन्तने परहितसाधने च रुचिर्वर्धते । आलस्यं किञ्चिन्मात्रमपि तनौ न तिष्ठति । केवलं लाभो मिलति, हानिस्तु स्वल्पाऽपि न ।

**मनोजः** योगक्रियया मम पठने बाधा भविष्यतीति शङ्के ।

**योगाचार्यः** योगात् पठने व्यवधानं न भवत्विति विचार्यैव कतिचनैव योगाभ्यासाः प्रशिक्षिताः सन्ति । केवलं प्रातर्घण्टैकस्य व्ययेन घण्टानां त्रयोविंशतिं यावत् त्वं पूर्णस्वस्थो भविष्यसि । योगान्मेधाशक्तिर्वर्धते येन पठिताः पाठाः शीघ्रमेव स्मृतिपथमायान्ति । चिरं विस्मृताश्च न भवन्ति । अयं महान् लाभो न किम् ?

**मनोजः** अयन्तु महानेव लाभः । अध्ययनं स्वास्थ्यञ्च द्वितयमेव वर्धिष्यत इति तु योगस्य महन्महत्त्वं दृष्टिपथमायाति ।

**पिता** योगादधिकमेव लाभो भवतीति श्रुत्वा मे मानसं तुष्यति ।

(तदनु योगाचार्यान्मनोजस्तदीयपितरौ च अन्यैः साधकैस्सह योगविधेरभ्यासं विहितवन्तः ।)

**पितरौ** योगाचार्य ! भवता वयं भृशमुपकृताः । वयं कृतकृत्याः स्मः ।

**योगाचार्यः** मनोज ! त्वमतो गृहं गत्वा मया शिक्षितान् योगाभ्यासान् कुरु । निश्चितमेव त्वं स्वास्थ्ये विद्यायाञ्च सफलो भविष्यसि ।

**मनोजः** अनुगृहीतोऽस्मि गुरो !

**योगाचार्यः** अभ्यासवेलायां शङ्कोदेति चेन्मम समक्षमागत्य तां समाधेहि । कस्याञ्चिज्जिज्ञासायामुद्भूतायां दूरभाषमाध्यमेन मां पृच्छ । (दूरभाषाङ्कान् पत्रे विलिख्य ददाति ।)

**मनोजः** आचार्य ! अमुं योगविधिमहमपि जिज्ञासुभ्यो जनेभ्यः स्वसखिभ्यश्च समर्पयितुमिच्छामि ।

**योगाचार्यः** साधु मनोज ! साधु । पूर्वं त्वं सम्यगभ्यस । तदनु मत्पार्श्वमागत्य अन्यान् योगाभ्यासान् च विधाय पात्रस्य स्वास्थ्यानुसारेण आसनप्राणायामादिक्रियां प्रचारय । यतो हि विद्या पठनात् पाठनात् प्रचाराच्च द्वित्रिगुणा वर्धते । सञ्चयात् क्षयमेव भवति । नीतौ उक्तं त्वया श्रुतं भवेत्- "व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।" यथासम्भवं विद्यायाः प्रचारो विधातव्य एव । तत्राऽपि स्वास्थ्यधनस्य लाभाय बहुधा योगस्य प्रचार आवश्यकोऽस्ति । आसनाभ्यासस्य माध्यमेन शरीरस्य, ध्यानप्राणायामाभ्यां मनसः प्रज्ञायाश्च वृद्धिर्भवति । एतस्माद् हेतोः सर्वत्र सततं योगं प्रचारयितुमस्माभिर्दत्तावधानैर्भाव्यम् । अधुना त्वया पुनर्जीवनं लब्धम् । भवतु तव कल्याणम् ।

**पितरौ, मनोजश्च** (पुनर्नत्वा) प्रस्थानाय अनुमतिमिच्छामः, आचार्यवर !

**योगाचार्यः** साधयन्तु तावत् । जिज्ञासायामुत्पन्नायां मां दूरभाषमाध्यमेन प्रष्टुं वाऽत्र आगन्तुमपि भवन्तः शक्ष्यन्त्येव ।

**सर्वे** एवमेवं योगाचार्य ! अभिवादयामः । (इति प्रणमन्ति । योगाचार्यश्च सर्वान् नमस्करोति । निष्क्रान्ताः सर्वे ।)



## चतुर्थं दृश्यम्

(मनोजस्य गृहम् । प्राचार्यः, पितरौ, भगिनी, कतिचन प्रतिवेशिनश्च सन्ति ।)

**प्राचार्यः** भो मनोज ! त्वमधुना पूर्णस्वस्थोऽसि । पूर्वमधिकं सन्तप्तं मे मानसं साम्प्रतं त्वां दृष्ट्वा मोमुद्यते । पित्रोः समर्पणेन चिकित्सकानां प्रयासेन योगाचार्यस्य शिक्षणेन च त्वया पुनर्जीवनं प्राप्तं वर्तते । अत्र तव धैर्यमुत्साहश्च आरोग्याप्तयेऽतिरिक्तं कारणम् । अस्य श्रेयः सर्वेभ्यः शुभेच्छुकेभ्यो मिलति ।

**पितरौ** (प्रणम्य) भो प्राचार्य ! भवतां सदिच्छया एष रोगमुक्तोऽस्ति । कथमस्याध्ययनं सुचारु स्यादिति चेतः शङ्कते ।

**प्राचार्यः** भवद्भिर्न भेतव्यम् । मया गुरुवर्गात् त्रुटितपाठ्यांशस्य सारलेखनं विधाय आनीतं वर्तते । एतन्मनोजेन सायं प्रातः अधीत्य बोद्धव्यम् । अस्य त्रैमासिकी परीक्षा विद्यालयप्राप्तेरनन्तरं शीघ्रमेव सञ्चालयिष्यामि । (मनोजमुपागम्य पाठ्यांशसारलेखनपत्राणि ददाति ।)

मनोजः (पत्राणि गृह्णन्) आचार्यवर ! अनुगृहीतोऽस्मि ।

**पितरौ** अनुगृहीताः स्म ।

(योगाचार्यस्य प्रवेशः । सर्वे तं प्रणमन्ति, स च सर्वान् नमति ।)

**योगाचार्यः** भो मनोज ! दिष्ट्या त्वं रोगमुक्तोऽसि । तव शुभेच्छुकान् सर्वान् भूरिशो वर्धापनानि व्याहरामि । (मनोजं विलोक्य) अध्ययनमविकार्य त्वं शिक्षितान् योगविधीन् आवर्तय । एतद् वक्तुं तवोत्साहं मनोबलञ्च वर्धयितुमपि अहमागतोऽस्मि । पुना रोगा नाक्रामन्तु इति हेतोर्योगाभ्यासः सततं चालनीय एव ।

**मनोजः** अहमध्ययनेन सहैव सततं योगाँश्च अभ्यस्यामीति प्रतिजाने । अवकाशदिनेषु योगगुरुमुपागम्य योगस्य बहून् विधीन् शिक्षिष्यामि । तदनु समये समये रोगिणां पार्श्वं प्राप्य योगाभ्यसनमाध्यमेन तान् नीरोगिणः करिष्यामि । प्राप्तमेतत् पुनर्जीवनं सुकार्यमाध्यमेन सफलयिष्यामि । कार्येऽस्मिन् भवतां सद्भावनां कामये ।

**सर्वे** साधु वत्स ! साधु । अस्मिन् शुभकार्ये त्वं सफलो भव । अस्माकं शुभकामना सततं वर्तते ।

(प्रमोदेन सर्वे करतलध्वनिं प्रसारयन्ति, कतिचन नृत्यन्ति च । नेपथ्ये श्रूयते “भवतु सर्वमङ्गलम् ।”)

**आगन्तुकाः** (सस्वरं गायन्ति)

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥**

(इति निष्क्रान्ताः सर्वे ।)

## अभ्यासः

१. **पाठस्य सकलान् श्लोकान् छन्दःसङ्गतिमनुपाल्य सामूहिकस्वरेण श्रावयत ।**

२. **पाठस्य पात्राणां परिचयं कथयत ।**

३. **मित्राणि मिलित्वा साभिनयं पाठं पठत ।**

४. **पाठे प्रयुक्तानि चत्वारि विपुलानि वाक्यानि श्रावयत ।**

५. **अधोलिखितानां विशेषणपदानां पाठप्रयुक्तानि विशेष्यपदानि वदत ।**

तलद्वययुते, रोगाक्रान्तम्, शोच्या, सुधारोन्मुखम्, निश्छलम्, स्फूर्तिमान्, जिज्ञासुभ्यः, त्रैमासिकी, शुभेच्छुकान् ।

७. **सङ्क्षेपेणोत्तरयत**

(क) मनोजः कथं रुग्णोऽभवत् ?

(ख) पिता चिकित्सकं किमपृच्छत् ?

(ग) पितुः का त्रुटिरासीत् ?

(घ) चिकित्सालये रोगिणः पाश्र्वे किमर्थं बहु न वक्तव्यम् ?

(ङ) मादकात् खाद्यपेयात् कीदृशी हानिर्भवति ?

(च) पिता योगाचार्यं किमकथयत् ?

(छ) योगस्य महत्त्वं किम् ?

(ज) मनोजो योगाचार्यस्य पुरतः किं प्रत्यजानीत ?

(झ) 'पुनर्जीवनम्' इत्यस्य सार्थकत्वं कथं भवति ?

(ञ) अस्य पाठस्य सन्देशः कः ?

(ट) नाटके दृश्यवर्णनस्य प्रयोजनं किम् ?

## ८. अन्वयं कुरुत

बलवदपि शरीरं निर्बलं कान्तिहीनं
भवति, मनसि पीडा वर्धते दुष्कृतोत्था ।
चलति विभवजातं क्षीयते बुद्धिशक्तिस्
तदिह न हि सुसेव्यं मादकं खाद्यपेयम् ॥

## ९. भावार्थं लिखत

शृणु सुत गुरुवाणीं निश्छलां सत्यमूलां
तदनु नय क्रियायामात्मकल्याणहेतोः ।
धरति गुरुवचो यो मानसे नित्यमेव
भवति भुवि स धन्यो लोकमान्यो गुणी च ॥

## १०. व्याख्यां कुरुत

योगाद् बलं प्रचुरमेव तनावुदेति
चेतः प्रसीदति रुचिः पठनादिषु स्यात् ।
दूरं प्रयात्यलसता समुदेति शान्ति-
र्योगात् फलं हितकरं न मिलेद्धि किं किम् ॥

## ११. सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥ इति श्लोकस्यार्थं लिखत ।

## १२. कथनद्वयं संयोज्य संवादेतरमनुच्छेदमेकं रचयत

**चिकित्सकः –** (मध्ये निवार्य) पितः, अस्मिन् सन्दर्भे केवलं स्वसन्ततेरेव दोषो न मन्तव्यः । भवद्भिरपि सन्ततिर्विद्यालये यथासमयं प्राप्नोति न वा ? गत्वा पठति न वा ? समये गृहमागच्छति न वा ? किशोरः कदा कुत्र गच्छतीति मुहुर्मुहुर्विचारणीयमासीत् । केवलं विद्यालये प्रेषणमात्रेण अभिभावकीयं कर्तव्यं प्रपूरितं न भवति । अप्यस्मिन् सन्दर्भे भवद्भिर्ध्यातम् ?

**पिता –** (काञ्चिद् भीतिमभिनीय) न ध्यातम् । पठ पुत्र, गृहकार्यं समापय इति तु मध्ये मध्येऽस्माभिः कथितमेवासीत् । एवं कुव्यसने पुत्रः पतितोऽस्तीति न ज्ञातम् । एकदा प्राचार्येण

भवतः पुत्रः कक्षायां नियमितो न भवति, कदाचित् पूर्वाह्णे, कदाचिन्मध्यदिनेऽनवसरे एव विद्यालयं त्यक्त्वा यातीति सूचितम् । तदनन्तरमेवास्माभिः किञ्चिद् ज्ञातम् ।

## १३. भावविस्तारं कुरुत

स्वकर्मणोऽनुसारेण जनः सुखं दुःखञ्च लभते । भाग्याय दोषारोपणं निरर्थकम् ।

## १४. अधोलिखितं कथांशं संवादशैल्यां रूपान्तरयत

विजयो दिनेशश्च सखायौ स्तः । तौ एकदा भ्रमणाय गृहाद् बहिर्गच्छतः । स्वल्पाहाराय तौ मार्गे कदलीं क्रीणीतः । तां खादितुं तौ मार्गस्य पार्श्वभागे उपविशतः । निकटे खोलिका प्रवहन्ती अस्ति । कदलीं जग्ध्वा विजयस्तस्या वल्कलं खोलिकायां क्षिपति । दिनेशस्तन्न करोति । स वल्कलं पत्रेण आच्छाद्य स्यूते स्थापयति । तद् दृष्ट्वा विजय आश्चर्यचकितो भवति । स उच्चैः स्वरेण हसति च । स दिनेशं कथयति, "त्वं मूर्खोऽसि । कोऽपि बुद्धिमान् वल्कलं स्यूते संस्थापयति ? किमुत अवकरसङ्कलकोऽसि ?" दिनेशस्तस्य कारणं विजयमुपदिशति । स न केवलं वल्कलमपितु अन्यदवकरजातमपि खोलिकायां कदापि न क्षिप्तुं परामृशति । तथा कृते जलं दूषितं भवति, जलचरा म्रियन्ते, पर्यावरणञ्च विनश्यतीति स तर्कयति । दिनेशोऽन्यान् जलाशयानपि न दूषयितुं विजयं सचेष्टं कारयति । विजयो दिनेशस्य कथनं सत्यं न वेति शङ्कते । दिनेशो भूयोऽपि जलस्य स्वच्छीकरणस्यौचित्यं प्रतिपादयति । स जलं जीवनमुच्यते इति प्रमाणं पुरस्करोति । यत्र जलं दूषितं तत्रास्माकं जीवनमपि प्रदूषितमिति दिनेशो विजयं स्मारयति । दिनेशस्य कथनं विजयस्य हृद्गतं भवति । विजयोऽतःपरं कुत्रापि कदापि जलं न दूषयितुं प्रतिजानीते । स मित्राणि परिवारांश्च जलस्वच्छीकरणस्य महत्त्वं बोधयितुं तत्परो भवति । दिनेशस्तवोत्साहं मामतिशयं प्रीणातीति निगद्य विजयं प्रशंसति ।

## १५. योगाचार्यस्य कथनस्य सारांशं लिखत ।

## १६. श्रुतस्याधीतस्य वा कस्यापि संस्कृतनाटकस्य वस्तु सङ्क्षेपेण लिखत ।

## १७. कथाकाव्याभ्यां नाटकस्य भिन्नत्वद्योतकानि कानिचन चत्वारि तत्त्वानि परिचाययत ।

दशमः पाठः

# विरूपाक्षोद्धारः

ब्रह्मणः स्वायम्भुवमनुरजायत । ततो मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वशिष्ठः, दक्षः, भृगुः, नारदश्चेति दश ऋषयो जनिं लेभिरे । एतेषु मरीचेः सुपुत्रो नेमुनिः कौशिकीनद्यास्तटे तपोलीन आसीत् । एकदा अस्तङ्गच्छति सवितरि कश्चन कुष्ठी आगत्याश्रुभिर्भूमिं निषिच्य च मुनिं सभक्ति प्रणनाम, समीपं तूष्णीं तस्थौ च । तपो विरम्य मुनिस्तं जनं पप्रच्छ- "कोऽसि ? कुत इहागतः ? रुग्णो दुर्बलश्च दृश्यसे । वनमिदं भयदैर्जन्तुभिर्भरितमस्ति । तेभ्यो मनागपि न बिभेषि ? कथं कुष्ठी अभूः ? यज्ञोपवीतं धरन्नपि कथमेनावस्थामाप्नोः ? कथं मुखं मलिनम् ?"

व्यथितमनाः स जगाद- "भगवन् ! अन्तर्वेदीनाम्नि नगरे विशालकुले जातो विरूपाक्षनामा ब्राह्मणोऽहम् । धर्मशर्मणः सूनुरस्मि । पूर्वजन्मविपाकेन पापाचारोऽभवम् । वैदिककुले जातोऽपि धर्मकर्मभ्यो विरतोऽभवम्, वेदशास्त्रमत्यजम्, दुस्सङ्गतिमाचरम्, सुरापानमांसभक्षणादिदुराचारेषु मतिमददाम् । स्वेच्छाचारिण्याः पत्न्याः पापं मामितोऽपि पापगर्तमेव न्यपातयत् । सर्वाण्यङ्गानि पापलिप्तानि सन्ति । सर्वेषां घृणापात्रमहमेवाभवम् । बान्धवा मां कठोरैर्वचोभिर्भृशमनिन्दन् । सहसा कुष्ठी चावर्ते । काले व्यतीते दुराचारैः सलज्जो वैराग्यमानसश्च दुर्मतिमतीं पत्नीं स्ववंशञ्च परित्यज्य देशाद् बहिर्निष्क्रान्तोऽस्मि, निष्प्रयोजनमितस्ततः परिभ्रमामि च । तत्पीडादंशनेनावनीं भ्रामं भ्रामं हिमालयं चाप्नवम् । भाग्यवशादिदानीं भवत्सन्निधौ प्राप्तोऽस्मि । भवतो दर्शनेनात्मानं धन्यं मन्ये ।

हे विभो ! अतीव भीतोऽस्मि । कथमसोढव्यात् पापान्मुक्तो भविष्यामि ? पापाग्नौ दग्धोऽस्मि, दुःखोदधौ निमज्जितोऽस्मि । मां मुक्तेरुपायं दर्शय, उपदेशस्य कृपातन्तुना प्रबाध्योद्धर ।"

विरूपाक्षस्य वृत्तान्तमाकर्ण्य द्रवितहृदयः सिद्धर्षिर्मन्द्रस्वरेणोवाच- "वत्स ! त्वं सत्यमवदः । त्वं पाप एव, पापचारी चैवासि । पूर्वजन्मविपाकेन पापोऽभवः, नात्र शङ्कालेशः । समेषां पापानां विनाशाय तीर्थस्थलानि भ्रम । तीर्थजलनिषेवणेन सर्वाणि पापानि विनश्यन्ति । शिवलिङ्गानां दर्शनेन बहूनि पातकानि प्रयान्ति । शिवलिङ्गानि स्पृश, ततः पुराकृतेभ्यः पापेभ्यो मुक्तिमवाप्स्यसि ।"

विरूपाक्षस्य हृदि कापि कदापि भगवच्छ्रद्धा न विविदे, न च स तीर्थाटनं दानं यज्ञानुष्ठानञ्च कदाचिच्छुश्राव । तमसावृतमानसः स ससङ्कोचं मुनिं भूयोऽपि प्रार्थयामास- "हे हितावह ! मुनिवर ! पूर्वं कस्मिन् तीर्थे कदा स्नातव्यम् ? केन विधिना लिङ्गानि स्पृश्यन्ते ? कथं स्नाप्यन्ते पूज्यन्ते च ? हे शुभोपदेशक ! एतत्सर्वं मामुपदिश ।"

विरूपाक्षस्य हृदीषत् परिवर्तनमभिजानन्नेमुनिरुवाच- "प्रथमं स्नायाः । ततः शरीरे भस्मलेपनं विधाय रुद्राक्षं धर । सन्ध्यावन्दनमाचर्य सभक्ति लिङ्गं पूजय । सायं दीपं प्रज्वाल्य आरात्रि जागरणं विधाय भक्तिभावनया लिङ्गानां कथां शृणु । इह मम तपःक्षेत्रे सार्धकोटित्रयं, सहस्रं, पञ्चशतञ्च तीर्थानि सन्ति । अत्र देवता-दानव-गन्धर्वैर्वरप्राप्तये पूजितानि चतुःषष्टिर्लिङ्गानि च विराजन्ते ।

तात ! मया पालितो ममैव नाम्ना प्रसिद्धश्च नेपालः पुण्यभूमिर्वर्तते । देव्याः प्रसादादत्रानेकानि तीर्थस्थलानि प्रादुर्बभूवुरिति जानीहि । वत्स ! पुरतः पावनी कौशिकीनदी विद्यते । तत्र सभक्ति स्नाहि । तत आदिलिङ्गं कुशेश्वरं सविधि सश्रद्धं समर्चय । तदनन्तरं मां सहैव नीत्वान्यत्र गच्छ । यत्र यत्र तीर्थानि सन्ति तत्र तत्र स्नानं कुरु । तत्रत्यानि लिङ्गानि नित्यशो भक्त्या प्रपूजय । तेषु तीर्थेषु भक्तिभावेनात्मनि भगवन्तं शिवं सन्धार्योपविशतात् । निष्पापः पूर्णमनोरथश्च भक्तो भविष्यसि, ईप्सितमुत्तमं वरमपि लप्स्यसे ।"



विरूपाक्षो नेमुनेरेतच्छ्रुत्वा सविधि तदुपदेशमनुसृत्य तानि तीर्थानि गत्वा सस्नौ । स माघकृष्णचतुर्दश्यां मघानक्षत्रस्य दिने स्वस्पृहाप्रदे दुर्गातीर्थनाम्ना प्रसिद्धे तीर्थे स्नानं चकार । यथोपदेशं पञ्चोपचारैः सविधि शिवमन्त्रमुच्चार्य सभक्त्यादिलिङ्गं पूजयाञ्चकार । दीपं प्रज्वाल्य रुद्रमन्त्रं जपित्वा च यामिनीमपि

यापयाञ्चकार । शनैः शनैरुदितभक्तिमानसः स नेमुनिं तीर्थानां लिङ्गानाञ्च माहात्म्यं पप्रच्छ- "महात्मन् ! श्रुतिभिश्चोदितं यद् - धीमता दान-धर्मोपवासादिकर्माणि कर्तव्यानि येन कर्म सफलं स्यात् । सतां धीमताञ्च वाक्यं श्रोतव्यं तदनुरूपं कर्म च समाचरितव्यम् । हे मुनीश्वर ! पूर्वं तत्तत्तीर्थानां माहात्म्यं शुश्रूषुरस्मि । तदनन्तरमेतल्लिङ्गस्य माहात्म्यं तत्त्वञ्च श्रोतुमीहे । एतस्यां सुनद्यां पूर्वं केन सविधि सुस्नातम् ? स किं फलमाप ? मामचिराद् वद ।"

विरूपाक्षस्य पिपृच्छां निशम्य मुदितमनाः सिद्धर्षिः प्रोवाच- "एतस्मिन् तीर्थे द्वन्द्वभावं विसृज्य गङ्गाभावमुद्भाव्य चैकचित्तेन स्नातव्यम् । ततस्तस्याखिलानि कर्माणि सफलानि भवन्ति । एतत्तीर्थजलाप्लवादाजन्म स्वकृतेभ्यः पापेभ्यो महापातकेभ्यश्च नरस्तत्क्षणं मुक्तिमाप्नोति । लिङ्गस्पर्शनादशेषाः प्राणिनो भुक्तिं मुक्तिञ्च लब्ध्वाऽऽशु मनः काङ्क्षाञ्च पूरयन्ति । देव्याः स्वेदजायाः कौशिकीनद्या लीलावत्याश्च सङ्गमस्थलेऽस्मिन् दुर्गातीर्थमास्ते यत्र स्नानमात्रेणापि सकला मनोरथाः पूर्णा भवन्ति ।

हे ब्राह्मण ! यत् प्रकाम्य येऽत्र सभक्ति सस्नुस्ते देव्यनुग्रहेण पूर्णकामा अभवन् । एतत्तीर्थे पूर्वं देवा दैत्यैस्सह कठोरयुद्धेन विजयाप्तये स्नात्वा लिङ्गमपूजयन् । दानवाश्च स्वविजयप्राप्तये दुर्गातीर्थे स्नात्वाऽऽदिलिङ्गमानर्चुः । लब्धवरा देवा दानवाश्च मिथो युयुधिरे । देव्याः खड्गप्रहारेण दानवाः परमपदमापुः । हे द्विज ! देव्या निहतेषु दैत्येषु इन्द्रादिदेवाः स्वर्गे चिरं मुदा निष्कण्टकं राज्यं चक्रुः ।

सिद्धर्षयो देवाः पिशाचा उरगा राक्षसाश्च स्नात्वा सभक्ति लिङ्गमिदं पूजयाञ्चक्रुः । कौशिकीजले कृतस्नानाः सिद्धा आदिलिङ्गं सम्पूज्याऽऽशु सुसिद्धिञ्चापुः । पुरात्र ब्रह्मा शैलान् स्रष्टुं रहसि शङ्करं दध्यौ । ततः समुद्भवं लिङ्गमिदमादिलिङ्गमिति प्रख्यापितम् ।"

ततोऽपगतकलुषमानसो विरूपाक्षोऽवशिष्टानि त्रिषष्टिं शिवलिङ्गानि द्रष्टुमियेष । स स्वकामनां नेमुनिमुवाच । स मुनेः सम्मत्या तेनैव साकं तदर्थं बभ्राम । स मुनेः सङ्गत्या तानि शिवलिङ्गवन्ति तीर्थस्थलानि पर्याट, तत्र तत्र स्नानञ्च चकार । शिवलिङ्गानि प्रपूज्य नेमुनितस्तेषामाराधनपरायणानां भक्तानां कथां शुश्राव । पर्यन्ते भगवतः शिवस्य कृपया सर्वेभ्यः पापेभ्यो व्याधिभ्यश्च मुक्तिमवाप्य सुखेन तस्थौ ।

## अभ्यासः

१. पाठस्य विपुलतममनुच्छेदं परिचित्य तत्र प्रयुक्तानां वाक्यानां सङ्ख्यां श्रावयत ।

२. पाठस्य प्रथमादनुच्छेदादव्ययपदानि अन्विष्य वदत ।

३. अधोलिखितानां खण्डितपदानां संयोजकानि पाठस्थपदानि कथयत

(क) कथम्, एनाम्, अवस्थाम्, आप्नोः

(ख) तत्पीडादंशनेन, एव, भ्रामं भ्रामम्

(ग) प्रसादात्, अत्र, अनेकानि

(घ) च, एकचित्तेन

(ङ) स्नात्वा, आदिलिङ्गम्, आनर्चुः

(च) सुसिद्धिम्, च, आपुः

४. क्रियापदानां धातून् कथयत

तस्थौ, निषिच्य, विविदे, स्नाप्यन्ते, विराजन्ते, उपविशतात्, सस्नौ, पप्रच्छ, ईहे, दध्यौ, इयेष ।

५. अधोलिखितैः पदैर्युतानि पाठस्थवाक्यानि निगदत

जनिम्, दृश्यसे, अभूः, पापलिप्तानि, धन्यम्, दुःखोदधौ, पुराकृतेभ्यः, पावनी, शुश्रूषुः, युयुधिरे, निष्कण्टकम्, रहसि ।

६. अधोलिखितं गद्यांशं विश्लिष्य त्रिषु वाक्येषु कथयत

देव्याः स्वेदजायाः कौशिकीनद्या लीलावत्याश्च सङ्गमस्थलेऽस्मिन् दुर्गातीर्थमास्ते यत्र स्नानमात्रेणापि सकला मनोरथाः पूर्णा भवन्ति ।

७. सङ्क्षेपेणोत्तरयत

(क) नेमुनिः क आसीत् ?

(ख) विरूपाक्षः पूर्वं कानि दुष्कर्माणि चकार ?

(ग) नेमुनिर्विरूपाक्षं किं पप्रच्छ ?

(घ) केन सकला मनोरथाः पूर्णा भवन्ति ?

(ङ) आदिलिङ्गस्य प्रख्यापनस्य कारणं किम् ?

(च) पर्यन्ते विरूपाक्षः कीदृशो बभूव ?

## ८. अधोलिखितावनुच्छेदौ पठित्वा विरूपाक्षस्य चरितस्य तोलनं कुरुत

पूर्वजन्मविपाकेन पापाचारोऽभवम्, वैदिककुले जातेऽपि धर्मकर्मभ्यो विरतोऽभवम्, वेदशास्त्रमत्यजम्, दुस्सङ्गतिमाचरम्, सुरापानमांसभक्षणादिदुराचारेषु मतिमददाम् । स्वेच्छाचारिण्याः पत्न्याः पापं मामितोऽपि पापगर्तमेव न्यपातयत् । सर्वाण्यङ्गानि पापलिप्तानि सन्ति । सर्वेषां घृणापात्रमहमेवाभवम् । बान्धवा मां कठोरैर्वचोभिर्भृशमनिन्दन् । सहसा कुष्ठी चावर्ते । काले व्यतीते दुराचारैः सलज्जो वैराग्यमानसश्च दुर्मतिमतीं पत्नीं स्ववंशञ्च परित्यज्य देशाद् बहिर्निष्क्रान्तोऽस्मि, निष्प्रयोजनमितस्ततः परिभ्रमामि च । तत्पीडादंशनेनावनीं भ्रामं भ्रामं हिमालयं चाप्नवम् ।

शनैः शनैरुदितभक्तिमानसः स नेमुनिं तीर्थानां लिङ्गानाञ्च माहात्म्यं पप्रच्छ- "महात्मन् ! श्रुतिभिश्चोदितं यद् धीमता दान-धर्मोपवासादिकर्माणि कर्तव्यानि येन कर्म सफलं स्यात् । सतां धीमताञ्च वाक्यं श्रोतव्यं तदनुरूपं कर्म च समाचरितव्यम् । हे मुनीश्वर ! पूर्वं तत्तत्तीर्थानां माहात्म्यं शुश्रूषुरस्मि । तदनन्तरमेतल्लिङ्गस्य माहात्म्यं तत्त्वञ्च श्रोतुमीहे । एतस्यां सुनद्यां पूर्वं केन सविधि सुस्नातम् ? स किं फलमाप ? मामचिराद् वद ।"

## ९. गद्यांशं सम्पठ्य तदनुवर्तिनः प्रश्नानुत्तरयत

तात ! मया पालितो ममैव नाम्ना प्रसिद्धश्च नेपालः पुण्यभूमिर्वर्तते । देव्याः प्रसादादत्रानेकानि तीर्थस्थलानि प्रादुर्बभूवुरिति जानीहि । वत्स ! पुरतः पावनी कौशिकीनदी विद्यते । तत्र सभक्ति स्नाहि । तत आदिलिङ्गं सविधि सश्रद्धं समर्चय । तदनन्तरं मां सहैव नीत्वान्यत्र गच्छ । यत्र यत्र तीर्थानि सन्ति तत्र तत्र स्नानं कुरु । तत्रत्यानि लिङ्गानि नित्यशो भक्त्या प्रपूजय । तेषु तीर्थेषु भक्तिभावेनात्मनि भगवन्तं शिवं सन्धार्योपविशतात् । निष्पापः पूर्णमनोरथश्च भक्तो भविष्यसि, ईप्सितमुत्तमं वरमपि लप्स्यसे ।

(क) 'तात' इति पदेन कः सम्बोधितः ?

(ख) को नेपालमपालयत् ?

(ग) किं ज्ञातव्यम् ?

(घ) आत्मानं सहैव नेतुं क आदिशत् ?

(ङ) ईप्सितमुत्तमं वरं कथं लभ्यते ?

## १०. व्याख्यां कुरुत

सतां धीमताञ्च वाक्यं श्रोतव्यं तदनुरूपं कर्म च समाचरितव्यम् ।

## ११. अधोलिखितयोर्गद्यखण्डयोः कतरः साहित्यिकोऽस्तीति निश्चित्य तस्य साहित्यिकत्वं प्रमाणयत

नेपालोऽस्माकं भूरस्ति । भूरियं प्रसिद्धा पावनी चास्ते । नेपालस्यास्तित्वं सत्ययुगादेव वरीवर्ति । स्कन्दपुराणस्य हिमवत्खण्डानुसारेण सत्ययुगे नेपालः सत्यवत्युच्यते स्म । त्रेतायां तपोवनं, द्वापरे मुक्तिसोपानं कलौ च नेपालः प्रोक्त इति तत्र प्रमाणं प्राप्यते । इदानीं देशोऽयमेसियामहादेशे विराजते । एतस्योत्तरदिशि बहवो हिमालयाः सन्ति । अनेनैव हेतुना देशोऽयमाविश्वं हिमालयीयराज्यञ्चोच्यते । दक्षिणभागे समतलं तराईमधेसक्षेत्रं वर्तते । नेपालः पूर्व-पश्चिम-दक्षिणदिक्षु भारतेनोत्तरदिशि चीनदेशेन च परिवेष्टितोऽस्ति । अत्र बहुजाति-भाषा-धर्म-संस्कृति-परम्पराणां समन्वयो विद्यते येनास्माकं सहास्तित्वस्य भावना विशदीभवति । एतद्देशे जलविद्युदुत्पादनस्य पर्यटनप्रवर्धनस्य च प्रभूता सम्भावना वर्तते । नेपालोऽनादिकालतः स्वतन्त्र आसीदस्ति च ।

नेपालगौरवमनुभूय भूयो भूयो हृदयमुल्लसितं भवति । नेपालावनिं विलोक्य वसन्तर्तुरत्रैव राजते । शरत्सरितश्चेतो हरन्ति । तदैवेयं सस्यशालिनी धरा मानुषाणां मानसमाकर्षति । किन्न शोभनं शरदि ? नीलगगनं महार्णव इव प्रतिभाति । पर्वत-तराईभागयोर्हरितवनं विभाति यदवलोक्य मोदते मे मनः प्रतिपलम् । नेपालस्य समेषु चेतनाचेतनेषु मदीयासीमस्नेहधारा प्रवहति । इयमस्ति कोटिशो देवीदेवतानामावासभूमिः । पशुपतिर्नेपालं पाति । बुद्धो नः शान्तिमुपदिशति । पञ्चशीलानुशीलनेनास्माकं जीवनं सुखेनैति यद् बुद्ध एव प्रत्यपादयत् । नेपालो मां सदैव प्रीणाति, सत्कर्मणि प्रेरयति च । अहं प्रतिदिनं जननीं जन्मभूमिञ्चाभिवन्द्याभिनन्द्य च हर्षमनुभवामि ।

## १२. नेपालस्य किञ्चनैतिह्यमाश्रित्यानुच्छेदमेकं रचयत ।

## १३. शिक्षकस्य कस्यचन विज्ञस्य वा साहाय्येन पुराणाश्रितां कर्तव्यबोधिकां कथां लिखत ।

## १४. आत्मना दृष्टं किञ्चन प्राकृतिकरम्यरूपं साहित्यिकरीत्या वर्णयत ।

## एकादशः पाठः

# वाङ्मयसेवी टीकारामोऽधिकारी

नेपालस्य संस्कृतसाहित्योपासकेषु टीकारमोऽधिकारी लब्धप्रतिष्ठः प्रतिभासम्पन्नश्चासीत् । काव्यानि स्फुटकविताश्च विरचय्य ग्रन्थसम्पादनकौशलं प्रदर्श्य चासौ संस्कृतवाङ्मयनिधौ महद्योगदानं व्यदधात् । नेपालिभाषायामपि कविता-खण्डकाव्य-महाकाव्यानि विरचय्य टीकारामो यशः समार्जत् । असौ धार्मिक-साहित्यिक-सांस्कृतिक-सामाजिक-सामयिकविषयानवलम्ब्य पारेशतं लेखनिबन्धान् व्यरचयत् । अस्य विदुषः काव्यनैपुण्यद्योतकान्यानि कार्याण्यपि सन्ति ।

टीकारामः २००७ वैक्रमाब्दस्य आषाढमासस्य १७ दिवसे पितुः पण्डितस्य देवीप्रसादाधिकारिणो मातुः प्रेममायाधिकारिणश्च द्वितीयसन्तते रूपेण तात्कालिकगण्डक्यञ्चलस्य (सम्प्रति गण्डकीप्रदेशस्य) लमजुङजनपदान्तर्गतस्य गोर्जेग्रामस्य षष्ठवडाक्षेत्रवर्तिनि बगालेथोकखानेपानीटोलस्थाने जात आसीत् । असौ मध्यमवर्गीये ग्रामीणकृषकपरिवारे जनिमलभत । अस्य परिवारः सनातनवैदिकधर्मानुयायी आसीत् । तस्य गृहे ग्रामे च सततं धार्मिकानुष्ठानानि सम्पाद्यन्ते स्म । असौ पैतृक-पारिवारिकपरम्परया सुसंस्कारमन्वसरत् । ग्रामीणजीवनमस्मै अतीव रोचते स्म । नदी-तडाग-पर्वत-हिमालय-पशुपक्षि-वृक्षवनस्पति-सस्यक्षेत्राणि निभाल्य स पुलकितो जायते स्म येन कविहृदये काव्याङ्कुर आहित आसीत् ।

टीकारामस्य शिक्षापि गृहादेव प्रारभत । पिता देवीप्रसादो रुद्री-वेद-सप्तशत्यमरकोश-लघुकौमुद्यादीन् संस्कृतस्य प्रारम्भिकविषयान् साधु जानाति स्म । बाल्यवयसि टीकारामोऽनौपचारिकरूपेण पितुः सकाशादेतान् विषयानध्यगच्छत् । अस्याक्षरारम्भः षण्णां वर्षाणां वयसि खटिकया पट्टिकायां लेखित्वा पण्डिताच्चिरञ्जीव्यधिकारिणोऽभवत् । टीकारामस्यौपचारिकशिक्षा २०१४ विक्रमवर्षे सप्तवर्षाणां वयसि ग्रामस्यैव भाषापाठशालातः प्रारब्धा आसीत् ।

टीकाराम उच्चशिक्षावाप्तये २०२१ विक्रमवर्षे पितृव्यकल्पेन राधाकृष्णाधिकारिणा साकं वाराणसीमगच्छत् । स तत्रत्यान्मङ्गलागौरीनेपालिसंस्कृतमहाविद्यालयाद् २०२२ विक्रमाब्दे सम्पूर्णपूर्वमध्यमपरीक्षायां प्रथमश्रेण्यामुत्तीर्णोऽभवत् । ततोऽसौ वाराणसेयसंस्कृतविश्वविद्यालयाद् (सम्प्रति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयनाम्ना प्रसिद्धात्) २०२४ वैक्रमाब्दे उत्तरमध्यमस्तरीयां, २०२६

वर्षे शास्त्रिस्तरीयाञ्च परीक्षां प्रथमश्रेण्यामुत्तीर्णवान् । २०३० विक्रमवर्षे टीकारामो वाराणसीवर्तिनो नेपालिसंस्कृतमहाविद्यालयात् साहित्यविषये प्रथमश्रेण्यामाचार्यपरीक्षामपि पारमगच्छत् । वाराणस्यां संस्कृतस्यौपचारिकाध्ययनं समाप्यासौ काष्ठमण्डपमागच्छत् । वाल्मीकिविद्यापीठे प्राध्यापनावस्थायामेव टीकारामः २०३५ वैक्रमाब्दे त्रिभुवनविश्वविद्यालयान्नेपालिविषये द्वितीयश्रेण्यां स्नातकोत्तरस्तरमुत्तीर्णवान् । २०५४ विक्रमवर्षे महेन्द्रसंस्कृतविश्वविद्यलयात् (साम्प्रतिकाद् नेपालसंस्कृतविश्वविद्यालयात्) **पण्डितराजरङ्गनाथपौड्यालस्य व्यक्तित्वकृतीनां समीक्षात्मकमध्ययनम्** इति विषयेऽसौ विद्यावरिध्युपाधिमलभत ।

टीकारामः संस्कृते द्वे काव्ये, एकं कवितासङ्ग्रहञ्च व्यरचयत्, एकस्य ग्रन्थस्य सम्पादनञ्चाकरोत् । **चन्द्रप्रभा** टीकारामस्य प्रथमं संस्कृतकाव्यं वर्तते । २०५८ वैक्रमाब्दे प्रकाशितेऽस्मिन् काव्ये खाँचीराज्यस्य राजपुत्र्या चन्द्रप्रभया गोरखाराज्यस्य राज्ञा नरभूपालशाहेन सह विवाहानन्तरं महाराज्ञीतोऽपि धीमत्या मातृ रूपेण निर्व्यूढा कुशलभूमिकात्र सम्यग् वर्णितास्ति । चन्द्रप्रभया सपत्न्याः कौशल्याया जाताय राजकुमाराय पृथ्वीनारायणशाहाय राजकुलानुकूलशिक्षासंस्कारौ प्रदाय योग्यराजस्य रूपेण यद् व्यक्तित्वं निर्मितं तदेव मूलवस्तु कविना प्रतिपादितं वर्तते । ऐतिह्यचरितवदिदं नायिकाप्रधानं काव्यमस्ति । १९५ पद्यैः संरचितं काव्यमेतन्नार्योऽपि नेपालराष्ट्रनिर्माणाय महत्त्वाधायिनीं भूमिकामूहुर्भूयोऽपि वक्ष्यन्ति चेति कविदर्शनमावहति । काव्यमिदं टीकारामस्य प्रबन्धकाव्यरचनासामर्थ्यञ्च पुष्णाति ।



**गोविन्दचरितामृतम्** वाराणस्यामपि आचार्यरत्नस्य गोविन्दकविराजस्य नाम्ना च लब्धप्रतिष्ठस्य नेपालिविदुषो गाविन्दप्रसादसुवेदिनः स्मृतौ रचितं खण्डकाव्यं वर्तते । सुवेदी प्राध्यापकः, साहित्यकारः, शिक्षासेवी चासीत् । स वाराणस्यामधीयानानां नेपालिविद्यार्थिनामभिभावकत्वञ्च निरवहत् । खण्डकाव्यमिदं सुवेदिनं नायकमवलम्ब्य शास्त्रीयच्छन्दसां ३३५ पद्यैः संरचितं विद्यते । षोडशसु भागेषु विभक्तमिदं काव्यं गोविन्दस्य सकलं जीवनचरितं विशदीकरोति । **चन्द्रप्रभा** चन्द्रप्रभां नायिकामवलम्ब्य, **गोविन्दचरितामृतम्** गोविन्दं नायकं प्रकल्प्य च काव्यप्रणयनात् टीकारामस्य उभौ वर्गौ प्रति समानसम्मानभावोऽभिव्यज्यते ।

**पद्यपुष्पाञ्जलिः** विभिन्नेषु शास्त्रीयच्छन्दस्सु रचितानां त्रिंशतः स्फुटकवितानां सङ्ग्रहो वर्तते । कविता भक्तिस्तवकः शृङ्गारस्तवकः करुणास्तवकश्चेति कृत्वा त्रिधा विभक्ताः सन्ति । नामानुसारेण भक्तिस्तवके देश-भाषेश्वर-कविसाहित्यकार-विश्वविद्यालयान् प्रति भक्तिश्रद्धे प्रकटिते स्तः । शृङ्गारस्तवके प्रकृते रम्यरूपं वर्णितमस्ति चेद्देशभक्तिभावश्चोल्लसितो दृश्यते । करुणास्तवके पृथिव्यामुत्पन्ने पीडावेदनेऽभिव्यज्य सहकार्यं विदधानानां विदुषामवसानजशोकोद्गारो व्यक्तोऽस्ति ।

गण्डकीनदी, एतस्या उद्गमविन्दुः, प्रवहणस्थलम्, सङ्गमक्षेत्रञ्च सातिशयं पवित्राणि मन्यन्ते । भगवतो विष्णोर्गण्डस्थलादुत्पत्तेर्हेतोर्नदीयं भागीरथीसमास्तीति जना विश्वसन्ति । एतस्या निर्गमनस्थानं पर्वतो वा मुक्तिक्षेत्रनाम्ना प्रसिद्धं वर्तते । गण्डक्यास्तटभूमिर्मुमुक्षूणामाश्रयस्थलं मतमस्ति । अशेषा देवताः शालग्रामस्य रूपेण गण्डक्या गर्भस्थलमधिवसन्तीति पौराणिकवचो वर्तते । विश्वस्य एतस्या जलममृतादपि मधुरमितीतिवृत्तमुपलभ्यते । आविश्वं केवलं गण्डकी शालग्रामवती नदी वर्तते । इयं हि नदी पुरा ब्रह्म-विष्णु-महेश्वर-राम-सीतादिदेवदेवीनाम्, पुलस्त्य-पुलह-वशिष्ठादिब्रह्मर्षीणाम्, प्राचीनकालस्य भरतादीनाम्, मध्यकालस्य मुकुन्दसेनप्रभृतीनाञ्च राजर्षीणां तपस्थलं साधनास्थलञ्चासीत् । गण्डक्या न केवलं दर्शनेन, पानेन, स्नानेनैव अपि तु स्मरणमात्रेण चाक्षय्यं पुण्यं मिलतीति पौराणिकवचो लभ्यते । एतादृश्या अनुपममहत्त्वशालिन्या गण्डक्याः स्तवनं महिमवर्णनञ्च नैकस्थानेषु प्राप्यते । एतेषु **गण्डकीमाहात्म्यम्** मौलीभूतं दृश्यते ।

**गण्डकीमाहात्म्यम्** गण्डकीक्षेत्रस्य काश्यपगोत्रीयविदुषा पण्डितेन काशीरामसूरिणास्य क्षेत्रस्य धार्मिकपौराणिकमाहात्म्यं प्रवर्ण्य विरचिता कृतिरस्ति । अस्य ग्रन्थस्य रचनाकालः १७७१ विक्रमसंवत्सरो मन्यते । योगिनरहरिनाथप्रभृतिविद्वद्भिः सम्पादितस्य **हिमवत्खण्डस्य** परिशिष्टभागे समाविष्टेयं कृतिः प्रथमवारं २०१३ वैक्रमाब्दे वाराणसीतः प्रकाशिताऽऽसीत् । तदेयमपरिष्कृतमूलपाठस्य रूपेण सुषुप्तावस्थायामासीत् । अस्य ग्रन्थस्यापरप्रतिरूपं नेपालसंस्कृतविश्वविद्यालयस्य प्राध्यापकेन दुर्गादत्तशर्मोपाध्यायेन साकञ्चासीत् । टीकारामः संस्करणद्वयमेवाधृत्य, नेपालिभाषायां विस्तरेण भूमिकां विलिख्यानुवाद-संशोधन-पाठान्तरनिश्चयन-टिप्पणी-स्पष्टीकरणानि समाविश्य च ग्रन्थममुं समपादयत् । महेन्द्रसंस्कृतविश्वविद्यालयेन २०५५ विक्रमवत्सरे प्रकाशितस्यैतस्य ग्रन्थस्य भूमिकाभागो मूलपाठानुवादौ चेत्याहत्य द्वौ खण्डौ स्तः । भूमिकाभागे द्वादशशीर्षकाणि सन्ति । एतेषु गण्डक्या उत्पत्तिमारभ्य गण्डकीक्षेत्रस्य भूभागाः, कृतेः स्वरूपम्, रचयिता, रचनाकालः, विषयवस्तु, प्रतिपादितं मुख्यक्षेत्रम्, देवीदेवताः, पाण्डुलिपिः, भाषाप्रयोगः, धार्मिकमहत्त्वञ्चोपयोगश्च, साहित्यिकवैशिष्ट्यम्, दार्शनिकप्रभावः, अन्यदपूर्णगण्डकीमाहात्म्यम्, गण्डकीस्तोत्रसहितो निष्कर्षश्च समाविष्टाः सन्ति । प्रमाणपुष्ट्या प्रस्तुतोऽयं भागोऽनुसन्धानमूलको वर्तते । मूलपाठोऽनुवादभागश्चैकादशक्रमं यावदेकादशसु अध्यायेषु ग्रथितौ स्तः । द्वादशक्रमे सहायकसामग्र्यः सन्निविष्टा वर्तन्ते । ८०९ श्लोकेषु विरचितेऽस्मिन् ग्रन्थे टीकारामस्य सम्पादननैपुण्यम्, वैदुष्यमनुसन्धानमूलकदृक्कोणश्च परिलक्ष्यन्ते । नेपालगौरवाधायिन्या गण्डक्या महिमद्योतकं ग्रन्थरत्नं सम्पाद्य टीकारामेणोपकार एव कृतोऽस्ति ।

टीकारामस्य काव्यकवितासु प्रभूतं काव्यसौन्दर्यं विभाति । छन्दःसिद्धिरलङ्कृतिविच्छित्तिश्चास्य वैशिष्ट्यं वर्तते । वीर-शृङ्गाररसाधानेऽस्य कवेः प्रावीण्यं दृश्यते । प्रसादगुणो वैदर्भीरीतिश्च काव्यस्य सारल्यं लालित्यञ्चानुभावयति । संस्कृतकाव्यशास्त्रस्य वैदुष्यं टीकारामस्य कृतिषु दृष्टिगतं भवति । मौलिकरचनासु सम्पादितग्रन्थे च नेपालिभाषायामपि भावार्थः समाविष्टो वर्तते तेन संस्कृतेतरभावकपाठकानां कृते विषयबोधाय सौकर्यं जायते ।

टीकारामः संस्कृतस्य प्रथितयशसोर्गद्यपद्यकाव्ययोरनुवादञ्चाकरोत् । **प्रणयमेधा** (२०६१) महाकविकालिदासकृतस्य **मेघदूतस्य** पूर्वमेघस्य समश्लोकी भावानुवादोऽस्ति । सप्तषष्ट्या श्लोकैर्विरचितमिदं काव्यं सप्तविंशत्यां शीर्षकेषु आबद्धमस्ति । **यक्षसुन्दरी** (२०६३) उत्तरमेघस्य समश्लोकी अनुवादो वर्तते तत्र द्वापञ्चाशत् श्लोकाः सन्ति । अस्य वस्तु दशविषयक्रमेषु निबद्धमास्ते । **उज्जयिनीको राजघराना** (२०६१) महाकवेर्बाणभट्टस्य **कादम्बरी**गद्यकाव्यस्योज्जयिनीवर्णनस्य पद्यमयो भावानुवादो वर्तते । अष्टादशशीर्षकेषु चतुर्षूपशीर्षकेषु च मूलकाव्यस्य वस्तु विन्यस्तमस्ति । गद्यस्य वस्तु छन्दोबद्धपद्येषु यथावदनूद्य टीकारामेणानुवादशिल्पञ्च सन्दर्शितं वर्तते ।

टीकारामो नेपालिभाषायामपि गीत-कविता-काव्यानि व्यरचयत् । २०२० वैक्रमाब्दादेव टीकारामस्य साहित्यिकपुस्तकप्रकाशनक्रमः प्रारभत । असौ सप्त प्रबन्धकाव्यानि प्रणीतवान् । एतेषु षट् खण्डकाव्यानि वर्तन्ते, एकं महाकाव्यञ्चास्ति । **प्रणयसुधा** (२०६३) टीकारामस्य प्रथमं खण्डकाव्यं वर्तते । **पञ्चगङ्गा** (२०६९) पञ्चानां खण्डकाव्यानां सङ्ग्रहोऽस्ति । अत्र **कूजन** (२०२४), **आस्तिक र नास्तिक** ( २०२५), **सम्झना** (२०२६), **आँसु र कवि** (२०२७), **अचला** (२०६३) चेति शीर्षकाणां काव्यानि सन्ति । **विश्वम्भरा** (२०७२) टीकारामस्य एककं महाकाव्यं वर्तते । सहस्रेण पञ्चाशदधिकशतेन च श्लोकैर्विरचितेऽस्मिन् महाकाव्ये चतुर्विंशतिः सर्गाः सन्ति । नेपाले सञ्चलितस्य दशवर्षीयद्वन्द्वस्य करालावस्थां महाकाव्यं यथायथं चित्रयति । पौरस्त्यमहाकाव्यशास्त्रीयसरणिमनुसृत्य विरचितेनानेन महाकाव्येन देशे शान्तिस्थापनस्य सन्देशः प्रवाहितो वर्तते । टीकारामस्य नेपालिभाषायाः खण्डकाव्यं महाकाव्यञ्च समाश्रित्य नेपालसंस्कृतविश्वविद्यालयाद् विद्यावारिध्युपाधिनिमित्तक्रमनुसन्धानयपि सम्पन्नमस्ति ।

**कवितासङ्गम** (२०४४), **प्रेयसीका परेली** (२०६४), **कल्पनाका छाल** (२०७२) चेति नेपाल्यां टीकारामस्य त्रयः कवितासङ्ग्रहाः सन्ति । विविधेषु छन्दःसु प्रणिता इमाः कविता राष्ट्रप्रेम-देशभक्ति-नारीप्रेम-प्रकृतिप्रेम-संस्कृति-समाजसुधार-राष्ट्रनिर्माणप्रभृतिविषयान् सुष्ठु वर्णयन्ति । टीकारामः पत्रसाहित्यं, संस्मरणञ्चालिखत् । असौ काव्याभिनन्दनं लेखितुमपि पटुरवर्तत ।

टीकारामः समालोचकोऽपि आसीत् । **महाकवि कालिदास** (२०४०) अस्य प्रथमं समालोचनात्मकपुस्तकं वर्तते । अस्मिन् महाकवेः कालिदासस्य जीवनचरितं कृतित्वञ्च विश्लिष्टमस्ति । कालिदासस्य काव्यनाटकानि संस्कृतकाव्यशास्त्रीयदृशा विविच्य टीकाराम आत्मानं समालोचकमसाध्नोत् । **पं. कुलचन्द्रगौतम र उनको साहित्य-साधना** (२०५६) टीकारामस्यापरः प्रौढसमालोचनाग्रन्थो वर्तते । एतदीये ग्रन्थेऽसौ विद्वच्छिरोमणेः कुलचन्द्रगौतमस्य जीवनचरितं व्यक्तित्वञ्च परिचाय्य तदीयकृतीः शोधसरण्या व्यचर्चयत् । एतस्यां कृतौ एकतो गौतमस्य साहित्यिक-समालोचनात्मक-वैदुष्यपूर्णं व्यक्तित्वं प्रकाशं नीतमस्ति चेदपरतष्टीकारामस्यानुसन्धित्सुव्यक्तित्वञ्चोद्दीप्तं दृश्यते । विश्वविश्रुतमहाकविं कालिदासं नैपालकाप्रतिमसंस्कृतविद्वन्मनीषिणं गौतमञ्च प्रतिनिधिपात्रं विचित्य तयोर्व्यक्तित्वं कृतित्वञ्च सानुसन्धानं विश्लिष्य च टीकारामो लब्धख्यातिः समालोचकोऽभवत् ।

टीकारामेण विविधविषयकाः शताधिका लेखा लिखिताः सन्ति । असौ समाजस्य परिस्थितिं राजनीतेर्गतिञ्च प्रति सचेष्टः संवेदनशीलश्च बुद्धिजीवी आसीत् । धर्म-संस्कृति-भगवद्भक्ति-राष्ट्रियमूल्यमान्यतास्तस्य हृदि स्थिरं प्राविशन् । एताभिरेवासौ निर्दिष्ट आसीत् । इमा मान्यता मूलमाश्रित्य टीकारामः पारेशतं लेखनिबन्धान् व्यरचयत् । अनेन लेखकस्य रूपेणापि परिचितोऽजायत ।

टीकारामो विद्यालयात् शिक्षणसेवां प्रारभत । २०२१ विक्रमवर्षेऽध्ययनाय वाराणसीप्रस्थानात् पूर्वमसौ स्वस्यैव ग्रामस्य विद्यालये कतिचित्समयं यावन्निम्नमाध्यमिकस्तरस्य शिक्षणमकरोत् । २०३० विक्रमवर्षे वाराणसीतः साहित्याचार्यपरीक्षां प्रथमश्रेण्यामुत्तीर्यासौ नेपालं प्रत्यावर्तत । तस्यैव वर्षस्य भाद्रमासे टीकारामो वाल्मीकिविद्यापीठे साहित्यविषयस्य सहायकप्राध्यापकपदे नियुक्तिमलभत । तत उपप्राध्यापक-सहप्राध्यापक-प्राध्यापकपदं निरूह्य २०६९ विक्रमवर्षस्य आषाढमासस्य सप्तदशदिवसादसौ प्राध्यापनसेवातो निवृत्तोऽभवत् । असौ त्रिभुवनविश्वविद्यालय-नेपालसंस्कृतविश्वविद्यालययोः समग्रत ३८ वर्षाणि, १० मासान्, दिनद्वयञ्च यावत् सेवामकरोत् । सेवावधौ टीकारामो विद्यापीठस्य साहित्यशिक्षणविभागस्याध्यक्षपदमवहत् । सेवानिवृत्त्यनन्तरमपि आचार्य-विद्यावारिधिस्तरयोश्छात्राणां शोधार्थिनाञ्च निर्देशकविशेषज्ञयोर्दायित्वं प्रापूरयत् । संस्कृत-नेपालिसाहित्यसेवाञ्च सततं व्यदधात् ।

टीकारामः स्वदेशे विदेशे च समायोजितासु विचारगोष्ठीषु कार्यपत्राणि विचारपत्राणि च प्रस्तुत्य विद्वत्वं प्रादर्शयत् । असौ साहित्यं प्रविविक्षून् नवसर्जकान् सोत्साहं प्रैरयत् । साहित्यसंगोष्ठीषु विशेषज्ञस्य मूल्याङ्कनकर्तुश्च रूपेण नवोदितस्रष्ट्रून् जागरूकानकारयत् ।

टीकारामस्य विवाहः २०२४ विक्रमवर्षेऽध्ययनावस्थायामेव वाराणस्यामाचार्यरत्नस्य कविराजस्य गोविन्दसुवेदिनो दमयन्तीसुवेदिनश्च द्वादशवर्षीयया ज्येष्ठसुपुत्र्या विश्वेश्वर्या सह सम्पन्न आसीत् । टीकारामदम्पत्योः पुत्रौ तिस्रः पुत्र्यश्च सन्ति । विश्वेश्वरी महिलाविकासाधिकृतपदे संस्थाय सर्वकारमसेवत ।

टीकारामः परिवारेण साकमुषित्वा साहित्यं विरचय्य अन्यानि प्रज्ञासाधनकार्याणि च कुर्वन्नासीत् । असौ २०७६ विक्रमवर्षस्य ज्येष्ठमासस्य त्रयोदशे दिवसे सहसासहजावस्थामन्वभवत् । तत्कालं चिकित्सालयं नीत्वा सघनोपचारकक्षे संस्थाप्योपचारप्रबन्धनं विहितं सदपि तस्मिन् सुधारो न दृष्टः । २०७६ विक्रमाब्दस्य ज्येष्ठमासस्य पञ्चदशदिवसेऽपराह्णस्य ४:२५ वादनेऽचेतनावस्थायामेवासौ दिवङ्गतवान् ।

टीकारामस्य सुकार्याणि सद्गुणाश्चास्मान् सदैव प्रेरयन्ति । साहित्यसेवा, प्रज्ञासाधना, प्राध्यापनकौशलम्, सौम्यं निश्छलञ्च व्यक्तित्वम्, शिष्टव्यवहारः, सरलं जीवनयापनम्, परोपकारपरायणहृदयम्, उत्प्रेरयित्री वृत्तिश्चास्माद् विदुषोऽधिगन्तुं शक्यन्ते ।

## अभ्यासः

### १. पदविच्छेदं कुरुत

चेद्देशभक्तिभावश्चोल्लसितः, साहित्यिकपुस्तकप्रकाशनक्रमः, संस्कृतकाव्यशास्त्रीयदृशा, नैपालकाप्रतिमसंस्कृतविद्वन्मनीषिणम्, साहित्यशिक्षणविभागस्याध्यक्षपदमवहत्, संस्थाप्योपचारप्रबन्धनम् ।

### २. अर्थं कथयत

समार्जत्, खटिकया, पट्टिकायाम्, सौकर्यम्, समश्लोकी, हृदावर्जकतया, करालावस्था, असाध्नोत्, पटुः, नवोदितस्रष्टॄन् ।

### ३. विग्रहं प्रदर्शयत

संस्कृतसाहित्योपासकेषु, औपचारिकशिक्षा, राजकुलानुकूलशिक्षासंस्कारौ, सहायकग्रन्थसूच्या, साहित्याचार्यपरीक्षा, अचेतनावस्थायाम्, परोपकारपरायणहृदयम् ।

### ४. वाक्येषु प्रयोगं कुरुत

सम्पाद्यन्ते, सस्यक्षेत्राणि, मौलीभूतम्, प्रणीतम्, बाहुल्येन, प्रविविक्षुः अकारयत्, सहसा ।

### ५. अधोलिखितं पाठांशं पठित्वा पृष्टान् प्रश्नानुत्तरयत

गण्डकीनदी, एतस्या उद्गमविन्दुः, प्रवहणस्थलम्, सङ्गमक्षेत्रञ्च सातिशयं पवित्राणि मन्यन्ते । भगवतो विष्णोर्गण्डस्थलादुत्पत्तेर्हेतोर्नदीयं भागीरथीसमास्तीति जना विश्वसन्ति । एतस्या निर्गमनस्थानं पर्वतो वा मुक्तिक्षेत्रनाम्ना प्रसिद्धं वर्तते । गण्डक्यास्तटभूमिर्मुमुक्षूणामाश्रयस्थलं मतमस्ति । अशेषा देवताः शालग्रामस्य रूपेण गण्डक्या गर्भस्थलमधिवसन्तीति पौराणिकवचो विश्वस्य एतस्या जलममृतादपि मधुरमितीतिवृत्तमुपलभ्यते । आविश्वं केवलं गण्डकी शालग्रामवती नदी वर्तते । इयं हि नदी पुरा ब्रह्म-विष्णु-महेश्वर-राम-सीतादिदेवदेवीनाम्, पुलस्त्य-पुलह-वशिष्ठादिब्रह्मर्षीणाम्, प्राचीनकालस्य भरतादीनाम्, मध्यकालस्य मुकुन्दसेनप्रभृतीनाञ्च राजर्षीणां तपःस्थलं साधनास्थलञ्चासीत् । गण्डक्या न केवलं दर्शनेन, पानेन, स्नानेनैव अपि तु स्मरणमात्रेण चाक्षयं पुण्यं मिलतीति पौराणिकवचो लभ्यते । एतादृश्या अनुपममहत्त्वशालिन्या गण्डक्याः स्तवनं महिमवर्णनञ्च नैकस्थानेषु प्राप्यते ।

(क) गण्डकी कुत उत्पन्ना वर्तते ?

(ख) मुमुक्षूणामाश्रयस्थलं कुत्रास्ति ?

(ग) शालग्रामः कासां स्वरूपं मन्यते ?

(घ) पुरा गण्डक्यां के तपश्चक्रुः ?

(ङ) कैः कर्मभिरक्षयफलं मिलति ?

६. अधोलिखितस्य गद्यांशस्य सारांशं लिखत

टीकारामः संस्कृतस्य प्रथितयशसोर्गद्यपद्यकाव्ययोरनुवादञ्चाकरोत्। **प्रणयमेधा** (२०६१) महाकविकालिदासकृतस्य **मेघदूतस्य** पूर्वमेघस्य समश्लोकी भावानुवादोऽस्ति। सप्तषष्ट्या श्लोकैर्विरचितमिदं काव्यं सप्तविंशत्यां शीर्षकेषु आबद्धमस्ति। **यक्षसुन्दरी** (२०६३) उत्तरमेघस्य समश्लोकी अनुवादो वर्तते यत्र द्वापञ्चाशत् श्लोकाः सन्ति। अस्य वस्तु दशविषयक्रमेषु निबद्धमास्ते। **उज्जयिनीको राजघराना** (२०६१) महाकवेर्बाणभट्टस्य **कादम्बरी**गद्यकाव्यस्योज्जयिनीवर्णनस्य पद्यमयो भावानुवादो वर्तते। अष्टादशशीर्षकेषु चतुर्षूपशीर्षकेषु चास्य मूलकाव्यस्य वस्तु विन्यस्तमस्ति। गद्यस्य वस्तु छन्दोबद्धपद्येषु यथावदनूद्य टीकारामेणानुवादशिल्पञ्च सन्दर्शितं वर्तते।

७. अधोलिखितैर्वर्षैस्सह सम्बद्धाष्टीकारामस्य जीवनघटना उल्लिखत

२००७, २०२१, २०२४, २०३०, २०५५, २०६९, २०७२, २०७६।

८. सङ्क्षेपेणोत्तरयत

(क) टीकारामः कीदृशे परिवारे जनिमलभत ?

(ख) टीकारामस्य साहित्यिकवैशिष्ट्यानि कानि ?

(ग) टीकारामस्य समालोचकव्यक्तित्वं कीदृशमस्ति ?

(घ) टीकारामस्य स्वभावः कीदृश आसीत् ?

(ङ) 'गोविन्दचरितामृतम्' इति खण्डकाव्ये किं वस्तु विन्यस्तमस्ति ?

९. गण्डक्या महत्त्वं वर्णयत।

१०. शिक्षकसाहाय्येन विद्वच्छिरोमणेः कुलचन्द्रगौतमस्य वैदुष्यं प्रकाशयत।

११. स्वपरिचितस्य संस्कृतस्य नेपालिभाषाया वा कस्यचन साहित्यकारस्य व्यक्तिवृत्तं निर्माय कक्षायां विमृशत।

# अश्वघोषस्य परिचयः

संस्कृतसाहित्यपरम्परायां कालिदासस्येव महत्त्वमादधानो महाकविरश्वघोषः कालिदासादपि प्राक्तन आसीत् । "आर्यसुवर्णाक्षीपुत्रस्य साकेतस्थभिक्षोराचार्यभदन्ताश्वघोषस्य महाकवेर्वादिनः कृतिरियम्" इत्येषा सौन्दरनन्दस्थिता पङ्क्तिरश्वघोषविषये त्रीणि तथ्यानि समुद्घाटयति- अश्वघोषस्य मातुर्नाम सुवर्णाक्षी आसीत्, अस्य निवासस्थानं साकेतनगरी आसीत्, असौ बौद्धदीक्षादीक्षितो भिक्षुरासीदिति । क्षेमेशचन्द्रचट्टोपाध्यायः नैजे 'डेट अफ कालिदास' इति नाम्नि ग्रन्थे कालिदासाश्वघोषयोः कृतीनां विशदां तुलनां कृत्वा कालिदासपरवर्तिनमश्वघोषं स्वीकरोति । रमाशङ्करतिवारी कालिदासमश्वघोषपरवर्तिनं स्वीकरोति । प्रो.इ.वी.कावेलप्रभृतयः पाश्चात्या विद्वांसोऽपि कालिदासस्य पूर्ववर्तिनमेवाश्वघोषं प्रमाणयन्ति । चीनीययात्री इत्सिङ्गोऽश्वघोषं नागार्जुनात् पूर्ववर्तिनं मनुते । तन्मतानुसारेण कनिष्कस्य समकालिको बौद्धानां शून्यवादस्य प्रवर्तकश्चाश्वघोषो नागार्जुनात् पूर्वं ख्रिष्टाब्देः प्रथमशताब्द्यामभूत् । चीनदेशीयानां तिब्बतदेशीयानाञ्च परम्परानुसारेणाश्वघोषः कनिष्कस्य सभापण्डित आत्मीयो गुरुश्चासीत् । कनिष्केणायोजितस्य चतुर्थबौद्धसङ्गीतेरयमाचार्य आसीदिति विचारकाणामैतिह्यविदां दृढं मतमास्ते । अश्वघोषस्य कृतिषु ब्राह्मणधर्मस्य वैदिकधर्मस्य बौद्धधर्मस्य च विशदं वर्णनमवाप्यते इति कृत्वा काव्येतिहासविदः प्रागयं वैदिको ब्राह्मण आसीदित्यनुमानं कुर्वन्ति । अश्वघोषस्य चतुरस्रा प्रतिभा तस्य धर्मदर्शनसाहित्यसङ्गीतकलादिविषयान् व्याप्नोति स्म । तस्य सङ्गीताभिज्ञताया विषये तु एषा किंवदन्ती एव श्रूयते - एकदा मगधेश्वरसमक्षमश्वघोषस्य सङ्गीतं श्रुत्वा बुभुक्षिता अपि अश्वास्तृणभक्षणं विहाय स्तब्धकर्णाः सन्तश्चित्रलिखिता इवाभूवन् । तस्मादेव कालादश्वघोषः 'अश्वघोषः' इति नाम्ना प्रथितोऽभूत् । तदनन्तरमस्य वास्तविकं नाम विलुप्तमभूदिति ।

कालिदासस्य **रघुवंश-कुमारसम्भव**महाकाव्ययोरश्वघोषस्य **बुद्धचरित-सौन्दरनन्द**महाकाव्ययोः प्रभावोऽस्तीति काव्यालोचकाः प्रतिपादयन्ति । एवमेवाश्वघोषविरचितस्य **शारिपुत्रप्रकरण**मिति नाटकस्य प्रभावः कालिदासस्य नाटकेषु चास्तीति तेषामनुमानमस्ति । अश्वघोषस्य नाम्नि त्रीणि ग्रन्थरत्नानि प्रसिद्धानि सन्ति संस्कृतवाङ्मये - बुद्धचरितम्, सौन्दरनन्दम्, शारिपुत्रप्रकरणञ्चेति । चीनतिब्बतदेशयोः परम्परानुसारेण तूपर्युक्तग्रन्थव्यतिरिक्ताः सूत्रालङ्कारः, महायानश्रद्धोत्पादसंग्रहः, वज्रसूचिकोपनिषत्, गाण्डीस्तोत्रगाथा चेति चत्वारो ग्रन्था अपि अश्वघोषकृता एव सन्ति । एतेषां चतुर्णां हस्तलेखाः (पाण्डुलिपयः) चीनतिब्बतदेशयोः सुरक्षिताः सन्ति ।

बुद्धचरितमष्टाविंशतिसर्गेषु निबद्धं महाकाव्यमस्ति । साम्प्रतमेतद् भागद्वये प्रकाशितमुपलभ्यते । पञ्चमे ईशवीये शतके धर्मरक्षो नाम कश्चिद् भारतीयः पण्डितः काव्यमिदं दरद (चीनी) भाषायामनूदितवान् । अष्टमशतके त्रिविष्टपीयभाषायामपि तस्यानुवादोऽभवत् । एतावनुवादौ साम्प्रतमुपलभ्येते । अनूदितं काव्यमिदं जान्स्टनोनामा आङ्ग्लविद्वान् आङ्ग्लभाषायामनुववाद । काव्यस्यास्य हिन्दीभाषायां योऽनुवादो लभ्यते स आङ्ग्लभाषात एव कृतो वर्तते । बौद्धसंसारे बुद्धचरितमत्यधिकं लोकप्रियतामगमत् । यात्री

इत्सिङ्गो लिखति यद् भारतस्य पञ्चसु प्रदेशेषु दक्षिणसागरतटवर्तिषु द्वीपेषु (देशेषु) सर्वत्र बुद्धचरितं गीयत इति ।

बुद्धचरिते अष्टाविंशत्यां सर्गेषु भगवतो बुद्धस्य जन्मन आरभ्य महापरिनिर्वाण-धातुविभाजनपार्यन्तिका विषयाः प्रतिपादिताः सन्ति । अश्वघोषस्य भगवति बुद्धे द्रढीयसी भक्तिरासीत् । अतस्तस्य भक्तिप्रवणं मनो लोककल्मषहरं बुद्धस्य पवित्रं चरित्रं गातुं काव्यमसृजत् । सर्वत्रैव संसारे बुद्धस्य सिद्धान्ता उपदेशाश्च प्रसृताः स्युर्येन लोकोऽयं भद्रं पश्येत्, भद्रं शृणुयात्, भद्रञ्च आचरेदित्येव तस्य काव्यरचनाया उद्देश्यमवर्तत । प्रकाण्डपण्डितत्वाद् दर्शनशास्त्रनिष्णातत्वाच्च स भगवतो बुद्धस्योपदेशानामन्तराले जनहितमीक्षितुं क्षिप्रतयैव क्षमो बभूव । बुद्धचरितस्य द्वादशसर्गो बौद्धदर्शनस्य सिद्धान्तान् प्रस्तौति । न वपुषा न च वचसा कोऽपि प्राणी कदापि पीडनीयः, वाणी छलेन न दूषणीया, शरीरवचनयोः पावनतैवात्मसंयमस्य द्वारमित्येवंविधानि भूयिष्ठानि चरित्रनिर्माणकारीणि वाक्यानि तस्य कवितायां प्रतिपदं शोभन्ते ।

नूनमश्वघोषस्य रचनाः कवित्वकलाचमत्कृतिलोलाः सन्ति । तासामुद्देश्यं दुःखान्तेभ्यो भोगविलासेभ्यो मानवमाकृष्य तस्य त्यागतपःपरोपकारादिसद्गुणान् प्रति उन्मुखीकरणं वर्तते । वयं तत्र कवेः सत्यसुन्दरानुभूतीनां दर्शनमवाप्नुमः, बौद्धधर्मस्योदारदृष्टिं निभालयामः, जीवनशक्तिं विलोकयामः, हृदयाकर्षणस्य चाश्चर्यकारिणीं क्षमतां विन्दामः । स दार्शनिकेषु महान् दार्शनिकः, कविषु च महान् कविरपि बभूव । तदीयासु काव्यरचनासु दार्शनिकतायाश्छटा निविडा, वैदिकपौराणिकैतिहासिकविचाराणां घटाश्च मञ्जुला उद्वेल्लन्त्यो विलोक्यन्ते तदा तत्सत्त्वता तु काव्यकृतेर्भूषणमेव न च दूषणम् । ललितकाव्यरचनायां काव्ये रसभावरीतिगुणालङ्काराणां विधाने चायं कालिदासापरपर्याय इवानुभूयते । स रसं साधनत्वेन मेने न च साध्यत्वेन । बौद्धधर्मे समुपदिष्टं निर्वाणं कविः शान्तरसाभिव्यञ्जकं विधाय सदृष्टान्तमित्थं प्रस्तौति–

**दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम् ॥**
**तथा कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काञ्चिद् विदिशं न काञ्चित् क्लेशक्षयात् केवलमेति शान्तिम् ॥**

## बुद्धचरितमहाकाव्यस्य प्रथमसर्गस्य कथासारः

### बुद्धजन्म

इक्ष्वाकुवंशे शुद्धोदनो नाम इन्द्रतुल्यपराक्रमो लोकप्रियो भूपतिर्बभूव । तस्य शचीसदृशी मायादेवीनाम्नी पत्नी बभूव । सा लक्ष्मीरिव सुन्दरी पृथिवीव धीरा चासीत् । राजा शुद्धोदनो यदा तया सह विपिने विजहार तदा सा गर्भवती जाता । गर्भधारणात् पूर्वमेकस्यां रात्रौ स्वप्ने राज्ञी मायावती धवलवर्णं गजराजं स्वस्य शरीरं प्रविशन्तं विलोकितवती । देवतुल्यस्य तस्य राज्ञः शुद्धोदनस्य गर्भेण वंशवैभवं दधाना राज्ञी मायादेवी गर्भधारणान्नैव श्रान्ता, न च शोकाकुला, न वा मोहं प्राप्ता । सा तस्मिन् काले पवित्रभावेन केवलं वनं

गन्तुमियेष । सा तदा तपस्यानुकूलां बहुविधवृक्षव्याप्तां लुम्बिनीं नाम वनभूमिं गन्तुं वाञ्छति स्म । तदर्थं सा राजानं प्रार्थितवती च । स्वपत्न्या भावं धार्मिकप्रवृत्तिं च ज्ञात्वा हर्षकौतुकसमन्वितो राजा तस्मात् पुण्यनगरात् केवलं पत्नीं तोषयितुं निर्गतः ।

निकटप्रसवसमया मायादेवी विपिने सहस्राधिकाभिर्नारीभिः संसेव्यमाना आसीत् । शुभे पुष्यनक्षत्रे मायादेव्याः पार्श्वभागाद् लोककल्याणकारी पुत्रः समुत्पन्नः । यथा और्वस्य जन्म ऊरोरभवत्, पृथोर्जन्म हस्तादभवत्, इन्द्रतुल्यमान्धातुर्जन्म शिरसः अजायत, कक्षीवतोर्जन्म स्कन्धप्रदेशादजायत तथैव बुद्धस्य जन्म मातुः पार्श्वभागादभूत् ।



### बुद्धजन्मनो दिव्यप्रभावः

सद्यः समुत्पन्नोऽयं बालको गगनतलात् पतितो नक्षत्रविशेष इव द्युतिमान् भूत्वा विराजते स्म । तेजसि धैर्ये च स बालो भूमौ निपतितः सूर्य इव सुशोभते स्म । अतितेजस्वी सन्नपि नयनानां कृते स शीतलश्चन्द्र इव स्पृहणीय आसीत् । यथा सूर्यो दीपप्रभां तिरस्करोति तथैव स बालोऽपि स्वस्य शरीरकान्त्या दीपकान्तिं तिरस्करोति स्म । समुज्ज्वलाङ्गोऽयं बालकः सर्वाः काष्ठा विद्योतयति स्म । स बालकः सप्तर्षितारा इव सर्वप्रथमं सप्त पदानि ययौ । मृगेन्द्रगामी स बालकश्चतस्रो दिशो विलोक्य भविष्यदर्थगुम्फितां वाणीं जगाद- “अहं लोकहितार्थं ज्ञानार्जनं विधातुं समुत्पन्नोऽस्मि । इदं ममान्तिमं जन्म भविष्यति ।” तस्मिन् काले चन्द्रकिरणनिर्मले उष्णे शीतले चोभे जलधारे गगनतलात् निपतिते । ते च शरीरस्पर्शसुखप्रदानाय

तस्य मस्तके पेततुः । अदृश्यतयोपस्थिता देवाश्च तत्र गगने तस्य बालस्य प्रभावात् तस्मै बुद्धत्वप्राप्तये आशिषं ददति स्म । नागास्तस्योपरि व्यजनानि चालयन्ति स्म, भक्तिविशेषकारणाद् विलक्षणनेत्रैस्तं विलोक्य पारिजातकुसुमानि वर्षन्ति स्म । बुद्धजन्मनि भूमिः पवनाहता तरणिरिव कम्पते स्म । मेघरहिताद् गगनतलाच्च सुगन्धियुतानां कमलपुष्पाणां वृष्टिर्भवति स्म । तस्मिन् समये स्पर्शसुखा वायवो दिव्यानि वस्त्राणि भूमौ पातयन्तो वान्ति स्म । सूर्यश्च तदवधावधिकं विदिद्युते । प्रज्वालितोऽप्यग्निः सौम्यशिखाभिः प्रजज्वाल । आवासभूमेरुत्तरतः स्वयमेव कूपाः समुत्पन्नाः । तत्र आकालिकी पुष्पवृष्टिश्च भवति स्म । तत्रानेके विघ्नकराः प्राणिन उपस्थिताः परं ते परस्परं न पीडयन्ति स्म । तस्मिन् संसारे प्रयत्नमन्तरा एव मनुष्याणां रोगाः शान्ता अभवन् । तदवधौ हरिणपक्षिगणा मधुरं ध्वनिं कुर्वन्ति स्म । नद्यो मन्दं मन्दं प्रवहन्ति स्म । सर्वा दिशा निर्मला बभूवुः । निर्मले निर्मेघे च गगने दुन्दुभिध्वनयः श्रूयन्ते स्म । जगतो मोक्षाय भगवति बुद्धे जाते सति निखिलमशान्तं जगत् शान्तं बभूव । यथा नीतिमन्तं शासकमवाप्य अव्यवस्थितं राज्यं व्यवस्थितं भवति तथैव बुद्धजन्मना सकलमपि जगत् स्वतः शान्तं बभूव । एकं कामदेवं विहाय तस्मिन् समये सर्वे शान्ताः प्रसन्नाश्च आसन् ।

## पुत्रविषये चिन्ताकुलस्य शुद्धोदनस्य ब्राह्मणादिभिः सान्त्वनम्

पुत्रस्यालौकिकं जन्म विलोक्य धैर्यवानपि राजा शुद्धोदनो विक्षोभं लेभे । अतिशयपुत्रप्रेम्णा तस्य नयनयोस्त्रासहर्षजन्यं वारिधारायुगलं सहसैव पपात । नयनयोस्त्रासस्य उष्णा, हर्षस्य च शीता अश्रुधारा प्रवहति स्म । बुद्धमाता मायादेवी च बालकस्यालौकिकीं शक्तिं ज्ञात्वा सहजतयैव दयार्द्रहृदया सती हर्षान्विता त्रासान्विता च जाता । अतस्तस्या अपि नयनयोः शीतोष्णमिश्रा जलधारा प्रवहति स्म । तदा लोका राजानं शुद्धोदनमूचुः - "भो राजन् ! भवदीयोऽयं कुमारो निखिलवंशस्यैव दीपकोऽस्ति । तस्मादस्य जन्मन उपलक्ष्ये नृत्यगीतवाद्यादिहर्षोत्सवकार्याणि विधेहि । भो राजन् ! एष तव कुमारो लोकनायको भूत्वा निखिलसंसारस्य दुःखभञ्जको भविष्यति । अतश्चिन्तां विहाय प्रसन्नो भव । अनेन बालकेन तव वंशो वृद्धिभागी जातो वर्तते । भो राजन् ! सुवर्णवर्णः सर्वशुभलक्षणसम्पन्नस्तेजस्वी अयं त्वदीयः कुमारो गुणानामाकरोऽस्ति । भविष्यति कालेऽयं निश्चप्रचमेव बुद्धर्षिभावं प्राप्स्यति, अन्यथा विश्वसम्राड् भविष्यति । यदि चायं बालो मोक्षपथमनुसरिष्यति तदा स्वकीयतत्त्वज्ञानबलेन सर्वान् मतवादान् पराजित्य सम्मानितो भविष्यति ।

प्राक्तनसमये भृगुरङ्गिराश्च राजशास्त्रं निर्मातुं समर्थौ नास्ताम् । परमर्वाक्तनकाले तयोः सुतौ शुक्रो बृहस्पतिश्च तच्छास्त्रं रचयामासतुः । सारस्वतो विनष्टं वेदं ददर्श जगाद च । तत्पूर्वभवाः ऋषयो वेदं न ददृशुः, न वा जगदुः । एवमेव शक्तिमान् वेदव्यासस्तं वेदं पुनर्विविधभागेषु व्यभजत् । परमशक्तो वशिष्ठस्तत्कर्तुमसमर्थो जातः । महर्षिर्वाल्मीकिः सर्वप्रथमं पद्यानि सृष्ट्वा रामायणं प्रणिनाय परं तत्पूर्वजश्च्यवनो महर्षिस्तत्कर्तुमसमर्थः । एवमेवात्रेयेण यच्चिकित्साशास्त्रं निर्मितं तन्निर्मातुं तत्पूर्वजो महर्षिरत्रिर्नितान्तमसफलः । पूर्वजन्मा कुशिकः स्वजीवने द्विजत्वं प्राप्तुं समर्थो नाभवत् । परं पश्चाज्जातो

गाधिसुतो विश्वामित्रः स्वजीवने द्विजत्वमधिगन्तुं समर्थो जातः । एवमेव राजा सगरः समुद्रस्य तटसीमानं निश्चयीकर्तुं सामर्थ्यं लेभे, एतत्कार्यं तत्पूर्वजैरिक्ष्वाकुभिर्नैव विहितमासीत् । राजा जनको योगविधौ ब्राह्मणानामपि गुरुत्वमगमत्, परं तथाकर्तुं तत्पूर्वजा असमर्था एवाभवन् । शूरवंशोद्भवस्य भगवतः कृष्णस्य यानि विश्वविख्यातानि कार्याणि सन्ति तादृशानि कार्याणि विधातुं तत्पूर्वभवाः शूरवंशीया राजानो नितान्तमसमर्थाः । अतो न वयः, न चान्वयः प्रमाणभावं व्रजति । अस्मिन् संसारे स्वनिहितप्रतिभाव्युत्पत्ति-प्रभृतिगुणानां कारणेन कोऽपि जनः कस्मिँश्चिदपि विषये श्रेष्ठतामधिगन्तु प्रभवति । यतो हि नृपाणां मुनीनाञ्च पुत्रैस्तानि तानि कार्याणि विहितानि सन्ति यानि तत्पूर्वजैर्नैव विहितानि प्राप्यन्ते ।" इत्थं विश्वसनीयेभ्यो ब्राह्मणेभ्य आश्वासनमभिनन्दनञ्च सम्प्राप्य राजा मनसोऽनिष्टामाशङ्कां विहायातितरां प्रसन्नो जातः, पुत्रजन्मोत्सवं चकार, द्विजेभ्यो धनानि च ददौ ।

## बुद्धं द्रष्टुं महर्षेरसितस्यागमनम्

एकदा महर्षिरसितो नवजातं बालकं बुद्धं द्रष्टुं समागतः । शुद्धोधनः सोपचारैः स्वागतवचनैस्तं पूजयामास । असितोऽतितरां प्रसन्नो जातः । राजा चाङ्के स्थितं कुमारमादाय महर्षिं दर्शयामास । तत्पश्चादसितो राजकुमारं सम्यग् विलोकयामास । तस्य पादयोश्चक्रचिह्नानि आसन्, हस्तयोरङ्गुलिषु चानेकभाग्यरेखाजालानि आसन्, भ्रुवौ घनरोमकृष्णौ आस्ताम्, जननेन्द्रियञ्च हस्तिवस्तिकोशतुल्यं गुप्तमासीत् । देव्याः क्रोडे स्थितमग्निपुत्रमिव धात्र्याः क्रोडे स्थितममुं बालकं विलोक्य महर्षेर्नयने हर्षाश्रुभिर्भरिते । राजा तं पप्रच्छ- "भो महर्षे भवन्नयनयोरश्रूणि किमर्थमागतानि ? भगवन् ! अपि चायं बालो दीर्घायुर्भविता ? अपि चायं बालो मम शोकाय समुत्पन्नः ? अपि चायं बालो मम जलाञ्जलिं तु न पास्यति ? कच्चिदयं बालोऽल्पायुरस्ति ? अपि च मम यशोभाण्डागारतया विराजमानोऽयं कुमारोऽक्षयोऽस्ति ? अपि मम वंशहस्ते राज्यं स्थिरमस्ति ? शयनकालेऽपि पुत्रस्य कृतेऽनावृतैकचक्षुरहं किं ससुखं परलोकं गन्तुं प्रभविष्यामि? अपि चायं मदीयो वंशाङ्कुरोऽपुष्पमेव शुष्कतां गमिष्यति ? भगवन् यथाशीघ्रं ब्रूहि । आशङ्काकारणान्मदीयं मनो नितान्तं क्षुब्धं वर्तते । पितरि कियान् पुत्रस्नेहो भवतीति विषये भवानेव यथेष्टं जानाति ।" तच्छ्रुत्वाऽसितो जगाद- "राजन् ! बुद्धिमन्यथा मा विधेहि । अस्यानिष्टविकारो लवमात्रेणापि मयि नास्ति । आत्मानं वञ्चितं ज्ञात्वाऽधुनाहं क्षुब्धोऽस्मि । मम परलोकगमनकालः समीपेऽस्ति परं बालोऽयं सद्यः समुत्पन्नोऽस्ति । बालोऽयं भविष्यति जन्ममरणयोर्विषये दुर्लभोपायान् ज्ञास्यति । परमनेनास्य ज्ञानेनाहं सर्वथा वञ्चितो भविष्यामि । राज्यं परित्यज्य विषयेषु वैराग्यमास्थाय कठोरतपसा तत्त्वज्ञानं विधाय लोकेऽस्मिन् मोहान्धकारमपाकर्तुमयं ज्ञानस्वरूपः (बुद्धरूपः) श्रीसूर्य आविश्वं प्रज्ज्वलिष्यति । बुद्धरूपां धर्मनदीमयं तृष्णाकुलः संसार आतृप्तिं पास्यति । यथा मार्गभ्रष्टं कमपि पथिकं लोका मार्गं प्रदर्शयन्ति तथैवायं बालकः सांसारिकरोगवार्धक्याज्ञानपीडितेभ्यो जनेभ्यः मुक्तेर्मार्गं प्रदर्शयिष्यति । धर्मराजोऽयं स्नेहपाशैः परितो बद्धस्य पीडातिशयेन निरीहस्य च निराधारस्य संसारस्य बन्धनं मोचयिष्यति । अतो हे राजन् ! भवानस्य विषये शोकं मा कुरु ।"

महर्षेरसितस्यैतादृशीं परमार्थप्रकाशिकां वाणीं श्रुत्वा विषादं परित्यज्य नरेन्द्रः प्रसन्नो बभूव । मम तनय एतादृशोऽस्तीति विचार्य स्वात्मनि गौरवमनुबभूव । मदीयोऽयं तनय आर्षजीवनं यापयिष्यतीति तत्त्वज्ञानेन राजा क्षणाय स्वकीयं हृदयं चिन्ताकुलं विदधे । अस्मै भूपालाय धर्मपक्षः प्रियो नासीदिति विषयो न परमस्य प्रवृत्तिमार्गाभावाद् वंशविनाशो भविष्यतीति भीतिर्नरपतिं शुद्धोदनं चिन्ताकुलं चकार । ततः प्रत्यागतेऽसिते स मार्गे स्वकीयं भगिनीपुत्रं ददर्श, अपि च दययार्द्रहृदयः स प्रियतनयमिव तं बुद्धवचनश्रवणार्थं तदनुरूपाचरणार्थञ्च नियोजयामास । पुत्रजन्मनि राज्ञो दानादि कार्याणि, नगरीप्रवेशश्च सुतजन्महृष्टो भूपतिश्च विविधप्रकरणेषु गृहीत्वा कारागारे स्थापितान् वन्दिजनान् बन्धनान्मोचयित्वा स्वकुलपरम्परानुरूपमेव पुत्रस्य जातकर्म सम्पादयामास । दशसु दिनेषु व्यतीतेषु राजा शुद्धोदनः पुत्रस्य परमकल्याणाय जपहोमादीनि माङ्गलिकानि देवकार्याणि सम्पादयामास । तदवसरे पुत्रवृद्धये स बहुक्षीरा गा ब्राह्मणेभ्यो ददौ । तदनन्तरञ्च स्वकीयां नगरीं प्रवेष्टुं मतिं दधौ । राजा शुद्धोदनः प्रथमं वृद्धनारीजनानुगम्यमानां तनयवतीं पत्नीं शिविकायां संस्थाप्य पुरीं प्रवेशयामास, पश्चाच्च पौरजनैः सम्पूज्यमानः स्वयञ्च प्रविवेश । राजभवनप्रवेशकाले राजा शुद्धोदनस्तथैव प्रसन्न आसीद् यथा कार्तिकेयजन्मना भगवान् शिवः प्रसन्न आसीत् । बुद्धजन्मना तद् कपिलवस्तुनगरं निखिलजनपदसहितं तथैव प्रसन्नमभवद् यथा च नलकूबरजन्मनि अप्सरोगणसहिता कुबेरनगरी अलका प्रसन्नाऽऽसीत् ।

## द्वादशः पाठः

# मायावत्या गर्भधारणम्

**ऐक्ष्वाक इक्ष्वाकुसमप्रभावः शाक्येष्वशक्येषु विशुद्धवृत्तः ।**
**प्रियः शरच्चन्द्र इव प्रजानां शुद्धोदनो नाम बभूव राजा ॥१॥**

### अन्वयः

इक्ष्वाकुसमप्रभावः अशक्येषु शाक्येषु विशुद्धवृत्तः शरच्चन्द्र इव प्रजानां प्रियः शुद्धोदनो नाम ऐक्ष्वाकः राजा बभूव ।

### व्याख्या

इक्ष्वाकुसमप्रभावः- इक्ष्वाकुणा = दशरथपूर्वजेन, समः = तुल्यः, प्रभावः यस्य सः । अशक्येषु - न शक्याः अशक्याः तेषु = अजेयेषु, शाक्येषु = शाक्यवंशीयेषु। विशुद्धवृत्तः- विशेषेण शुद्धम् विशुद्धम् = अतिशयपवित्रम्, वृत्तम् = जीवनम्, यस्य सः। शरच्चन्द्रः - शरदः = शरत्कालस्य, चन्द्रः = चन्द्रमा, "हिमांशुश्चन्द्रमाश्चन्द्र इन्दुःकुमुदबान्धवः" इत्यमरः । इव =यथा । पूर्णोपमालङ्कारः । प्रजानाम्- प्रकर्षेण जायन्ते इति प्रजाः तेषाम् = जनानाम्, "प्रजा स्यात्सन्ततौ जने" इत्यमरः। प्रियः = वत्सलः। शुद्धोदनो नाम = शुद्धोदननामकः। ऐक्ष्वाकः = इक्ष्वाकुवंशीयः । राजा = नृपः, "राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः" इत्यमरः । बभूव = समुत्पन्नः ।

### भावार्थः

इक्ष्वाकुवंशे शुद्धोदनो नाम तादृशो भूपतिर्बभूव यः खलु अविजेयशाक्यवंशे इक्ष्वाकुतुल्यप्रतापी शरच्चन्द्र इव लोकप्रियश्चासीत् ।

**तस्येन्द्रकल्पस्य बभूव पत्नी दीप्त्या नरेन्द्रस्य समप्रभावा ।**
**पद्मेव लक्ष्मीः पृथिवीव धीरा मायेति नाम्नानुपमेव माया ॥२॥**

### अन्वयः

इन्द्रकल्पस्य तस्य नरेन्द्रस्य दीप्त्या समप्रभावा पत्नी बभूव । लक्ष्मीः इव पद्मा, पृथिवी इव धीरा सा माया इति नाम्ना अनुपमा माया इव बभूव ।

### व्याख्या

इन्द्रकल्पस्य = इन्द्रतुल्यस्य । तस्य नरेन्द्रस्य = तस्य भूपस्य, शुद्धोदनस्येत्यर्थः । दीप्त्या = कान्त्या । समप्रभावा, समः = तुल्यः, प्रभावः = सामर्थ्यम्, यस्या सा । पत्नी = सहधर्मिणी, "पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी" इत्यमरः । भार्या इत्यर्थः । बभूव = जाता । लक्ष्मीः = रमा, इव पद्मा = सुन्दरी । पृथिवी = पृथ्वी "गोत्रा कू पृथिवी पृथ्वी" इत्यमरः । इव = यथा । धीरा = स्थिरा, धैर्यशालिनीत्यर्थः । सा = राजपत्नी । माया = मायादेवी इति नाम्ना = अभिधेयेन । अनुपमा = अतुल्या । माया = महामाया इव । बभूव = जाता । सर्वत्रोपमालङ्कारः ।

### भावार्थः

इन्द्रतुल्यपराक्रमिणस्तस्य शचीसदृशी कान्तिमती पत्नी बभूव । मायादेवी नामिका सा लक्ष्मीरिव सुन्दरी पृथिवीव धीरा चासीत् ।

**सार्धं तयासौ विजहार राजा नाचिन्तयद्वैश्रवणस्य लक्ष्मीम् ।**
**ततश्च विद्येव समाधियुक्ता गर्भं दधे पापविवर्जिता सा ॥३॥**

### अन्वयः

असौ राजा तया सार्धं विजहार । (तदा स) वैश्रवणस्य लक्ष्मीं न अचिन्तयत् । ततश्च पापविवर्जिता सा समाधियुक्ता विद्या इव गर्भं दधे ।

### व्याख्या

असौ = अयम् । राजा = भूपः, "राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः" इत्यमरः । तया = मायादेव्या । सार्धम् = सह । विजहार = बभ्राम । तदा स वैश्रवणस्य = कुबेरस्य । लक्ष्मीम् = ऐश्वर्यम् अपि । न अचिन्तयत् = न अगणयत् । ततश्च = तदनन्तरम् । पापविवर्जिता- विशेषेण वर्जिता विवर्जिता = नितान्तं रहिता, पापेन = कल्मषेण, "पापं किल्विषकल्मषम्" इत्यमरः, विवर्जिता, पापविवर्जिता । सा = मायादेवी । समाधियुक्ता, समाधिना = योगस्य चरमावस्थया, युक्ता = सम्बद्धा, विद्या इव = ब्रह्मज्ञानमिव । गर्भम् = भ्रूणम्, "गर्भो भ्रूण इमौ समौ" इत्यमरः । दधे = धृतवती । अत्र पूर्णोपमालङ्कारः ।

**भावार्थः**

राजा शुद्धोदनो यदा तया सह विहरति स्म तदा कुबेरस्य ऐश्वर्यमपि न गणयति स्म । तदनन्तरं तादृशी निष्पापा मायादेवी समाधिसहिता विद्येव गर्भिणी जाता ।

**प्रागगर्भधानान्मनुजेन्द्रपत्नी सितं ददर्श द्विजराजमेकम् ।**
**स्वप्ने विशन्तं वपुरात्मनः सा न तन्निमित्तं समवाप तापम् ॥४॥**

**अन्वयः**

गर्भधानात् प्राक् मनुजेन्द्रपत्नी स्वप्ने एकं सितं द्विजराजमात्मनः वपुः विशन्तं ददर्श । सा तन्निमित्तं तापं न समवाप ।

**व्याख्या**

गर्भधानात्, गर्भस्य = भ्रूणस्य, धानम् = ग्रहणम्, तस्मात् । प्राक् = पूर्वम् । मनुजेन्द्रपत्नी मनुजानाम् = मनुष्याणाम्, "मनुष्या मानुषा मर्त्या मनुजा मानवा नराः" इत्यमरः, इन्द्रः = श्रेष्ठः, राजेत्यर्थः, तस्य पत्नी = भार्या । स्वप्ने = निद्रासमये, "स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि" इत्यमरः । एकम् = केवलम्, "एके मुख्यान्यकेवलाः" इत्यमरः । सितम् = धवलम् "अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः" इत्यमरः । द्विजराजम् = गजराजम् । स्वात्मनः = स्वस्य । वपुः = शरीरम्, "गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः" इत्यमरः । विशन्तम् = प्रविशन्तम् । ददर्श = दृष्टवती । सा = मायादेवी । तन्निमित्तम्, तस्य = गजराजप्रवेशस्य निमित्तम् = कारणभूतम् । तापम् = पीडाम् । न समवाप = न लेभे ।

**भावार्थः**

गर्भधारणात् पूर्वमेकस्यां रात्रौ स्वप्ने राज्ञी मायावती एकं धवलवर्णं गजराजं स्वस्य शरीरं प्रविशन्तं विलोकितवती परं तज्जन्यं कष्टञ्च सा नानुभूतवती ।

**सा तस्य देवप्रतिमस्य देवी गर्भेण वंशश्रियमुद्वहन्ती ।**
**श्रमं न लेभे न शुचं न मायां गन्तुं वनं सा निभृतं चकाङ्क्ष ॥५॥**

**अन्वयः**

गर्भेण देवप्रतिमस्य तस्य वंशश्रियम् उद्वहन्ती सा देवी श्रमं न लेभे, शुचं (न लेभे) मायां (न लेभे) । सा निभृतं वनं गन्तु चकाङ्क्ष ।

## व्याख्या

गर्भेण = भ्रूणेन । देवप्रतिमस्य- देवः = निर्जरः, "अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः" इत्यमरः, प्रतिमा = सादृश्यम्, यस्य सः, तस्य देवतुल्यस्येत्यर्थः । तस्य = शुद्धोदनस्य । वंशश्रियम्- वंशस्य = अन्ववायस्य, "वंशोऽन्ववायः सन्तानः" इत्यमरः, श्रीः = लक्ष्मीः, ताम् वंशैश्वर्यमित्यर्थः । उद्वहन्ती = धारयन्ती । सा = मायादेवी । श्रमम् = पीडाम् । न लेभे = नैव प्राप । शुचम् = शोकम् । न लेभे इति शेषः । मायाम् = मोहम् । न लेभे इति शेषः । सा = मायादेवी । निभृतम् = पवित्रभावेन । वनम् = विपिनम्, "अटव्यरण्यं विपिनं गहनं काननं वनम्" इत्यमरः । गन्तुम् = यातुम्, चकाङ्क्ष = इयेष । कामयामासेत्यर्थः । पीडादिप्रदस्य गर्भधारणरूपस्य कारणस्य सद्भावेऽपि व्यथादेः कार्यस्याम प्रतिपादनरूपो विशेषोक्तिरलङ्कारोऽत्र सङ्घटते । सति हेतौ फलाभावो विशेषोक्तिरिति लक्षणस्य सद्भावात् ।

## भावार्थः

देवतुल्यस्य तस्य राज्ञः शुद्धोदनस्य गर्भेण वंशवैभवं दधाना राज्ञी मायादेवी गर्भधारणान्नैव श्रान्ता, न च शोकाकुला, न वा मोहं प्राप्ता । सा तस्मिन् काले पवित्रभावेन केवलं वनं गन्तुमियेष ।

## अभ्यासः

### १. मधुरस्वरेण अधस्तनं पद्यमुच्चारयत

तस्येन्द्रकल्पस्य बभूव पत्नी दीप्त्या नरेन्द्रस्य समप्रभावा ।

पद्मेव लक्ष्मीः पृथिवीव धीरा मायेति नाम्नानुपमेव माया ॥

### २. अधोलिखितप्रश्नानामुत्तराणि लिखत

(क) शुद्धोदनः कीदृशो राजा आसीत् ?

(ख) शुद्धोदनस्य पत्नी कीदृशी आसीत् ?

(ग) मायादेवी कीदृशं गर्भं दधे ?

(घ) मायावती कीदृशं स्वप्नं ददर्श ?

(ङ) मायावती राज्ञा सह कुत्र गन्तुं चकाङ्क्ष ?

### ३. अधस्तनपद्यस्यान्वयं लिखत

सा तस्य देवप्रतिमस्य देवी गर्भेण वंशश्रियमुद्वहन्ती ।

श्रमं न लेभे न शुचं न मायां गन्तुं वनं सा निभृतं चकाङ्क्ष ॥

### ४. अधस्तनपद्यस्य सरलसंस्कृतभाषायां भावार्थं लिखत

सार्धं तयासौ विजहार राजा नाचिन्तयद्वैश्रवणस्य लक्ष्मीम् ।

ततश्च विद्येव समाधियुक्ता गर्भं दधे पापविवर्जिता सा ॥

### ५. अधोनिर्दिष्टपद्यस्य तात्पर्यं प्रकाशयत

सार्धं तयासौ विजहार राजा नाचिन्तयद्वैश्रवणस्य लक्ष्मीम् ।

ततश्च विद्येव समाधियुक्ता गर्भं दधे पापविवर्जिता सा ॥

### ६. अधोनिर्दिष्टपद्यस्य नेपालिभाषायामर्थं लिखत

प्रागगर्भधानान्मनुजेन्द्रपत्नी सितं ददर्श द्विजराजमेकम् ।

स्वप्ने विशन्तं वपुरात्मनः सा न तन्निमित्तं समवाप तापम् ॥

७. **निम्नाङ्कितस्य पद्यस्य सरलार्थं लिखत**

ऐक्ष्वाक इक्ष्वाकुसमप्रभावः शाक्येष्वशक्येषु विशुद्धवृत्तः ।

प्रियः शरच्चन्द्र इव प्रजानां शुद्धोदनो नाम बभूव राजा ॥

८. **अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत**

इक्ष्वाकुसमप्रभावः, विशुद्धवृत्तः, समाधियुक्ता, पापविवर्जिता, इन्द्रकल्पस्य ।

९. **प्रसङ्गपर्यायसमासकोशादिप्रदर्शनपूर्वकमधस्तनपद्यस्य व्याख्यां कुरुत**

प्राग्गर्भधानान्मनुजेन्द्रपत्नी सितं ददर्श द्विजराजमेकम् ।

स्वप्ने विशन्तं वपुरात्मनः सा न तन्निमित्तं समवाप तापम् ॥

१०. **अधस्तनपदानां पर्यायान् लिखत**

लेभे, चकाङ्क्ष, गर्भेण, विजहार, सार्धम्, दधे, राजा, शुचम्, धीरा, पत्नी ।

# वनान्तभूमौ बुद्धजन्म

**सा लुम्बिनीं नाम वनान्तभूमिं चित्रद्रुमां चैत्ररथाभिरामाम् ।**
**ध्यानानुकूलां विजनामियेष तस्यां निवासाय नृपं बभाषे ॥६॥**

### अन्वयः

सा चैत्ररथाभिरामां चित्रद्रुमां विजनां ध्यानानुकूलां लुम्बिनीं नाम वनान्तभूमिं (गन्तुम्) इयेष । सा तस्यां निवासाय नृपं बभाषे ।

### व्याख्या

सा = मायादेवी, बुद्धमातेत्यर्थः । चैत्ररथाभिरामाम्, चित्ररथेन = गन्धर्वविशेषेण निर्वृतम् = निर्मितम्, चैत्ररथम् = चैत्ररथनामधेयमुद्यानम्, "अस्योद्यानं चैत्ररथम्" इत्यमरः, तद्वत् अभिरामा = मनोरमा, ताम् । चित्रद्रुमाः, चित्राः =विचित्राः, द्रुमाः = वृक्षाः, यस्याम्, सा ताम् । विजनाम्, विगताः जनाः यस्याः सा ताम् = निर्जनाम्, शान्तामित्यर्थः । ध्यानानुकूलाम्, ध्यानार्थम् = तपस्यायै, अनुकूला = उपयुक्ता, ताम् । लुम्बिनीं नाम = लुम्बिनीति नामिकाम् । वनान्तभूमिम्, वनम् = विपिनम्, अन्ते = अवसाने, यस्या सा वनान्ता सा चासौ भूमिः = भूः, "भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा" इत्यमरः, वनभूमिमित्यर्थः । गन्तुम् = प्राप्तुम् । इयेष = कामयामास, इष्टवतीत्यर्थः । सा = राजमहिषी । तस्याम् = वनान्तभूम्याम् । निवासाय = निवासार्थम् । नृपम् = राजानम् । बभाषे = जगाद ।

### भावार्थः

सा तदा कुबेरोद्यानसुन्दरीं तपस्यानुकूलां बहुविधवृक्षव्याप्तां लुम्बिनीं नाम वनभूमिं गन्तुं वाञ्छति स्म । तदर्थं सा राजानं प्रार्थितवती च ।

**आर्याशयां तां प्रवणां च धर्मे विज्ञाय कौतूहलहर्षपूर्णः ।**
**शिवात् पुरात् भूमिपतिर्जगाम तत्प्रीतये नापि विहारहेतोः ॥७॥**

### अन्वयः

कौतूहलहर्षपूर्णः भूमिपतिः च धर्मे तामार्याशयां प्रवणां विज्ञाय तत्प्रीतये शिवात् पुरात् जगाम, विहारहेतोः नापि (जगाम) ।

### व्याख्या

कौतूहलहर्षपूर्णः- कौतूहलञ्च = कौतुकञ्च, हर्षश्च = प्रमोदश्च, "मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः" इत्यमरः, तौ कौतूहलहर्षौ, ताभ्याम् पूर्णः =परिपूर्णः । भूमिपतिः = भूपतिश्च, धर्मे = सुकृते, "स्याद्धर्ममस्त्रियां पुण्यं श्रेयसी सुकृतं वृषः" इत्यमरः । ताम् = पूर्वोक्ताम्, आर्याशयाम् - आर्यः = श्रेष्ठः, आशयः = अभिप्रायः, भावो वा यस्यां सा, ताम् = तादृशीम् । प्रवणाम् = प्रवृत्तिम् । विज्ञाय = ज्ञात्वा । तत्प्रीतये - तस्याः प्रीतिः = प्रसन्नता, तस्यै । शिवात् = सुन्दरात्, शुभादित्यर्थः । पुरात् = नगरात्, "पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् । स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥" इत्यमरः । जगाम = ययौ, प्रस्थितवानित्यर्थः । विहारहेतोः - विहारः = भ्रमणम्, हेतुः = कारणम्, "हेतुर्ना कारणं बीजम्" इत्यमरः, तस्य । केवलं भ्रमणार्थमित्यर्थः । नापि = नैव, जगाम ।

### भावार्थः

स्वपत्न्या भावं धार्मिकप्रवृत्तिं च ज्ञात्वा हर्षकौतुकसमन्वितो राजा तस्मात् पुण्यनगरात् केवलं पत्नीं तोषयितुं निर्गतः, न तु विहारादीनां कृते ।

**तस्मिन् वने श्रीमति राजपत्नी प्रसूतिकालं समवेक्षमाणा ।**
**शय्यां वितानोपहितां प्रपेदे नारीसहस्रैरभिनन्द्यमाना ॥८॥**

### अन्वयः

श्रीमति तस्मिन् वने प्रसूतिकालं समवेक्षमाणा राजपत्नी नारीसहस्रैः अभिनन्द्यमाना सती वितानोपहितां शय्यां प्रपेदे ।

### व्याख्या

श्रीमति = ऐश्वर्यशालिनि, मनोरमे इत्यर्थः । तस्मिन् = पूर्वोक्ते । वने = कानने, "अटव्यरण्यं विपिनं गहनं काननं वनम्" इत्यमरः । प्रसूतिकालम्- प्रसूतेः = जननस्य, कालः = समयः, "कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षती" इत्यमरः, तम्, प्रसवावस्थामित्यर्थः । समवेक्षमाणा - सम्यक् = सुष्ठुतया, अवेक्षमाणा = विचारयन्ती । राजपत्नी - राज्ञः = नृपस्य, पत्नी = धर्मपत्नी, मायादेवीत्यर्थः । नारीसहस्रैः- नारीणाम् = योषिताम्, "स्त्री योषिदबला नारी सीमन्तिनी वधूः" इत्यमरः, सहस्राणि = सहस्राधिकानि, तैः । अभिनन्द्यमाना अभितो नन्द्यमाना = परितोष्यमाणा, संसेव्यमानेत्यर्थः । वितानोपहिताम्- वितानेन = उल्लोचेन, "अस्त्री वितानमुल्लोचः" इत्यमरः, उपहिता = सहिता, ताम्, वितानादिसमलङ्कृतामित्यर्थः । शय्याम् = शयनम् । प्रपेदे = प्राप्तवती, आश्रयं लब्धवतीत्यर्थः ।

**भावार्थः**

विविधैश्वर्यपरिपूर्णे तस्मिन् विपिने सन्निकटप्रसवसमया मायादेवी सहस्राधिकैर्नारीभिः संसेव्यमाना सती वितानादिसौविध्यपरिपूर्णां शय्यामाश्रितवती ।

**ततः प्रसन्नश्च बभूव पुष्यस्तस्याश्च देव्या व्रतसंस्कृतायाः ।**
**पार्श्वात्सुतो लोकहिताय जज्ञे निवेदनं नैव निरामयञ्च ॥९॥**

**अन्वयः**

ततः पुष्यः प्रसन्नः बभूव, व्रतसंस्कृतायाः तस्याः देव्याः पार्श्वात् लोकहिताय सुतो जज्ञे, निवेदनं न एव निरामयञ्च बभूव ।

**व्याख्या**

ततः = तदनन्तरम् । पुष्यः = पुष्यनक्षत्रः । प्रसन्नः = प्रसादपूर्णः । बभूव = जातः । व्रतसंस्कृतायाः- व्रतैः = नियमैः, "नियमो व्रतमस्त्री तत्" इत्यमरः, संस्कृतायाः = पवित्रायाः, तस्याः । देव्याः = मायादेव्याः । पार्श्वात् = पार्श्वभागात् । लोकहिताय- लोकस्य = जगतः, "त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्" इत्यमरः, हितम् = कल्याणम्, तस्मै । पुत्रः = सुतः । जज्ञे = समुत्पन्नः । निवेदनम्- निःशेषेण वेदनम् = पीडा । न एव = नैवाभवत् । निरामयञ्च = नैरुज्यञ्च । बभूव = अभवत् ।

**भावार्थः**

तदनन्तरं पुष्यनक्षत्रः अभीष्टफलदो जातस्तस्मिन् नक्षत्रे विविधव्रतानुष्ठानैः सुसंस्कृतायाः मायादेव्याः पार्श्वभागात् लोककल्याणः पुत्रः समुत्पन्नः । तस्य जननकाले मायादेव्यै कापि बाधा न जाता, न च कोऽपि रोगः समुत्पन्नः ।

**ऊरोर्यथौर्वस्य पृथोश्च हस्तान्मान्धातुरिन्द्रप्रतिमस्य मूर्ध्नः ।**
**कक्षीवतश्चैव भुजांसदेशात्तथाविधं तस्य बभूव जन्म ॥१०॥**

**अन्वयः**

यथा और्वस्य ऊरोः, पृथोः हस्तात्, इन्द्रप्रतिमस्य मान्धातुः मूर्ध्नः, कक्षीवतः च भुजांशदेशात् जन्म बभूव तस्य (अपि) तथाविधं जन्म बभूव ।

### व्याख्या

यथा = येन प्रकारेण । और्वस्य = एतन्नामकस्य ऋषेः । ऊरोः = जानोरुपरिभागात् । पृथोः = एतन्नामधेयस्य राज्ञः । हस्तात् = करात् । इन्द्रप्रतिमस्य, इन्द्रः = देवराजः, प्रतिमा = सादृश्यम्, यस्य सः तस्य । मान्धातुः = मान्धातेति नामकस्य राज्ञः । मूर्ध्नः = मस्तकात्, "उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्" इत्यमरः । कक्षीवतः = कक्षीवान् इति नामधेयस्य राज्ञः । भुजांसदेशात्- भुजयोः अंसदेशस्तस्मात् = स्कन्धात् । जन्म = उत्पत्तिः । बभूव = अभवत् । तस्य अपि = बुद्धस्य अपि । तथाविधम् = तादृशम्, पार्श्वजननमित्यर्थः । जन्म-जनिः बभूव = अभवत् ।

### भावार्थः

यथा और्वस्य जन्म ऊरोरभवत्, पृथोर्जन्म हस्तादभवत्, इन्द्रतुल्यमान्धातुर्जन्म शिरसोऽजायत, कक्षीवतो जन्म स्कन्धप्रदेशादभजत् तथैव बुद्धस्य जन्म मातुः पार्श्वभागादभूत् ।

**क्रमेण गर्भादभिनिःसृतः सन् बभौ च्युतः खादिव योन्यजातः ।**
**कल्पेष्वनेकेषु च भावितात्मा यः सम्प्रजानन् सुषुवे न मूढः ॥११॥**

### अन्वयः

योन्यजातः स क्रमेण गर्भात् अभिनिःसृतः सन् खात् च्युत इव बभौ । यः अनेकेषु कल्पेषु भावितात्मा सम्प्रजानन् सुषुवे । मूढः न (सुषुवे) ।

### व्याख्या

योन्यजातः- योनेः = भगात्, "भगं योनिर्द्वयोः" इत्यमरः, अजातः = अनुत्पन्नः । सः = बालकः । क्रमेण = क्रमशः । गर्भात् = गर्भाशयात् । अभिनिःसृतः = प्रसूतः सन् । खात् = गगनतलात्, "नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्" इत्यमरः । च्युतः = निपतितः । इव = यथा । बभौ = शुशुभे । यः = बालकः । अनेकेषु = बहुषु, कल्पेषु = संवर्त्तेषु, कल्पान्तेषु इत्यर्थः । भावितात्मा- भावितः = पवित्रीकृतः, आत्मा = जीवात्मा, येन सः । सम्प्रजानन्- सम्यक् प्रकर्षेण च जानन् = जागरूकः । सन्निति शेषः । सुषुवे = प्रसूतः । मूढः = अचेतनः सन् न सुषुवे ।

### भावार्थः

क्रमेण गर्भात् समुत्पन्नोऽयं बालको गगनतलात् पतितो नक्षत्रविशेष इव द्युतिमान् भूत्वा विराजते स्म । अनेककल्पेषु पवित्रीकृतात्मा स जागरूकतया जनिं लेभे न तु मूढतया ।

# अभ्यासः

१. **गतियतिलयानुसारेण मधुरस्वरेणाधस्तनं पद्यमुच्चारयत**

ऊरोर्यथौर्वस्य पृथोश्च हस्तान्मान्धातुरिन्द्रप्रतिमस्य मूर्ध्नः ।
कक्षीवतश्चैव भुजांसदेशात्तथाविधं तस्य बभूव जन्म ॥१०॥

२. **अधोलिखितप्रश्नानामुत्तराणि लिखत**

(क) मायादेवी निवासाय कां भूमिं गन्तुमियेष ?

(ख) भूमिपतिः किमर्थं शिवपुराद् वनान्तभूमिं प्रति जगाम ?

(ग) मायादेवी कीदृशीं शय्यां प्रपेदे ?

(घ) बुद्धस्य कीदृशं जन्म बभूव ?

(ङ) नवजातो बालो बुद्धः कथं बभौ ?

३. **अधस्तनपद्यस्यान्वयं लिखत**

सा लुम्बिनीं नाम वनान्तभूमिं चित्रद्रुमां चैत्ररथाभिरामाम् ।
ध्यानानुकूलां विजनामियेष तस्यां निवासाय नृपं बभाषे ॥६॥

४. **अधस्तनपद्यस्य सरलसंस्कृतभाषायां भावार्थं लिखत**

ततः प्रसन्नश्च बभूव पुष्यस्तस्याश्च देव्या व्रतसंस्कृतायाः ।
पार्श्वात्सुतो लोकहिताय जज्ञे निर्वेदनं चैव निरामयञ्च ॥

५. **अधोनिर्दिष्टपद्यस्य तात्पर्यं प्रकाशयत**

क्रमेण गर्भादभिनिःसृतः सन् बभौ च्युतः खादिव योन्यजातः ।
कल्पेष्वनेकेषु च भावितात्मा यः सम्प्रजानन् सुषुवे न मूढः ॥११॥

## ६. अधोनिर्दिष्टपद्यस्य नेपालिभाषायामर्थं लिखत

तस्मिन् वने श्रीमति राजपत्नी प्रसूतिकालं समवेक्षमाणा ।

शय्यां वितानोपहितां प्रपेदे नारीसहस्रैरभिनन्द्यमाना ॥८॥

## ७. निम्नाङ्कितस्य पद्यस्य सरलार्थं लिखत

आर्याशयां तां प्रवणां च धर्मे विज्ञाय कौतूहलहर्षपूर्णः ।

शिवात् पुरात् भूमिपतिर्जगाम तत्प्रीतये नापि विहारहेतोः ॥७॥

## ८. अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत

वितानोपहिताम्, चैत्ररथाभिरामाम्, व्रतसंस्कृतायाः, वनान्तभूमिम्, चित्रद्रुमाम् ।

## ९. प्रसङ्गपर्यायसमासकोशादिप्रदर्शनपूर्वकमधस्तनपद्यस्य व्याख्यां कुरुत

ऊरोर्यथौर्वस्य पृथोश्च हस्तान्मान्धातुरिन्द्रप्रतिमस्य मूर्ध्नः ।

कक्षीवतश्चैव भुजांसदेशात्तथाविधं तस्य बभूव जन्म ॥

## १०. अधस्तनपदानां पर्यायान् लिखत

बभाषे, जगाम, जज्ञे, बभूव, श्रीमति, मूर्ध्नः, प्रवणाम्, शय्याम्, विज्ञाय, राजपत्नी ।

## चतुर्दशः पाठः

# बुद्धजन्मप्रभावः

**दीप्त्या च धैर्येण च यो रराज बालो रविर्भूमिमिवावतीर्णः ।**
**तथाऽतिदीप्तोऽपि निरीक्ष्यमाणो जहार चक्षूंषि यथा शशाङ्कः ॥१२॥**

### अन्वयः

दीप्त्या च धैर्येण च यः बालः भूमिम्, अवतीर्णः (सः) रविः इव रराज । तथा अतिदीप्तोऽपि निरीक्ष्यमाणः शशाङ्कः यथा चक्षूंषि जहार ।

### व्याख्या

दीप्त्या = कान्त्या । च = अपि । धैर्येण = धीरतया । च = अपि । यः = बालः । भूमिम् = भुवम्, "भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा" इत्यमरः । अवतीर्णः = अवरूढः । रविः = सूर्यः । इव = यथा । रराज = शुशुभे । तथा = तेन प्रकारेण । अतिदीप्तः = अतितेजस्वी । अपि = च । निरीक्ष्यमाणः = अवलोक्यमानः । लोकैरिति शेषः । शशाङ्कः = मृगाङ्कः । यथा = इव । चक्षूंषि = नयनानि । जहार = अहरत् ।

### भावार्थः

तेजसि धैर्ये च सः बालो भूमौ निपतितः सूर्य इव सुशोभते स्म । अतितेजस्वी सन्नपि लोकनयनानां कृते स शीतलश्चन्द्र इव स्पृहणीय आसीत् ।

**स हि स्वगात्रप्रभया ज्वलन्त्या दीपप्रभां भास्करवन्मुमोष ।**
**महार्हजाम्बूनदचारुवर्णो विद्योतयामास दिशश्च सर्वाः ॥१३॥**

### अन्वयः

हि सः ज्वलन्त्या स्वगात्रप्रभया भास्करवद् दीपप्रभां मुमोष । महार्हजाम्बूनदचारुवर्णः स सर्वाः दिशः च विद्योतयामास ।

**व्याख्या**

हि = यतो हि । सः = बालकः । स्वगात्रप्रभया- स्वस्य = आत्मनः, गात्रम् = वपुः, "गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः" इत्यमरः, तस्य प्रभा = दीप्तिः, "स्युः प्रभाः रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः" इत्यमरः, तया । भास्करवत् = प्रभाकरः इव, "भास्कराहस्करब्रध्नप्रभाकरविभाकराः" इत्यमरः, सूर्य इवेत्यर्थः । दीपप्रभाम्- दीपस्य = प्रदीपस्य, प्रभा = कान्तिः, ताम्- मुमोष = अहरत् । महार्हजाम्बूनदचारुवर्णः- महार्हं = बहुमूल्यं च तत्, जम्बूनद्यां भवतीति जाम्बूनदम् तत् = स्वर्णम्, तद्वत् चारुः = सुन्दरः, "सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्" इत्यमरः, वर्णः = स्वरूपम्, यस्य सः । सः = अर्भकः । सर्वाः = सकलाः । दिशः = काष्ठाः, "दिशस्तु ककुभः काष्ठाः" इत्यमरः । च = अपि । विद्योतयामास = प्रकाशयामास ।

**भावार्थः**

यथा सूर्यो दीपप्रभां तिरस्करोति तथैव स बालोऽपि स्वस्य शरीरकान्त्या दीपकान्तिं तिरस्करोति स्म । सुर्वणसमुज्ज्वलाङ्गोऽयं बालकः सर्वाः काष्ठा विद्योतयति स्म ।

**अनाकुलान्युब्जसमुद्धृतानि निष्पेषवद्व्यायतविक्रमाणि ।**
**तथैव धीराणि पदानि सप्त सप्तर्षितारासदृशो जगाम ॥१४॥**

**अन्वयः**

सप्तर्षितारासदृशः सः तथैव अनाकुलानि, न्युब्जसमुद्धृतानि, निष्पेषवद्व्यायतविक्रमाणि धीराणि सप्तपदानि जगाम ।

**व्याख्या**

सप्तर्षितारासदृशः- सप्तानाम् = सप्तसङ्ख्यकानाम्, ऋषीणाम् = मुनीनाम्, कश्यपात्रिभरद्वाजविश्वामित्र-गौतमजमदग्निवशिष्ठानां समूहः सप्तर्षिः, सप्तर्षिश्चासौ तारा = नक्षत्रम्, तेन सदृशः = तुल्यः । सः = अर्भकः । तथैव = तेनैव प्रकारेण । अनाकुलानि = अनायासानि । न्युब्जसमुद्धृतानि, न्युब्जम् = अनुत्तानम् यथा स्यात् तथा समुद्धृतानि = सम्यङ् न्यस्तानि । निष्पेषवत् = निष्पीडनवत्, विशेषेण आयताः व्यायताः = लम्बायमानाः, विस्तृताः, विक्रमाः = पादविक्षेपाः, येषु तानि । धीराणि = स्थिराणि, सधैर्याणि वा । सप्तपदानि = सप्तचरणानि । जगाम = ययौ ।

**भावार्थः**

स बालकः सप्तर्षितारा इव सर्वप्रथमं सप्त पदानि ययौ । स चलनक्रमे दीर्घमचलं च पदमुत्थाप्य अग्रतः सधैर्यं विन्यासयति स्म ।

**बोधाय जातोऽस्मि जगद्धितार्थमन्त्या भवोत्पत्तिरियं ममेति ।**
**चतुर्दिशं सिंहगतिर्विलोक्य वाणीञ्च भव्यार्थकरीमुवाच ॥१५॥**

### अन्वयः

सिंहगतिः सः चतुर्दिशं विलोक्य जगद्धितार्थं बोधाय जातः अस्मि, इयम् मम अन्त्या भवोपत्तिः इति भव्यार्थकरीम् वाणीम् च उवाच ।

### व्याख्या

सिंहगतिः - सिंहस्य = मृगेन्द्रस्य, "सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः" इत्यमरः, गतिरिव = गमनमिव, गतिः = गमनं यस्य सः । सः = बालकः । चतुर्दिशम्, चतसृणां दिशां समाहारः चतुर्दिक्, ताम् चतुर्दिशम् = चतसृषु दिक्षु । विलोक्य = अवलोक्य । जगद्धितार्थम्, जगतः = लोकस्य, "त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्" इत्यमरः, हितार्थम् = कल्याणार्थम् । बोधाय = बुद्धत्वप्राप्तये । जातः = अवतीर्णः । अस्मि = वर्ते । इयम् = साम्प्रतिकी, वर्तमाना वा । मम = मदीया । अन्त्या = चरमा । भवोत्पत्तिः - भवे = संसारे, उत्पत्तिः = प्रसूतिः । इति = एवं प्रकाराम् । भव्यार्थकरीम् - भव्यश्चासौ अर्थ भव्यार्थः, तं करोतीति ताम् = विशिष्टार्थसंवलिताम्, समाविष्ट भविषदर्थवतीं वा । वाणीम् = भारतीम्, "ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती" इत्यमरः । च = अपि । उवाच = जगाद ।

### भावार्थः

मृगेन्द्रगामी स बालकः चतस्रो दिशो विलोक्य इमां भविष्यदर्थगुम्फितां वाणीं जगाद, "अहं लोकहितार्थं ज्ञानार्जनं विधातुं समुत्पन्नोऽस्मि । इयं ममान्तिमा उत्पत्तिर्भविष्यति ।"

**वाता ववुः स्पर्शसुखा मनोज्ञा दिव्यानि वासांस्यवपातयन्तः ।**
**सूर्यः स एवाभ्यधिकं चकाशे जज्वाल सौम्यार्चिरनीतितोऽग्निः ॥२२॥**

### अन्वयः

स्पर्शसुखाः मनोज्ञाः वाताः दिव्यानि वासांसि अवपातयन्तः ववुः । सः एव सूर्यः अभ्यधिकं चकाशे, अनीतितः सौम्यार्चिः अग्निः जज्वाल ।

### व्याख्या

स्पर्शसुखाः - स्पर्शे सुखं येषां ते तादृशाः = स्पर्शसौख्यदाः । मनोज्ञाः = चेतोहराः । वाताः = समीरणाः । दिव्यानि - दिवि भवानि दिव्यानि = स्वर्गीयाणि । वासांसि = वस्त्राणि । अवपातयन्तः = निपातयन्तः । ववुः = वान्ति

स्म । सः एव = सततमुदीयमानः । सूर्यः = भास्करः । अभितः अधिकम् अभ्यधिकम् = अत्यधिकम् । चकाशे = दिदीपे । अनीतितः = अप्रज्वालितः, सौम्यार्चिः, सौम्यः = शान्तश्चासौ अर्चिः = शिखा, "अर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः, यस्य सः तादृशः। अग्निः = वैश्वानरः "अग्निर्वैश्वानरो वह्निर्वीतीहोत्रो धनञ्जयः" इत्यमरः। जज्वाल = ज्वलति स्म ।

### भावार्थः

तस्मिन् समये स्पर्शसुखा वायवो दिव्यानि वस्त्राणि भूमौ पातयन्तो वान्ति स्म । सूर्यश्च तदवधौ अधिकं विदिद्युते । प्रज्वालितोऽप्यग्निः सौम्यशिखाभिः प्रजज्वाल ।

**भूतैरसौम्यैः परित्यक्तहिंस्रैर्नाकारि पीडा स्वगणे परे वा ।**
**लोके हि सर्वाश्च विना प्रयासं रुजो नराणां शमयाम्बभूवुः ॥२५॥**

### अन्वयः

परित्यक्तहिंस्रैः असौम्यैः भूतैः स्वगणे परे वा पीडा न अकारि । हि लोके सर्वाः रुजः च प्रयासं विना शमयाम्बभूवुः ।

### व्याख्या

परित्यक्तहिंस्रैः, परित्यक्तानि = त्यक्तानि, हिंस्राणि = हिंसाभावाः, येषां ते तैः । असौम्यैः - सोमस्य भावः अस्ति येषां ते सौम्याः, न सौम्याः, असौम्यास्तैः = अभद्रैः । भूतैः = प्राणिभिः । स्वगणे = स्वसमूहे । परे = परसमूहे वा । पीडा = बाधा "पीडा बाधा व्यथा दुःखम् " इत्यमरः । न अकारि = न विहिता । हि = यतो हि। लोके = जगति। सर्वाः = निखिलाः। रुजः = रोगाः। प्रयासम् = प्रयत्नम्। विना = अन्तरा। शमयाम्बभूवुः = शान्ताः जाताः ।

### भावार्थः

तत्र अनेके विघ्नकराः प्राणिन उपस्थिताः परं ते परस्परं न पीडयन्ति स्म। संसारे प्रयत्नमन्तरा एव मनुष्याणां रोगाः शान्ता अभवन् ।

**कलं प्रणेदुः मृगपक्षिणश्च शान्ताम्बुवाहाः सरितो बभूवुः ।**
**दिशः प्रसेदुर्विमले निरभ्रे विहायसे दुन्दुभयो निनेदुः ॥२६॥**

### अन्वयः

मृगपक्षिणः च कलं प्रणेदुः सरितो शान्ताम्बुवाहाः बभूवुः । दिशः प्रसेदुः निरभ्रे विमले विहायसे दुन्दुभयः निनेदुः ।

### व्याख्या

मृगपक्षिणः, मृगाश्च = हरिणाश्च, पक्षिणश्च = खगाश्च, ते। च = अपि। कलम् = मधुरध्वनिम् "काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे" इत्यमरः । प्रणेदुः = चुकूजिरे । सरितः = नद्यः । शान्ताम्बुवाहाः - शान्तः = मन्दः, अम्बुवाहः = जलप्रवाहः, यासां ताः तादृशाः। बभूवुः = जाताः। दिशः = काष्ठाः, "दिशस्तु ककुभः काष्ठाः आशाश्च हरितश्च ताः" इत्यमरः। प्रसेदुः = निर्मला बभूवुः। निरभ्रे - निर्गतम् = विगतम्, अभ्रम् = मेघः, यस्मात् तत् तस्मिन् । विमले = निर्मले । विहायसे = आकाशे, "पुंस्याकाशविहायसी" इत्यमरः। दुन्दुभयः = भेर्यः। निनेदुः = नादं चक्रुः।

### भावार्थः

तदवधौ हरिणपक्षिगणा मधुरं ध्वनिं कुर्वन्ति स्म। नद्यो मन्दं मन्दं प्रवहन्ति स्म। सर्वा दिशो निर्मला बभूवुः। निर्मले निर्मेघे च गगने दुन्दुभिध्वनयः श्रूयन्ते स्म इति भावः।

**लोकस्य मोक्षाय गुरौ प्रसूते शमं प्रपेदे जगदव्यवस्थम्।**
**प्राप्येव नाथं खलु नीतिमन्तं एको न मारो मुदमाप लोके ॥२७॥**

### अन्वयः

लोकस्य मोक्षाय गुरौ प्रसूते नीतिमन्तं नाथं प्राप्य इव अव्यवस्थं जगत् शमं प्रपेदे खलु। लोके एकः मारः मुदम् न आप।

### व्याख्या

लोकस्य = जगतः, "त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्" इत्यमरः। मोक्षाय = मुक्तये। गुरौ = बुद्धे। प्रसूते = जाते। नीतिमन्तम् - नीतिः अस्ति अस्य इति नीतिमान् तम् = नयवन्तम्। नाथम् = शासकम्, स्वामिनं वा । प्राप्य इव = लब्ध्वा इव । अव्यवस्थम् - न विद्यते व्यवस्था = नियमः, यस्मिन् तत् तादृशम् । जगत् = लोकः । शमम् = शान्तिम् । प्रपेदे = प्राप । खलु = निश्चयेन । लोके = भुवने । एकः = केवलः । मारः = मदनः "मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः" इत्यमरः । मुदम् = हर्षम् "मुत्प्रीतिः प्रमदो हर्षः" इत्यमरः। न आप = नैव प्राप।

### भावार्थः

जगतो मोक्षाय भगवति बुद्धे जाते सति निखिलमशान्तं जगत् शान्तं बभूव। यथा नीतिमन्तं शासकमवाप्य अव्यवस्थितं राज्यं व्यवस्थितं भवति तथैव बुद्धजन्मना सकलमपि जगत् स्वतः शान्तं बभूव। एकं कामदेवं विहाय तस्मिन् समये सर्वे शान्ताः प्रसन्नाश्चासन्।

## अभ्यासः

१. **गतियतिलयानुसारेण मधुरस्वरेणाधस्तनं पद्यमुच्चारयत**

स हि स्वगात्रप्रभया ज्वलन्त्या दीपप्रभां भास्करवन्मुमोष ।
महार्हजाम्बूनदचारुवर्णो विद्योतयामास दिशश्च सर्वाः ॥

२. **अधोलिखितप्रश्नानामुत्तराणि लिखत**

(क) नवजातो बालः कीदृशः सन् चक्षूंषि जहार ?

(ख) बालः किमिव सर्वा दिशो विद्योतयामास ?

(ग) बालः कीदृशानि सप्तपदानि कथं जगाम ?

(घ) नवजातो बालः कीदृशीं वाणीमुवाच ?

(ङ) बुद्धजन्मनि वातावरणं कीदृशं बभूव ?

३. **अधस्तनपद्यस्य अन्वयं लिखत**

दीप्त्या च धैर्येण च यो रराज बालो रविर्भूमिमिवावतीर्णः ।
तथाऽतिदीप्तोऽपि निरीक्ष्यमाणो जहार चक्षूंषि यथा शशाङ्कः ॥

४. **अधस्तनपद्यस्य सरलसंस्कृतभाषायां भावार्थं लिखत**

लोकस्य मोक्षाय गुरौ प्रसूते शमं प्रपेदे जगदव्यवस्थम् ।
प्राप्येव नाथं खलु नीतिमन्तं एको न मारो मुदमाप लोके ॥

५. **अधोनिर्दिष्टपद्यस्य तात्पर्यं प्रकाशयत**

बोधाय जातोऽस्मि जगद्धितार्थमन्त्या भवोत्पत्तिरियं ममेति ।
चतुर्दिशं सिंहगतिर्विलोक्य वाणीञ्च भव्यार्थकरीमुवाच ॥

## ६. अधोनिर्दिष्टपद्यस्य नेपालिभाषायामर्थं लिखत

अनाकुलान्युब्जसमुद्धृतानि निष्पेषवद्व्यायतविक्रमाणि ।

तथैव धीराणि पदानि सप्त सप्तर्षितारासदृशो जगाम ॥

## ७. निम्नाङ्कितस्य पद्यस्य सरलार्थं लिखत

कलं प्रणेदुः मृगपक्षिणश्च शान्ताम्बुवाहाः सरितो बभूवुः ।

दिशः प्रसेदुर्विमले निरभ्रे विहायसे दुन्दुभयो निनेदुः ॥

## ८. अधोनिर्दिष्टसमस्तपदानां विग्रहवाक्यानि निर्दिशत

महार्हजाम्बूनदचारुवर्णाः, शान्ताम्बुवाहाः, स्वगात्रप्रभया, निष्पेषवद्व्यायतविक्रमाणि, सप्तर्षितारासदृशः ।

## ९. प्रसङ्गपर्यायसमासकोशादिप्रदर्शनपूर्वकमधस्तनपद्यस्य व्याख्यां कुरुत

वाता ववुः स्पर्शसुखा मनोज्ञा दिव्यानि वासांस्यवपातयन्तः ।

सूर्यः स एवाभ्यधिकं चकाशे जज्वाल सौम्यार्चिरनीतितोऽग्निः ॥२२॥

## १०. अधस्तनपदानां पर्यायान् लिखत

गुरौ, आप, प्रणेदुः, निनेदुः, बभूवुः, दीप्त्या, जहार, रराज, ववुः, धीराणि ।

## ११. दशभिः पङ्क्तिभिर्भगवतो बुद्धस्य जन्मप्रभावं वर्णयत ।

# कालिदासपरिचयो रघुवंशमहाकाव्यस्य प्रथमसर्गस्य संक्षिप्तवस्तुवर्णनञ्च

## उपक्रमः

संस्कृतवाङ्मये बहूनि काव्यानि नाटकानि गद्यकाव्यानि च रचितानि प्राप्यन्ते । तेषां स्रष्टारः कवयोऽपि सुप्रसिद्धाः सन्ति काव्यानां रचनया । तत्र काव्येषु प्रथमं मन्यते रघुवंशमहाकाव्यम् । अत्र पाठ्यक्रमेऽस्य महाकाव्यस्य प्रथमसर्गस्य विंशतिश्लोकाः (१-२०) पाठ्यविषयत्वेन स्थापिताः सन्ति । अतस्तस्य प्रसङ्गेन रघुवंशमहाकाव्यस्य रचयितुः कालिदासस्य संक्षिप्तपरिचयं प्रथमसर्गस्य संक्षिप्तविषयवस्तु च प्रस्तुत्य निर्धारितश्लोकानां व्याख्यात्र क्रियते ।

## महाकवेः कालिदासस्य परिचयः

'काव्येषु माघः कविकालिदासः' इत्युक्तिः सुप्रसिद्धा वर्तते । एतदनुसारेण संस्कृतकविषु महाकविः कालिदासोऽग्रणीः कविरस्तीति वक्तुं शक्यते । विद्वांसोऽस्य नाम महाकाव्यकारेषु सर्वप्रथमं गृह्णन्ति । एष कविवरो विश्वप्रसिद्धोऽस्ति । अस्य जन्मस्थानसमयादिविषये स्पष्टतया लिखितं प्रमाणं न प्राप्यते । केचनास्य जन्मस्थानं काश्मीरम् इति कथयन्ति । अन्ये केचन बङ्गदेशोऽस्य जन्मभूमिरिति वदन्ति । अस्य सुप्रसिद्धे मेघदूतनामके खण्डकाव्ये भारतस्य उज्जयिन्या वर्णनं विशेषरूपेण कृतं प्राप्यत इति हेतोर्बहवो विद्वांसः 'उज्जयिनी' एवास्य जन्मभूमिरिति मन्वते । अयमेव रघुवंशमहाकाव्यस्य रचयिता ।

कालिदासस्य जन्मसमयविषयेऽपि मतभेदो दृश्यते । डा.हार्नलीनामा पाश्चात्त्यो विद्वान् षष्ठमीशवीयशतकं कालिदासस्य समय इति मनुते । अन्ये केचन गुप्तकालः कालिदासस्य समय इति मन्वानाश्चन्द्रगुप्तद्वितीयस्य समये कालिदास आसीदिति निगदन्ति । बहवो भारतीया विद्वांस ईशवीयपूर्वं प्रथमशतकं कालिदासस्य समय इति सप्रमाणमुपस्थापयन्ति । उज्जयिन्यां वर्तमानस्य भूपतेर्विक्रमादित्यस्य विद्वत्सभायां विद्यमानेषु नवरत्नेषु कालिदासोऽप्येक आसीदत एव ई.पू.प्रथमशतकं कालिदासस्य समय इति ते विश्वसन्ति । अस्य मतस्य पुष्ट्यर्थमेकः श्लोकस्तैः प्रस्तुत उपलभ्यते-

**धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः ।**
**ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥**

अतः कालिदासस्य जन्मसमय ईशवीयपूर्वं प्रथमशतकम्, इति भारतीयानां विदुषां निश्चयः ।

कालिदासस्य विषये अनेकप्रकारकाः किंवदन्त्यः प्राप्यन्ते । तासु एका प्रसिद्धा वर्तते । तदनुसारेण कविरयं प्राङ्मूर्ख आसीत् । केषाञ्चन जनानां प्रेरणयास्य विवाहो विदुष्या राजपुत्र्या विद्योत्तमया सह जातः । विवाहानन्तरं पत्न्या तस्य मूर्खतां ज्ञात्वा स गृहान्निष्कासितः । अतीवापमानबोधेन पीडितोऽसौ भगवतीं कालीमुपासितवान् । तस्याः प्रसादाच्च सर्वविद्यानां ज्ञानं प्राप्तवान् । पश्चाच्च विद्यया कवित्वशक्त्या

च विभूषितः कालिदास इति सार्थकनामा सञ्जातः । स शैवधर्मावलम्बी आसीदिति रघुवंशमहाकाव्यस्य मङ्गलाचरणश्लोकाज्ज्ञायते ।

महाकविना कालिदासेन 'रघुवंशम्' 'कुमारसम्भवम्' चेति द्वे महाकाव्ये, 'ऋतुसंहारः', 'मेघदूतम्' चेति द्वे खण्डकाव्ये, 'अभिज्ञानशाकुन्तलम्', 'विक्रमोर्वशीयम्', 'मालविकाग्निमित्रम्' चेति त्रीणि नाटकानि रचितानि सन्ति । रघुवंशमहाकाव्ये पवित्रचरितानां सूर्यवंशीयानां राज्ञां वर्णनमस्ति । अस्य महाकाव्यस्य भाषा सरलालङ्कृता स्वाभाविकी चास्ति । प्रायेणात्र प्रसादगुणः पाञ्चाली वैदर्भी च रीतिः प्राप्यते । रसेषु शृङ्गारवीरकरुणशान्तानां प्रधानता दृश्यते ।

महाकवेः कालिदासस्य बह्व्यो विशेषताः सन्ति । तासूपमाचातुर्यम्, प्रकृतेर्मनोहरं चित्रणम्, स्वल्पैः शब्दैः स्वकीयाभिप्रायस्य प्रकटने सामर्थ्यम्, सुमधुरः पदविन्यासः, अलङ्काराणां मञ्जुलः प्रयोगः, रसयोः शृङ्गारकरुणयोर्हृदयग्राहि वर्णनम्, सरला प्रसादगुणमयी शैली चेत्युल्लेखनीया वर्तन्ते ।

## रघुवंशप्रथमसर्गस्य कथासारः

महाकविः कालिदासः महाकाव्यस्य रघुवंशस्यारम्भे शब्दार्थज्ञानलाभाय भवानीशङ्करयोर्नमस्कारात्मकं मङ्गलाचरणं करोति-

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ इति ।**

मङ्गलाचरणानन्तरं कविर्विनीतैः शब्दैर्विदुषामग्रे स्वकीयमहङ्कारपरिहारं करोति । स पूर्वैः कविभी रामायणादीनां प्रबन्धानां रचनया पूर्वमेव कृतप्रवेशे रघूणां वंशवर्णने वज्रविद्धे मणौ सूत्रस्य इव ममापि गतिरस्तीति आह ।

कालिदासस्य वर्णनानुसारेण रघुवंशोद्भवानां राज्ञां साम्राज्यं समुद्रपर्यन्तं विस्तृतमासीत् । स्वर्गपर्यन्तमपि ते स्वकीयै रथैर्गच्छन्ति स्म । अर्जितं द्रव्यं ते सत्पात्रेभ्यो यथेच्छं ददति स्म । दिगन्तपर्यन्तं स्वयशो विस्तारयितुं ते शत्रून् विजयन्ते स्म । ते राजानः सन्तानलाभाय विवाहं कुर्वन्ति स्म । शैशवे गुरुकुले स्थित्वा ते विद्याभ्यासपरायणा आसन् । ते राजसिंहासनारूढाः सन्तो राजनीतिं सम्यक् पालयन्ति स्म । प्रजाजनहितायैव ते जनेभ्यः करं जगृहुः । वार्धके मुनिवृत्तिधारिणस्तेऽन्तसमये परमात्मध्यानेन शरीरं विजहुः ।

## राज्ञो दिलीपस्य वर्णनम्

अत्यन्तपवित्रे वैवस्वतमनोर्वंशे दिलीपः, इति नाम्ना प्रसिद्धो भूपतिरभवत् । स विशालवक्षा उन्नत आजानुबाहुश्चासीत् । राजसिंहासनारोहणानन्तरं तेनेतरे सर्वे भूपालाः स्वकीयशौर्यप्रभावेण वशीकृता आसन् । तस्य न केवलं शरीरमात्रं सुन्दरं किन्तु बुद्धिरपि विमला आसीत् । निर्मलबुद्ध्या तेन शास्त्राभ्यासः कृतः । तेन सकलं कर्म च यथाशास्त्रं सम्पादितम् । तस्य गुणाः प्रतापेन प्रचण्डाः, दयादाक्षिण्यादिना

मनोहराश्चासन् । अत एव स शत्रुभिरधृष्योऽपराजेयः किन्तु सर्वैरभिगम्यः सरलतया प्राप्यश्चासीत् । प्रजाश्च तस्य मनूक्तमार्गान्न विचलन्ति स्म । प्रजानां कल्याणार्थमेव स ताभ्यः षष्ठांशं करं जग्राह । चतुरङ्गिणी सेना तस्य शोभायै स्थापितेवासीत्, किन्तु सेनायाः प्रयोजनसिद्धये दिलीपस्याकुण्ठिता बुद्धिः शत्रुविजयसमर्थं धनुश्चेति द्वयमासीत् ।

विषयेष्वनासक्तिर्विद्याभ्यासो धर्मकर्मस्वभिरुचिश्चेति जरसा विनाऽपि वृद्धोचिता गुणास्तस्यासन् । प्रजानां शिक्षणाद् रक्षणाद् भरणाच्च स तासां पिता आसीत्, तासां पितरस्तु जन्महेतुमात्रभूता आसन् । तस्य राज्ये जनाः परद्रव्यहरणं परदारापहारणं चेत्यादीनि दुष्कर्माणि नहि कुर्वन्ति स्म । तस्य सर्वे गुणाः परार्थैकसाधका आसन् । चक्रवर्ती राजा दिलीपः समुद्रपर्यन्तां पृथिवीमेकपुरीमिव सम्यक् शशास । सनातनधर्मावलम्बिनस्तस्य मगधवंशजा सुदक्षिणानाम्नी पतिपरायणा राजमहिषी आसीत् । सन्तानप्राप्तये बहुशो धर्मकर्मादिकं विधाय प्रयत्नं कुर्वतोऽपि तस्य सन्तानलाभो नाभवत् । तस्यां सुदक्षिणायां राज्यस्योत्तराधिकारवहने समर्थं पुत्रमपश्यन् राजा मनसि खेदमावहनासीत् ।

सन्तानप्रतिबन्धेन नितरां खिद्यमानो दिलीपः सचिवेषु राज्यभारं निक्षिप्य सन्तानोपायं पिपृच्छुः पत्न्या सुदक्षिणया सहितः कुलगरोर्वशिष्ठस्याश्रमं जगाम । आश्रमपीडा मा भूदिति विचार्य स्वल्पपरिजनैः सहितः सपत्नीको राजा तपोवनं प्रविवेश । तौ राजदम्पती च मार्गे मनोभिरामं मयूरध्वनिं शृण्वन्तावगच्छताम् । तथा च रथरवभयान् मार्गं विहाय समीपाद् रथं प्रति दृष्टिपातं कुर्वत्सु मृगमिथुनेषु परस्परं स्वकीयनयनसादृश्यं पश्यन्तौ तौ राजदम्पती गुरोराश्रमं प्रति जग्मतुः । पुनश्च तौ मार्गे नवनीतमुपहारमादाय राज्ञो दर्शनार्थमुपस्थितान् घोषवृद्धान् वन्यवृक्षाणां नामधेयानि पृच्छन्तौ जग्मतुः । एवं सुदक्षिणायै मार्गे नवीनानि वस्तूनि दर्शयन् राजा सायं गुरोराश्रमं प्राप ।

## कुलगुरोर्वशिष्ठस्याश्रमवर्णनम्

नृपे दिलीपे वशिष्ठाश्रमं प्राप्ते समित्कुशादिकमादाय मुनयः पर्णशालां प्रविविशुः । नीवारभागमिच्छन्तो मृगाः सायं तदाश्रमद्वारमवरुन्धानास्तिष्ठन्ति स्म । मुनिकन्यका आश्रमोद्याने वृक्षाणामालवाले जलमासिच्य तत्रस्थजलं पक्षिणो निर्भयाः सन्तः पिबन्त्विति हेतोरालवालमुज्झन्ति स्म । केचन हरिणाः पर्णशालायाः प्राङ्गणे स्थित्वा निर्भयाः सन्तो रोमन्थं चक्रुः । प्रज्वलिताग्निसूचका आहुतिगन्धयुता धूमा आश्रममागतानामतिथीनां स्वागतं चक्रुः ।

रथादवरुह्य सपत्नीको दिलीपः सपत्नीकं गुरुं वशिष्ठमभिववन्दे । वशिष्ठो राजानं दिलीपं सर्वत्र राज्ये कुशलं वर्तते न वेति पप्रच्छ । राजा च गुरोरनुकम्पया सर्वत्र कुशलमस्तीति निवेदयामास । पुनश्च राज्ञा निवेदितम्- “सर्वत्र निराकुलत्वेऽपि मम पत्नी सुदक्षिणा सन्तानरहितास्तीति रत्नपूर्णापि मेदिनी मां न सुखयति । इदं पैतृकमृणं मां बन्धनस्तम्भो गजमिव पीडयति, अतस्तन्मोचकमुपायमादिशतु” इति । ततो ध्यानदृष्ट्या विलोक्य गुरुर्वशिष्ठोऽगादीत्, “पुरा स्वर्गात् प्रतिनिवर्तमानेन त्वया ऋतुमतीं पत्नीं सुदक्षिणां

चिन्तयता मार्गे प्रदक्षिणार्हा कामधेनुर्न सत्कृता । अतस्तया मत्प्रसूतिमनाराध्य तव सन्ततिर्मा भूदिति शापो दत्तः । गङ्गारवेण स शापस्त्वया सूतेन च न श्रुतः । इदानीं तस्याः कामधेनोः सुता नन्दिनी ममाश्रमे वर्तते, सपत्नीकस्त्वं तां श्रद्धयाऽऽराधय, सन्तुष्टा सती सा तव कामं पूरयिष्यति" इति ।

## नन्दिनीवर्णनम्

वशिष्ठाश्रमस्था धेनुः कामधेनोः पुत्री वर्तते । तस्या नाम नन्दिनी इत्यासीत् । पाटलवर्णा सा धेनुर्ललाटे नवं चन्द्रमिव श्वेतरोमाङ्कं धारयति स्म । पीनपयोधरा सा यदा वत्सं स्मरति स्म तदा स्तनेभ्यः प्रवहता क्षीरेण सकलं भुवमासिञ्चति स्म । खुरोद्भूतैर्धूलिभी राज्ञो गात्रं स्पृष्ट्वा तीर्थस्नानजनितां पवित्रतां कुर्वती नन्दिनीनाम्नी धेनुरपि तदैव वनादागतवती । तां दृष्ट्वा वशिष्ठः पुनरवदत्, "हे राजन् ! खेदं मा कुरु, सिद्धिं शीघ्रभाविनीं मन्यस्व, यतो हि नामग्रहणानन्तरमेवेयं कल्याणी त्वत्समीपमुपस्थिता" इति ।

राज्ञा दिलीपेन गुरोर्वशिष्ठस्य निर्देशानुसारेण सन्तानप्राप्तये तस्या एव नन्दिन्याः सेवा कर्तव्यासीत् । अत एव कुलगुरुर्वशिष्ठः तस्याः सेवाप्रकारं दर्शयन् राजानमुवाच- हे राजन् ! भवता वन्यकन्दमूलादिकं भुङ्क्त्वा सदानुगमनेनैषा धेनुः प्रसादनीया । तस्यां प्रस्थितायां सत्यां त्वयापि प्रस्थानं कार्यम् । तस्यां स्थितायां स्थेयम् । तस्यामुपविष्टायां त्वयाप्युपवेश्यम् । तस्यां जलं पीतवत्यां त्वयापि जलं पेयम् । एतेन प्रकारेण सर्वथा श्रद्धया स्वयं च तस्याश्छायेव भूत्वा सेवां कुरु । एषा सुदक्षिणा च पवित्रीभूय प्रातः वनगमनसमये किञ्चिद् दूरं धेनुमनुव्रजतु । सायं च वनादागच्छन्तीं तां प्रत्युद्गच्छतु । इत्थं सेवया तव कार्यसिद्धिर्भविष्यति, अविघ्नमस्तु, इति ।

एवमाशिषं दत्त्वा मुनिर्वशिष्ठो वन्यसामग्रीभिरेव राज्ञो भोजनवासस्थानादिप्रबन्धमकरोत् । राजापि सुदक्षिणासहितः कुलपतिना निर्दिष्टां पर्णशालामध्यास्य सानन्दं निशां यापयित्वा प्रातः शिष्याणामध्ययनरवेण सह समुत्थितः ।

(इति प्रथमसर्गस्य सङ्क्षिप्ता कथा ।)

**पञ्चदशः पाठः**

# सूर्यवंशवर्णनोपक्रमः

**प्रसङ्गः**

सकलकविशिरोमणिः महाकविः कालिदासो रघुवंशमहाकाव्यस्य निर्विघ्नतया परिसमाप्तिं कामयमान आदौ पार्वतीपरमेश्वरयोर्नमस्कारात्मकं मङ्गलमाचरति-

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥१॥**

**अन्वयः**

(अहम्) वागर्थप्रतिपत्तये वागर्थौ इव सम्पृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वन्दे ।

व्याख्या

अहम् = कालिदासः, वाक् च अर्थश्च वागर्थौ तयोः प्रतिपत्तिः तस्यै वागर्थप्रतिपत्तये = शब्दार्थज्ञानाय, वाक् च अर्थश्च तौ वागर्थौ = शब्दार्थौ, इव = यथा, सम्पृक्तौ = नित्यं मिलितौ, जगतः = लोकस्य, माता च पिता च पितरौ तौ पितरौ = मातरपितरौ, ('पिता माता' इति सूत्रेण एकशेषः), "मातारपितरौ पितरौ मातापितरौ प्रसूजनयितारौ", इत्यमरः, पार्वती च परमेश्वरश्च तौ पार्वतीपरमेश्वरौ = उमामहेश्वरौ, वन्दे = अभिवादये (नमस्करोमि, इत्यर्थः) । अस्मिन् सर्गेऽन्तिमं श्लोकं विहाय सर्वत्रानुष्टुब्वृत्तम् वर्तते ।

**भावार्थः**

शब्दार्थौ इव नित्यं मिलितौ जगत्स्रष्टारौ पार्वतीपरमेश्वरौ शब्दार्थज्ञानप्रदानसमर्थौ स्तः । अतोऽहं कालिदासः शब्दार्थज्ञानलाभाय तौ नमस्करोमि ।

महाकविः कालिदासः स्वकीयामल्पज्ञतां प्रकटयन् विदुषां पुरतो निजविनयं प्रदर्शयति-

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥२॥**

### अन्वयः

सूर्यप्रभवः वंशः क्व ? अल्पविषया (मम) मतिश्च क्व ? (अहम्) मोहात् उडुपेन दुस्तरम् सागरम् तितीर्षुः अस्मि ।

### व्याख्या

प्रभवति अस्मात् इति प्रभवः कारणम्, सूर्यः प्रभवः यस्य स सूर्यप्रभवः = दिवाकरोत्पन्नः, (सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः, इत्यमरः) वंशः = कुलम्, क्व = कुत्र ? अल्पः विषयः यस्याः सा अल्पविषया = स्वल्पज्ञेयार्था, (मम) मतिः = बुद्धिश्च, क्व = कुत्र ? (उभयोर्महदन्तरम् अस्ति इत्यर्थः), अहम् = कालिदासः, मोहात् = अज्ञानात्, उडुपेन = अल्पनौकया, दुःखेन तरितुं शक्यं दुस्तरम् = सन्तरणकठिनम्, सागरम् = समुद्रम्, तितीर्षुः (सरस्वान् सागरोऽर्णवः, इत्यमरः), तरितुमिच्छति इति तितीर्षति, तितीर्षति इति तितीर्षुः = पारं गन्तुम् उत्सुकः, ('सनाऽऽशंसभिक्ष उः' इति उप्रत्ययः), अस्मि = विद्ये ।

### भावार्थः

विस्तृतस्य सूर्यवंशस्य स्वल्पज्ञानयुताया मम बुद्धेश्च महदन्तरमस्ति, तथापि अल्पनौकामादायाज्ञानवशीभूतोऽहं विशालं सागरं तरितुमिच्छामि । यथा अल्पनौकया समुद्रतरणं न सुकरं तथा ममाल्पबुद्ध्या सूर्यवंशवर्णनमपि न सुकरम् ।

### प्रसङ्गः

महाकविः कालिदासः सूर्यवंशवर्णने स्वकीयमुपहासं सम्भावयति-

**मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।**
**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥३॥**

### अन्वयः

मन्दः (तथापि) कवियशःप्रार्थी (अहम्) प्रांशुलभ्ये फले लोभादुद्बाहुः वामन इवोपहास्यतां गमिष्यामि ।

### व्याख्या

मन्दः = मूढः, (अल्पमतिः, इत्यर्थः), तथापि कवीनां यशः कवियशः तत् प्रार्थयते तच्छील इति कवियशःप्रार्थी = कविकीर्तिकामुकः, अहम् = कालिदासः, प्रांशुना लभ्यं तस्मिन् प्रांशुलभ्ये = उन्नतजनेन सहजतया प्राप्ये, फले = प्रसवे, लोभात् = लोलुपतया, उद्गतौ बाहू यस्य स उद्बाहुः = ऊर्ध्वभुजः,

वामनः इव = खर्वः इव (खर्वो ह्रस्वश्च वामनः इत्यमरः), उपहास्यताम् = उपहासयोग्यताम्, गमिष्यामि = प्राप्स्यामि ।

**भावार्थः**

यथोन्नतपुरुषलभ्यं फलमादातुमुद्यतं लोभाविष्टमूर्ध्वबाहुं वामनं जना उपहसन्ति तथैव मन्दबुद्धित्वेऽपि कवीनां कीर्तिमिच्छन्तं मां विद्वांस उपहसिष्यन्ति ।

**प्रसङ्गः**

महाकविः कालिदासः सूर्यवंशीयनृपाणां चरित्रवर्णने पूर्वं कृतच्छिद्रे मणौ सूत्रस्येव स्वकीयां गतिं सम्भावयति-

**अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।**
**मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥४॥**

**अन्वयः**

अथवा पूर्वसूरिभिः कृतवाग्द्वारे अस्मिन् वंशे वज्रसमुत्कीर्णे, मणौ, सूत्रस्य, इव, मे, गतिः, अस्ति ।

**व्याख्या**

अथवा = आहोस्वित्, पूर्वे च ते सूरयस्तैः पूर्वसूरिभिः = प्राच्यैः पण्डितैर्वाल्मीक्यादिभिः कविभिः, कृतं वाक् एव द्वारं तस्मिन् कृतवाग्द्वारे = विहितवाणीप्रवेशे, (रामायणादिप्रबन्धरूपया वाण्या निर्मितप्रवेशमार्गे, इत्यर्थः), अस्मिन् = पूर्वोक्ते, वंशे = अन्ववाये (रघुकुलनृपाणां चरित्रवर्णने इत्यर्थः), (वंशोऽन्ववायः सन्तानः, इत्यमरः), वज्रेण समुत्कीर्णस्तस्मिन् वज्रसमुत्कीर्णे = मणिवेधकसूचीविशेषेण विद्धे, मणौ = रत्ने, सूत्रस्य इव = तन्तोः इव, मे = मम, गतिः = सञ्चारः, अस्ति = विद्यते ।

**भावार्थः**

वाल्मीक्यादिभिः पूर्वकविभी रामायणादिप्रबन्धरचनाद्वारा रघुवंशे प्रवेशः कृत एव, अतो ममापि तत्र वंशे समुद्भूतानां राज्ञां चरित्रवर्णने हीरकविद्धे मणौ तन्तोरिव वाक्प्रसरोऽस्ति ।

**प्रसङ्गः**

इतोऽग्रे पञ्चभिः श्लोकैर्महाकविः कालिदासः कारणप्रस्तुतिपुरस्सरं रघुवंशवर्णनस्य प्रतिज्ञां करोति-

**सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।**
**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥५॥**

**अन्वय:**

सोऽहमाजन्मशुद्धानाम्, आफलोदयकर्मणाम्, आसमुद्रक्षितीशानाम्, आनाकरथवर्त्मनाम् (रघूणाम्, अन्वयम्, वक्ष्ये, इति, उत्तरस्थेन नवमपद्येन सह सम्बन्ध:) ।

**व्याख्या**

स: = मन्दमति:, अहम् = कालिदास:, जन्मन आरभ्य आजन्म, आजन्म शुद्धा आजन्मशुद्धास्तेषाम् आजन्मशुद्धानाम् = जन्मारभ्य गर्भाधानादिसंस्कारेण परिपूतानाम्, फलोदयम् अभिव्याप्य इति आफलोदयम् आफलोदयं कर्म येषां ते तेषाम् - आफलोदयकर्मणाम् = फलसिद्धिपर्यन्तं सततं कर्मानुष्ठानरतानाम्, समुद्रम् अभिव्याप्य इति आसमुद्रम् आसमुद्रं क्षितीशा आसमुद्रक्षितीशास्तेषाम् - आसमुद्रक्षितीशानाम् = समुद्रपर्यन्तपृथिवीपालानाम्, नाकम् अभिव्याप्य इति आनाकम् आनाकं रथस्य वर्त्म आनाकरथवर्त्म तदस्ति येषां ते आनाकरथवर्त्मान: तेषाम् - आनाकरथवर्त्मनाम् = स्वर्गपर्यन्तं स्यन्दनगतिमताम्, (ईदृशानां रघूणाम् = रघुकुलोत्पन्नानां नृपाणाम्, अन्वयम् = वंशम्, वक्ष्ये = कथयिष्यामि, इत्युत्तरेण नवमपद्येन सह सम्बन्ध: ।)

**भावार्थ:**

कालिदास: प्रतिज्ञां करोति यदहं जन्मसमयादेव गर्भाधानादिसंस्कारेण शुद्धानां फलसिद्धिपर्यन्तमुद्योगशीलानां समुद्रपर्यन्तपृथिवीश्वराणां रथेन स्वर्गपर्यन्तगामिनां रघुकुलोत्पन्ननृपाणां वंशवर्णनं करिष्ये ।

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।**
**यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥६॥**

**अन्वय:**

(स:, अहम्) यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां यथापराधदण्डानां यथाकालप्रबोधिनां (रघूणाम् अन्वयम् वक्ष्ये) ।

**व्याख्या**

स = पूर्वोक्त: मन्दबुद्धि:, अहम् = कालिदास:, विधिम् अनतिक्रम्य यथाविधि यथाविधि हुता अग्नयो यैस्ते यथाविधिहुताग्नयस्तेषां यथाविधिहुताग्नीनाम् = विधिपूर्वकमग्नौ कृतहवनानाम्, कामम् अनतिक्रम्य यथाकामं यथाकामम् अर्चिता अर्थिनो यैस्ते यथाकामार्चितार्थिनस्तेषां यथाकामार्चितार्थिनाम् = यथेच्छं सत्कृतयाचकानाम्, (याचकानाम् इच्छानुसारेण तेषां सत्कारं कुर्वताम्, इत्यर्थ:), अपराधम् अनतिक्रम्य यथापराधं यथापराधं दण्डो येषां ते यथापराधदण्डास्तेषां यथापराधदण्डानाम् = अपराधानुसारेण दण्डं कुर्वताम्, कालम् अनतिक्रम्य यथाकालं यथाकालं प्रबुध्यन्ते इति - यथाकालप्रबोधिनस्तेषां यथाकालप्रवोधिनाम् = यथोचितसमये जागरणशीलानाम्, (ईदृशानां रघूणामन्वयं वक्ष्ये इत्युत्तरेण सम्बन्ध: ।)

### भावार्थः

मन्दमतिरहं कालिदासः शास्त्ररीत्या हवनं कुर्वतामर्थिजनानामिच्छानुरूपं सत्कृतयाचकानामपराधानुसारेण दण्ड्यं दण्डयतां समुचितसमये जागरणपराणां रघुकुलनृपाणामन्वयं वर्णयिष्ये ।

**त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥७॥**

### अन्वयः

(सः, अहम्) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणां यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् (रघूणाम्, अन्वयम् वक्ष्ये) ।

### व्याख्या

सः = मन्दमतिः, अहम् = कालिदासः, त्यागाय = दानाय, "त्यागो विहापितं दानम्", इत्यमरः, सम्भृतः अर्थो यैस्ते सम्भृतार्थास्तेषां- सम्भृतार्थानाम् = सञ्चितधनानाम्, (नित्यं दानं दातव्यं भवतीति विचार्य धनस्य सञ्चयं कुर्वताम् इत्यर्थः), सत्याय = तथ्याय, मितं भाषन्ते तच्छीला इति मितभाषिणस्तेषां मितभाषिणाम् = परिमितवादिनाम्, यशसे = कीर्तये, विजेतुम् इच्छन्ति विजिगीषन्ते, विजिगीषन्ते इति विजिगीषवस्तेषां विजिगीषूणाम् = विजयाभिलाषिणाम्, ('सनाऽऽशंसभिक्ष उः' इति उप्रत्ययः), प्रजायै = सन्तत्यै "प्रजा स्यात्सन्ततौ जने", इत्यमरः, गृहेण मेधन्ते इति गृहमेधिनस्तेषां गृहमेधिनाम् = दारपरिग्रहेण गृहस्थाश्रमं सेवताम्, (ईदृशगुणानां रघूणाम् अन्वयं वक्ष्ये इत्युत्तरेण सम्बन्धः ।)

### भावार्थः

अहं कालिदासः सत्पात्रे दानाय धनसङ्ग्रहं कुर्वतां सत्यार्थं परिमितवचनानां कीर्तिलाभाय शत्रून् विजेतुमिच्छतां सन्तानार्थं कृतदारपरिग्रहाणां रघूणाम् अन्वयं वर्णयिष्ये ।

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥८॥**

### अन्वयः

(सः अहम्), शैशवे अभ्यस्तविद्यानां यौवने विषयैषिणां वार्धके मुनिवृत्तीनाम् अन्ते योगेन तनुत्यजां रघूणाम्, अन्वयं वक्ष्ये ।

### व्याख्या

सः अहम् = मन्दमतिः कालिदासः, शिशोर्भावः शैशवं तस्मिन् शैशवे = बाल्ये, अभ्यस्ता विद्या यैस्ते तेषाम् अभ्यस्तविद्यानाम् = अधीतशास्त्राणाम्, यूनो भावो यौवनं तस्मिन् यौवने = तारुण्ये, विषयमिच्छन्तीति विषयैषिणस्तेषां विषयैषिणाम् = सांसारिकविषयभोगाभिलाषिणाम्, वृद्धस्य भावो वार्धकं तस्मिन् वार्धके = वृद्धावस्थायाम्, मुनेरिव वृत्तिर्येषां ते मुनिवृत्तयस्तेषां मुनिवृत्तीनाम् = मुनितुल्यव्यापाराणाम्, अन्ते = मरणसमये, योगेन = चित्तवृत्तिनिरोधेन, तनुं त्यजन्तीति तनुत्यजस्तेषां तनुत्यजाम् = शरीरत्यागिनाम्, (रघूणाम् अन्वयं वक्ष्ये इति उत्तरेण सम्बन्धः ।)

### भावार्थः

अहं कालिदासो बाल्यावस्थायां विद्याभ्यासं कुर्वतां यौवने सांसारिकविषयभोगाभिलाषिणां वृद्धावस्थायां वनगमनेन मुनिवज्जीवनं यापयतां जीवनान्तसमये च चित्तवृत्तिनिरोधात्मकेन योगेन शरीरत्यागिनां रघूणामन्वयं वर्णयिष्यामि ।

**रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।**
**तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥९॥**

### अन्वयः

(सः अहम्), तनुवाग्विभवोऽपि तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः सन् रघूणाम् अन्वयं वक्ष्ये ।

### व्याख्या

सः = मन्दबुद्धिः, अहम् = कालिदासः, वाचां विभवो वाग्विभवः तनु वाग्विभवो यस्य सः तनुवाग्विभवः = अल्पवचनप्रसारः, अपि = च, तेषां गुणास्तद्गुणास्तैस्तद्गुणैः = रघुवंशोत्पन्ननृपगुणैः (रघुकुलोद्भवानां नृपाणाम् आजन्मशुद्ध्यादिभिः शौर्यदयादाक्षिण्यादिभिश्च गुणैः, इत्यर्थः), कर्णम् = श्रोत्रम्, आगत्य = प्राप्य, चापलाय = चञ्चलत्वाय (शीघ्रं तद्गुणवर्णनव्यापाराय, इत्यर्थः), प्रचोदितः = प्रेरितः, सन् = भवन्, रघूणाम् = रघुकुलोत्पन्ननृपाणाम्, अन्वयम् = वंशम्, वक्ष्ये = वर्णयिष्यामि ।

### भावार्थः

अल्पवचनविस्तारोऽपि अहं कालिदासो बहुविधगुणगणविभूषितानां रघुकुलोत्पन्ननृपाणां गुणैः कर्णे आगत्य काव्यरचनायै चापल्याय प्रेरितः सन् तेषां रघूणां वंशं वर्णयिष्ये ।

**प्रसङ्गः**

महाकविः कालिदासः स्वविरचितस्य रघुवंशनामककाव्यप्रबन्धस्य परीक्षायै सतः प्रार्थयति-

**तं सन्तः श्रोतुमर्हन्ति सदसदव्यक्तिहेतवः ।**
**हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ॥१०॥**

**अन्वयः**

सदसद्व्यक्तिहेतवः सन्तः तं श्रोतुमर्हन्ति । हि हेम्नः विशुद्धिः वा श्यामिकाऽपि अग्नौ संलक्ष्यते ।

**व्याख्या**

सत् च असत् च सदसती, सदसतोर्व्यक्तिः सदसद्व्यक्तिस्तस्या हेतवः सदसद्व्यक्तिहेतवः = गुणदोषविवेचनकर्तारः, सन्तः = विद्वांसः, तम् = रघुवंशनामकं काव्यप्रबन्धम्, श्रोतुम् = आकर्णयितुम्, अर्हन्ति = योग्या भवन्ति । हि = यतः, हेम्नः = सुवर्णस्य, “स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्”, इत्यमरः, विशुद्धिः = शुद्धता (निर्दोषता इत्यर्थः), वा = अथवा, श्यामिका अपि = कृष्णता च (तुच्छगुणस्यान्यद्रव्यस्य संयोगेन जनिता दुष्टता चेत्यर्थः), अग्नौ = वह्नौ “अग्निर्वैश्वानरो वह्निः”, इत्यमरः, संलक्ष्यते = परिलक्ष्यते (ज्ञायते इत्यर्थः) ।

**भावार्थः**

विद्वांस एव काव्यस्य गुणदोषपरीक्षायै कुशला भवन्ति, अतस्ते ममाप्येतस्य प्रबन्धस्य गुणदोषौ विवेचयन्तु । यथा सुवर्णस्य शुद्धता वाशुद्धताग्नौ दृश्यते तथैव विदुषां परीक्षया काव्यस्यापि गुणदोषौ विज्ञायेते ।

# अभ्यासः

१. **अधोनिर्दिष्टं पद्यं सस्वरं पठत**

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

२. **अधस्तनप्रश्नानुत्तरयत**

(क) कौ जगतः पितरौ स्तः ?

(ख) कः स्वल्पनौकया दुस्तरं सागरं तर्तुमिच्छति ?

(ग) क उपहास्यतां गच्छति ?

(घ) रघुकुलोत्पन्ना नृपा वार्धके किं कुर्वन्ति ?

(ङ) कालिदासो रघूणां गुणैः किमर्थं प्रेरितः ?

(च) काव्यप्रबन्धं श्रोतुं के योग्याः सन्ति ?

३. **निम्नाङ्कितस्य श्लोकस्य व्याख्यां कुरुत**

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

४. **अधस्तनश्लोकस्य भावार्थं लिखत**

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥

५. **अधोलिखितानां पदानां पर्यायान् लिखत ।**

उडुपेन, मणौ, मतिः, अन्वयम्, शैशवे, वन्दे ।

६. **निम्नाङ्कितपदानां विग्रहं प्रदर्शयत ।**

वागर्थप्रतिपत्तये, प्रांशुलभ्ये, यथाविधिहुताग्नीनाम्, अभ्यस्तविद्यानाम्, विषयैषिणाम्, सदसदव्यक्तिहेतवः ।

**७. सन्धिं विच्छेदयत**

वागर्थाविव, योगेनान्ते, श्रोतुमर्हन्ति, ह्यग्नौ ।

**८. रघुवंशोत्पन्नानां राज्ञां वैशिष्ट्यं वर्णयत ।**

**९. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

वन्दे, गमिष्यामि, शैशवे, क्व, आगत्य ।

**१०. वंशशब्दस्य सर्वाणि रूपाणि लिखत ।**

**११. अधस्तनश्लोकं पठित्वा पृष्टानां प्रश्नानामुत्तराणि दत्त**

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

(क) सूर्यप्रभवो वंशः क आसीत् ?

(ख) कस्य अल्पविषया मतिः ?

(ग) दुस्तरशब्दस्य कोऽर्थः ?

(घ) 'अस्मि' इति कतमस्य पुरुषस्य रूपम् ?

**१२. अधस्तनश्लोकस्य संस्कृते सरलार्थं लिखत**

तं सन्तः श्रोतुमर्हन्ति सदसदव्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ॥

**१३. कालिदासस्य परिचयं दत्त ।**

**१४. अत्र पाठे पठितानां श्लोकानां सारं स्वकीयैः शब्दैर्लिखत ।**

षोडशः पाठः

# दिलीपवर्णनम्

**प्रसङ्गः**

महाकविः कालिदासः सूर्यवंशीयनृपाणां प्रथमपुरुषस्याविर्भावं दर्शयति-

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।**
**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥११॥**

**अन्वयः**

छन्दसां प्रणवः इव मनीषिणां माननीयः महीक्षिताम् आद्यः वैवस्वतः नाम मनुः आसीत् ।

**व्याख्या**

छन्दसाम् = वेदानाम्, प्रणवः = ओङ्कारः, इव = सदृशः, मनीषिणाम् = विदुषाम्, "धीरो मनीषी ज्ञः प्राज्ञः सन् सुधीः कोविदो बुधः", इत्यमरः, माननीयः = पूज्यः (अग्रणीः), मह्यां क्षयन्ते ऐश्वर्यवन्तो भवन्तीति ते महीक्षितस्तेषां महीक्षिताम् = पृथिवीपतीनाम्, आद्यः = प्रथमः, विवस्वतोऽपत्यं वैवस्वतः = विवस्वत्पुत्रः (सूर्यपुत्रः), नाम = वैवस्वतनाम्ना ख्यातः, मनुः (सप्तमो मनुः, इत्यर्थः), वैवस्वतमनुः, आसीत् = बभूव ।

**भावार्थः**

वेदमन्त्रेष्वादौ प्रयुज्यमानो य ओङ्कारो भवति तद्वद् विदुषां पूज्योऽग्रणीः राज्ञां प्रथमः सूर्यस्य पुत्रो वैवस्वतो नाम मनुर्बभूव ।

**प्रसङ्गः**

महाकविः कालिदासः सूर्यवंशे दिलीपजन्म प्रकाशयति-

**तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।**
**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥१२॥**

**अन्वयः**

शुद्धिमति तदन्वये शुद्धिमत्तरः राजेन्दुः दिलीपः इति क्षीरनिधौ इन्दुः इव प्रसूतः ।

**व्याख्या**

शुद्धिः अस्य अस्ति इति शुद्धिमान् तस्मिन् शुद्धिमति = दोषरहिते (निष्कलङ्के, पवित्रे वा, इत्यर्थः), तस्य अन्वयस्तस्मिन् तदन्वये = मनोर्वंशे, अयमनयोः अतिशयेन शुद्धिमान् शुद्धिमत्तरः = अतिशयेन पवित्रः पूतः विशुद्धो वा, राजा एव इन्दुः राजेन्दुः = पार्थिवचन्द्रः, (राजश्रेष्ठः इत्यर्थः), "राजा राट् पार्थिवः क्ष्माभृन्नृपभूप-महीक्षितः" इति, "हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः" इति चामरः, दिलीपः इति = दिलीपः इति नाम्ना ख्यातः, क्षीरस्य निधिस्तस्मिन् क्षीरनिधौ = क्षीरसागरे, इन्दुः इव = चन्द्रः इव, प्रसूतः = जातः ।

**भावार्थः**

तस्मिन् मनुवंशे शुद्धचरित्रवान् राजश्रेष्ठः दिलीपः क्षीरसमुद्रे चन्द्र इव प्रसूतः ।

**प्रसङ्गः**

महाकविः कालिदासः दिलीपस्य देहसौन्दर्यं वर्णयति-

**व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।**
**आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥१३॥**

**अन्वयः**

(सः) व्यूढोरस्कः वृषस्कन्धः शालप्रांशुः महाभुजः आत्मकर्मक्षमं देहम् आश्रितः क्षात्रः धर्मः इव (आसीत्) ।

**व्याख्या**

(सः = दिलीपः), व्यूढं विपुलमुरो यस्य स व्यूढोरस्कः = विपुलवक्षस्थलः, वृषस्य स्कन्ध इव स्कन्धो यस्य स वृषस्कन्धः = वृषभांसः, शालवत् प्रांशुः शालप्रांशुः = शालनामकतरुरिवोन्नतः, महान्तौ भुजौ यस्य स महाभुजः = महाबाहुः (आजानुबाहुः इत्यर्थः), आत्मनः कर्म आत्मकर्म, तस्मिन् क्षमस्तम् आत्मकर्मक्षमम् = निजकर्मसम्पादनसमर्थम् (स्वस्य क्रियाणां सम्पादने सर्वथा समर्थम्, इत्यर्थः), देहम् = शरीरम्, "कायो देहः क्लीबपुंसोः शरीरं वर्ष्म विग्रहः", इत्यमरः, आश्रितः = प्राप्तः, क्षात्रः = क्षत्रियसम्बन्धी, धर्मः इव = स्वभावः इव (मूर्तिमान् पराक्रम इव इत्यर्थः), आसीत् = बभूव ।

**भावार्थः**

विशालवक्षःस्थलो वृषस्कन्धः शालतरुवदुन्नतो दीर्घभुजः स राजा दिलीपः क्षत्रियधर्मानुसारेण निजकार्यस्य सम्पादने समर्थः शरीरधारी क्षात्रधर्म इव आसीत् ।

**प्रसङ्गः**

महाकविः कालिदासः दिलीपस्य शौर्यं वर्णयति-

**सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना ।**
**स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥१४॥**

**अन्वयः**

(स) सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना सर्वोन्नतेन आत्मना मेरुः इव उर्वीं क्रान्त्वा स्थितः (आसीत्) ।

**व्याख्या**

(सः = दिलीपः), अतिरिक्तः सारो यस्य सोऽतिरिक्तसारः, सर्वेभ्योऽतिरिक्तसारः सर्वातिरिक्तसारस्तेन सर्वातिरिक्तसारेण = सर्वेभ्यो भूतेभ्योऽधिकबलेन, “सारो बले स्थिरांशे च”, इत्यमरः, सर्वाणि तेजसाऽभिभवतीति स सर्वतेजोऽभिभावी तेन सर्वतेजोऽभिभाविना = सकलप्रभावाभिभवकारिणा, (सर्वानपि प्राणिनः स्वतेजसा तिरस्कारकारिणा, इत्यर्थः), सर्वेभ्य उन्नतस्तेन सर्वोन्नतेन = अतिशयोच्चैर्वर्तमानेन (सर्वसम्माननीयेन, इत्यर्थः), आत्मना = शरीरेण, मेरुः = सुमेरुः, इव =यथा, उर्वीम् = पृथिवीम्, क्रान्त्वा = आक्रम्य, स्थितः = अवस्थितः, आसीत् ।

**भावार्थः**

सुमेरुपर्वतो यथा पृथ्वीं क्रान्त्वा स्थितो वर्तते तथैव राजा दिलीपोऽपि स्वपराक्रमेण सर्वान् नृपान् वशीकृत्य स्थित आसीत् ।

**प्रसङ्गः**

महाकविः कालिदासः दिलीपस्य प्रज्ञादिकं वर्णयति-

**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।**
**आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥१५॥**

**अन्वयः**

(स) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः, आगमैः सदृशारम्भः, आरम्भसदृशोदयः (आसीत्) ।

### व्याख्या

(सः = दिलीपः), आकारेण सदृशी प्रज्ञा यस्य स आकारसदृशप्रज्ञः = आकृतितुल्यबुद्धिः, प्रज्ञया = बुद्ध्या, सदृश आगमो यस्य स सदृशागमः = बुद्ध्यनुरूपशास्त्रपरिश्रमः (प्रज्ञानुरूपेण कृतशास्त्रपरिश्रमः, इत्यर्थः), आगमैः = राजनीत्यादिभिः शास्त्रैः, सदृशः आरम्भो यस्य स सदृशारम्भः = शास्त्रतुल्यकार्यारम्भः (राजनीत्यादिशास्त्रनिर्दिष्टसरण्या कार्यसम्पादनशीलः, इत्यर्थः), आरम्भेण सदृश उदयो यस्य स आरम्भसदृशोदयः = उपक्रमानुरूपफलसिद्धिश्च आसीत् ।

### भावार्थः

राजा दिलीपः शरीराकृतिसदृशबुद्धिर्बुद्धिसदृशशास्त्रवेत्ता शास्त्रनिर्दिष्टसिद्धान्तानुसारेण कर्मारम्भकारी तथारब्धकर्मानुसारं प्राप्तफलश्चासीत् ।

### प्रसङ्गः

महाकविः कालिदासो दिलीपस्य गुणान् वर्णयति-

**भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।**
**अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥१६॥**

### अन्वयः

स भीमकान्तैः नृपगुणैः उपजीविनां यादोरत्नैः अर्णवः इव अधृष्यश्च अभिगम्यश्च बभूव ।

### व्याख्या

(सः = दिलीपः), भीमाश्च कान्ताश्च तैः भीमकान्तैः = भयङ्करमनोज्ञैः (भयप्रदैर्मनोहरैश्च, इत्यर्थः), नृपस्य गुणास्तैः नृपगुणैः = राजगुणैस्तेजःप्रतापादिभिः, उपजीवन्तीति उपजीविनस्तेषाम् उपजीविनाम् = आश्रितानाम् (राज्ञो दिलीपस्य आश्रये स्थितानाम्, इत्यर्थः), यादांसि च रत्नानि च इति यादोरत्नानि तैः यादोरत्नैः = जलजीवमणिभिः (मकरादिभिर्जलजन्तुभिर्मुक्तादिभिर्मणिभिश्च, इत्यर्थः), "यादांसि जलजन्तवः", इत्यमरः, अर्णवः = सागरः इव, "सरस्वान् सागरोऽर्णवः", इत्यमरः, अधृष्यश्च = अनभिभवनीयश्च (तिरस्कर्तुं न शक्यः, इत्यर्थः), अभिगम्यश्च = आश्रयणीयश्च, बभूव = आसीत् ।

### भावार्थः

राजा दिलीपः समुद्रसमान आसीत् । यथा समुद्रो ग्राहादिभिर्जलजन्तुभिर्भयानको रत्नादिना मनोरमश्च भवति तथैव राजा दिलीपोऽपि तेजःप्रतापादिभिर्गुणैर्भयानको दयादाक्षिण्यादिभिर्गुणैश्चाश्रययोग्यश्च बभूव ।

**प्रसङ्गः**

महाकविः कालिदासो दिलीपराज्ये प्रजानां सदाचारशालितां वर्णयति-

**रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।**
**न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥१७॥**

**अन्वयः**

नियन्तुः तस्य (नियन्तुः) नेमिवृत्तयः (इव) प्रजाः, आमनोः क्षुण्णात् वर्त्मनः परं रेखामात्रमपि न व्यतीयुः ।

**व्याख्या**

नियन्तुः = शिक्षकस्य सारथेश्च, तस्य = राज्ञो दिलीपस्य, नेमीनां वृत्तिरिव वृत्तिर्यासां ताः नेमिवृत्तयः = चक्रधाराव्यापाराः (इव), प्रजाः = जनाः, आमनोः = मनुमारभ्य, क्षुण्णात् = अभ्यस्तात्, नेमिपक्षे प्रहतात्, वर्त्मनः = आचारपद्धतेः, नेमिपक्षे मार्गस्य, "अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः", इत्यमरः, परम् = अधिकम्, (इतस्ततः, इत्यर्थः), रेखामात्रम् = रेखाप्रमाणम्, अपि = च, न व्यतीयुः = नातिक्रान्तवत्यः ।

**भावार्थः**

कुशलस्य शासकस्य दिलीपस्य शासने वर्तमानाः प्रजा मनुकालात् प्रचलितं सदाचारमार्गं रेखामात्रमपि नोल्लङ्घयन्ति स्म । यथा कुशलेन सारथिना प्रचालितस्य रथस्य चक्रं पूर्वं चक्रपरिभ्रमणेन निर्मितं मार्गं रेखामात्रमपि न त्यजति तथैव दिलीपशासने प्रजानां सदाचारमार्गे रेखामात्रस्याप्यनुल्लङ्घनीयता आसीत् । दिलीपस्य राज्ये प्रजा मनुतः पालितामाचारपद्धतिमीषदपि नोल्लङ्घितवत्यः, इत्याशयः ।

**प्रसङ्गः**

महाकविः कालिदासः प्रजाहितायैव करग्रहणरूपं दिलीपचरित्रं वर्णयति-

**प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।**
**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥१८॥**

**अन्वयः**

स प्रजानां भूत्यर्थमेव ताभ्यः बलिमग्रहीत् । हि रविः सहस्रगुणमुत्स्रष्टुं रसमादत्ते ।

**व्याख्या**

सः = महाराजो दिलीपः, प्रजानाम् = जनानाम्, भूत्यर्थम् = वृद्ध्यर्थम्, एव = निश्चयेन, ताभ्यः = प्रजाभ्यः,

बलिम् = षष्ठांशरूपं करम्, जग्राह = अग्रहीत् । हि = यतः, रविः = सूर्यः, सहस्रं गुणा यस्मिन् कर्मणि तद् यथा स्यात्तथा सहस्रगुणम् = सहस्रगुणाधिकम्, उत्स्रष्टुम् = दातुम्, रसम् = नदीसमुद्रगतं जलम्, आदत्ते = बाष्परूपेण गृह्णाति ।

### भावार्थः

राजा दिलीपः प्रजानां समृद्ध्यर्थमेव ताभ्य आयस्य षष्ठांशभागरूपं करमग्रहीत् । यथा सूर्यो लोकस्य हितार्थं मेघमाध्यमेन पृथिव्यां सहस्रगुणं जलं दातुं समुद्राद् बाष्परूपेण जलं गृह्णाति तथैव दिलीपोऽपि प्रजाभ्यः करं गृहीत्वा तासामेव कल्याणाय बहुधनं व्ययीकृत्य धर्मार्थादिकार्यमकरोत् ।

### प्रसङ्गः

महाकविः कालिदासो दिलीपस्य बुद्धेः शौर्यस्य चोत्कर्षं वर्णयति-

**सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।**
**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥१९॥**

### अन्वयः

तस्य सेना परिच्छदः (बभूव) । अर्थसाधनं द्वयमेव शास्त्रेषु अकुण्ठिता बुद्धिः धनुषि आतता मौर्वी च (अभूत्) ।

### व्याख्या

तस्य = राज्ञो दिलीपस्य, सेना = पृतना, (रथाश्वगजपदातिरूपं चतुरङ्गबलम्, इत्यर्थः), "ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः", इत्यमरः, परिच्छाद्यतेऽनेनेति परिच्छदः = उपकरणम् (राजनीतेर्निर्देशानुसारेण भूषणरूपेण अपि किं न भवेत् सेना राज्ये स्थापनीया, इति इव छत्रचामरादितुल्यम्, इत्यर्थः), बभूव = आसीत् । अर्थस्य साधनम् अर्थसाधनम् = प्रयोजनपूर्तिः तु, (सेनास्थापनस्य प्रयोजनस्य निर्वर्तनं तु, इत्यर्थः), द्वयम् एव = द्वे उपकरणे एव अभूताम्, प्रथमा शास्त्रेषु = राजनीत्यादिशास्त्रेषु, अकुण्ठिता = अव्याहता, बुद्धिः = दिलीपस्य मतिः, द्वितीया च, धनुषि = दिलीपस्य कार्मुके, आतता = आरोपिता, मौर्वी = ज्या च, अभूदित्यर्थः ।

### भावार्थः

महाराजदिलीपस्य चतुरङ्गिणी सेना शोभार्थं स्थापितेवासीत् । तस्याः प्रयोजनार्थं च तस्य राज्ञ एका अकुण्ठिता बुद्धिरासीत्, अपरा च सदा धनुष्यारोपिता मौर्वी अभूत् । दिलीपस्य शौर्यं नीतिपुरःसरमेवाभूदित्यर्थः ।

**प्रसङ्गः**

महाकविः कालिदासो दिलीपस्य गुप्तकार्यसम्पादनकौशलं वर्णयति-

**तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।**
**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥२०॥**

**अन्वयः**

संवृतमन्त्रस्य गूढाकारेङ्गितस्य च तस्य प्रारम्भाः प्राक्तनाः संस्काराः इव फलानुमेयाः (आसन्) ।

**व्याख्या**

संवृतो मन्त्रो यस्य सः संवृतमन्त्रस्तस्य संवृतमन्त्रस्य = गुप्तविचारस्य, आकारश्च इङ्गितञ्च आकारेङ्गिते गूढे आकारेङ्गिते यस्य स गूढाकारेङ्गितस्तस्य गूढाकारेङ्गितस्य = गुप्ताकृतिहृद्गतभावस्य, तस्य = राज्ञो दिलीपस्य, प्रारम्भाः = कार्ये प्रयुक्ताः सामाद्युपायाः, प्राक्तनाः = पूर्वजन्मोद्भवाः, संस्काराः = कर्मवासनाः, इव = यथा, फलानुमेयाः = फलेन अनुमातुं योग्याः, आसन् ।

**भावार्थः**

राजा दिलीपः कस्मिन् समये किं कार्यमारब्धवान् इति कुत्र सामाद्युपायं प्रयुक्तवान् इति च पूर्वं ज्ञातुं कोऽपि जनो न शक्नोति स्म । स किं विचारयति, इत्यपि ज्ञातुं न शक्यते स्म । यथा कस्यापि जनस्य सांसारिकं फलभोगं विलोक्यानेन पूर्वजन्मनि सुकृतं दुष्कृतं वा कृतमासीदित्यनुमातुं शक्यते तथैव राज्ञो दिलीपस्यापि कार्यस्य परिणामं विलोक्यैवानेन पूर्वं तत्र साम प्रयुक्तमन्यत्र दानेन कार्यं साधितम्, इत्यादिकमनुमायैतत् कार्यमारब्धम् आसीदिति जनैर्ज्ञायते स्म ।

स दिलीपः स्वकीयं हर्षशोकादिसूचकं लक्षणं गुप्तरूपेण रक्षति स्म । अतस्तस्य सामदानादिप्रयोगसहिताः सर्वे कार्यारम्भाः पूर्वजन्मनः संस्कारसमानाः परिणामप्रदर्शनेनैव ज्ञायन्ते स्म ।

## अभ्यासः

१. **अस्य पाठस्य कठिनशब्दान् सङ्कलय्य गुरोः सहयोगेन तेषामर्थज्ञानं कुरुत ।**

२. **अधोलिखितं श्लोकं शुद्धं वाचयत**

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥

३. **सप्रसङ्गं व्याख्यां कुरुत**

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।

आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥

४. **निम्नाङ्कितश्लोकस्याशयं प्रकटयत**

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥

५. **अधोलिखितं श्लोकं पठित्वा प्रदत्तान् प्रश्नानुत्तरयत**

भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।

अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥

(क) राजा दिलीपः केन कारणेन अधृष्यः ?

(ख) राजा दिलीपः किमर्थं जनैरभिगम्यः ?

(ग) उपजीविनः के आसन् ?

(घ) अस्मिन् श्लोके कोऽलङ्कारो वर्तते ?

(ङ) दिलीपस्य गुणाः कीदृशा आसन् ?

६. **अधोलिखितानां शब्दानां पर्यायान् दत्त**

आदत्ते, प्रसूतः, क्षीरनिधिः, मेरुः, उर्वीम्, नेमिवृत्तयः, मौर्वी ।

७. **अधोलिखितानां पदानां विग्रहं प्रदर्शयत**

महीक्षिताम्, आत्मकर्मक्षमम्, सर्वातिरिक्तसारेण, आकारसदृशप्रज्ञः, यादोरत्नैः, नेमिवृत्तयः, सहस्रगुणम्, गूढाकारेङ्गितस्य ।

८. **अधोलिखितानि पदानि प्रयुज्य स्वतन्त्ररूपेण वाक्यानि रचयत**

माननीयः, ओङ्कारः, इन्दुः, आश्रितः, क्रान्त्वा, अभिगम्यः ।

९. **राज्ञो दिलीपस्य चरित्रं स्वकीयैः शब्दैर्वर्णयत ।**

# प्रबन्धपरिचयः

## उपक्रमः

लौकिकव्यवहारे यथा शब्दानां वाक्यानां च प्रयोगः क्रियते तेनैव प्रकारेण साहित्ये न क्रियते । साहित्ये नु विशिष्टा पदविन्यासशैली प्रयुज्यते । साहित्यं भवति शब्दार्थयोः सुललितविन्यासयुक्ता स्वतन्त्रा रचना । स्वतन्त्ररचनारूपस्य साहित्यस्य सामान्यतः पद्यं गद्यं मिश्रं चेति त्रयः प्रकाराः भवन्ति । तत्र प्रबन्धो गद्यसाहित्यान्तर्गतो वर्तते । अस्य स्वरूपभेदादिकमत्र प्रस्तुत्य धर्मसम्बद्धस्य प्रबन्धस्य समावेशेनायं पाठः पूर्यते ।

## प्रबन्धपरिचयः

गद्यसाहित्यस्य स्वतन्त्रां रचनां प्रबन्धरूपेण गृह्णन्ति जनाः । गद्ये रचिता नातिदीर्घा न चातिह्रस्वा अर्थात् मध्यमायामयुक्ता गद्यरचना प्रबन्ध इति कथ्यते । अत्र प्रसङ्गे गद्यस्याल्पविस्तारयुतस्य रचनाविशेषस्य कृते प्रबन्धः निबन्धः प्रस्तावश्चेति त्रयः शब्दाः प्रयुज्यन्ते । एते सामान्यतः समानार्थकाः मन्यन्ते । शब्दस्य व्युत्पत्तेराधारेणैषां परस्परं भिन्नार्थबोधकत्वं व्यवहारे दृश्यत एव ।

प्रबन्धरचना गद्यात्मकरचनाया विशिष्टा शैली वर्तते । प्रबन्धशब्दार्थः प्रकर्षेण बध्यन्ते विचारा अस्मिन्निति व्युत्पत्त्या प्रकृष्टतया विचाराणां बन्धनमिति । यत्र प्रकृष्टतया विचाराणां समावेशः क्रियते तादृशी रचना प्रबन्ध इति विज्ञेयम् । विचारा यस्मिन् निःशेषेण बध्यन्ते स निबन्धः कथ्यते । यत्र च कोऽपि विशिष्टो विचारः प्रस्तूयते तस्य 'प्रस्तावः' इति संज्ञा । तस्य तात्पर्यं तु प्रयासः प्रयत्न इति । सीमितसमये सीमितस्थाने च स्वकीयप्रमुखविचारस्याभिव्यक्तेः प्रयत्नः 'एस्से' इति भवितुमर्हति । स च विचारः सोपपत्ति सोदाहरणं संक्षेपत एव प्रस्तोतुं शक्यते । यदाऽध्यापको निर्दिशति स्वविद्यार्थिनः 'अमुकविषये प्रबन्धं वा निबन्धं वा प्रस्तावं वा लिखत' तस्यायमेवार्थो भवति यदस्य विषयस्य सम्बन्धिनी यापि युष्माकं विचारधारा वर्तते सा सीमितसमये सीमितस्थाने (निर्दिष्टासु पङ्क्तिषु शब्देषु वा) सरल-सुन्दर-भाषया रोचकशैल्या सोपपत्ति सोदाहरणं प्रस्तोतव्येति । समेषामपि विचाराणां प्रस्तुतिः प्रबन्धे नहि क्रियते प्रकृष्टानामेव समावेशेन बन्धस्यापि प्रकर्षं विचार्य प्रबन्धरचना कर्तव्येत्यत्र विचारणीयम् ।

## प्रबन्धकलाया महत्त्वम्

"गद्यं कवीनां निकषं वदन्ति" इति कथ्यते । प्रबन्धस्तु गद्यसाहित्यम् । प्रबन्धलेखनादस्मद् विचाराः सुदृढा निश्चिताश्च भवन्ति । यदि वयं कस्यचिद् विषयस्य सम्बन्धे स्वविचारान् प्रकटयितुमसमर्थाश्चेत् कथं

नाम शिक्षिता वयम् ? ये तु विद्यार्थिनः प्रबन्धलेखने चतुरा भवन्ति ते स्वलेखनीबलेनान्येषु पत्रेषु च सफलतां प्राप्तुं शक्नुवन्ति । प्रबन्धलेखनं तावत् साफल्यस्य प्रथमं सोपानम् । वक्तारोऽपि, अन्ये महान्तश्च सर्वे, प्रथमं स्वविचारान् लिपिबद्धान् कुर्वन्ति । तेन ते साफल्यस्य द्वितीयं सोपानमधिरोहन्ति । विद्यार्थिनां प्रायः प्रबन्धलेखनं प्रति अरुचिरपि कदाचिद् दृश्यते तथापि प्रमादमालस्यञ्च विहाय लेखने प्रयत्नः छात्रैः करणीयः । उच्चश्रेण्यामध्ययनरतैर्विद्यार्थिभिः स्वहितमवलोकयद्भिः स्वयमप्यभ्यसनीयैषा कला ।

## प्रबन्धभेदाः

संसारे प्रकृतेर्विविधता प्राप्यते । जीवनशैली च जन्तूनां मानवानां वृक्षादीनां वा विभिन्नास्ति । तस्या एव प्रकृतेर्दर्शनेन लेखनं कर्तुं प्रयत्नः क्रियते चेत् तत्रानन्ताः खलु विषया दृष्टिपथमायान्ति । यथा पिपीलिकाया गजपर्यन्तं पत्र-पुष्प-फल-कण्टकेभ्यो दिवाकर-निशाकरपर्यन्तं जन्मनः पूर्वं मृत्योरनन्तरं भूत-वर्तमान-भावी सर्व अपि विषयः प्रबन्धरचनायां समावेशयितुं शक्यः । एतस्यां स्थितौ सामान्येन प्रबन्धस्य भेदाश्चतुर्धा विभक्ताः प्राप्यन्ते- विचारात्मकाः, वर्णनात्मकाः, आख्यानात्मकाः व्याख्यानात्मकाश्च ।

तत्र-

**(क) विचारात्मके प्रबन्धे**

(अ) कस्यचिद् गुणदोषस्वभावादीनां विचारः ।

(आ) सामाजिकानां, राजनीतिकानां, पारिवारिकाणां वा विषयाणां विचारः ।

(इ) विवादास्पदानां विषयाणां विमर्शः ।

(ई) साहित्यिकानां समालोचनात्मकानां वा विषयाणां विवेचनम् । कस्यचित् कवेर्वा लेखकस्य वा तस्य कृतेर्वा समालोचना । कस्यचिन्महापुरुषस्य सूक्तेः सिद्धान्तस्य वा विचारः ।

**(ख) वर्णनात्मके प्रबन्धे**

(अ) नदीनगरसमुद्रपर्वतदेशानां वा योजनानां वा पदार्थानां निर्माणविधेर्वा वर्णनम् । यथा- नेपालस्य राजधानी, स्वर्गद्वारितीर्थम्, सर्वोच्चशिखरं हिमालयः इत्यादि ।

(आ) प्राकृतिकानां दृश्यानां वर्णनम् । यथा- सूर्योदयस्य, उपवनस्य, नदीतटे सायङ्कालीनदृश्यस्य वा वर्णनम् ।

(इ) प्रसिद्धभवनानां वर्णनम् । यथा- रानीमहलवर्णनम् ।

(ई) पर्वमहोत्सवादेः वर्णनम् । यथा- वैशाखीपर्व, विजयादशमी, माघिपर्व, इत्यादि ।

(उ) संस्थानां वर्णनम् । यथा- नेपालसंस्कृतविश्वविद्यालयस्य, संयुक्तराष्ट्रसंघस्य वा वर्णनम् ।

**(ग) आख्यानात्मके (विवरणात्मके) प्रबन्धे**

(अ) महापुरुषाणां पूतात्मनां चरितम् । यथा- महात्मनो भगवतो गौतमबुद्धस्य चरितम् ।

एत आख्यानात्मकाः प्रबन्धाश्चरितात्मकाः अपि कथ्यन्ते ।

**(घ) व्याख्यात्मके प्रबन्धे-**

व्याख्यात्मकेषु प्रबन्धेषु कस्याश्चित् सूक्तेः कस्यचित् सिद्धान्तस्य वा व्याख्या क्रियते । यथा- 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन', 'सहसा विदधीत न क्रियामविवेकः परमापदां पदम्' इत्यादि । ते प्रबन्धा अपि बुद्धिपरा भवन्ति ।

## प्रबन्धरचनाया उपकरणानि

प्रबन्धरचनायां विषयस्यापेक्षया लेखकस्य व्यक्तित्वं विशेषं महत्त्वमावहति । प्रबन्धे खलु शोभनो विचारः प्रकृष्टया सरलया भाषया रुचिरया च शैल्या प्रस्तोतव्यो भवति । विचारः खलु प्रबन्धस्यात्मा । भाषा-शैल्यौ च तस्य शरीरम् । यदि शोभना अपि विचाराः सदोषया भाषयाऽरुचिरया वा शैल्या प्रस्तूयन्ते तर्हि ते नाकर्षन्ति पाठकानां श्रोतॄणां वा चेतांसि । यथा विकृतशरीराः पुरुषाः कुरूपाश्च नार्यो दर्शकानां लोचनानि नहि कर्षन्ति तथैव । किञ्चित् कालानन्तरं ते मरुभूम्यां प्रक्षिप्तानि बीजानीव स्वयमेव विलयं यान्ति । यदि भाषा सरला सुन्दरा भवेत्, शैली च रुचिरा स्यात् परं विचारा उदात्ता न स्युः, तर्हि सुभूषितं स्वलङ्कृतं मृतशरीरमिव तत्सर्वं व्यर्थमेव सम्पद्यते । अतः प्रबन्धस्येमानि त्रीण्यप्युपकरणानि सन्त्यावश्यकानि- शोभनो विचारः, प्रसादमयी भाषा, रुचिरा शैली च ।

आवश्यका यदि विचाराः प्रबन्धलेखने तर्हि ते कथमधिगन्तव्याः ? इति पृच्छायामुच्यते- विस्तृतेनाध्ययनेन ते प्राप्तव्याः । द्विधा खलु तद् अध्ययनम्- साहित्यिकं प्राकृतिकं च । एते द्वे एवावश्यके, मिथ एकैकस्य पूरकत्वात् ।

**(अ) साहित्यिकमध्ययनम्**

साहित्यं खलु मानवस्य परमं मित्रम् । एतत् सर्वेभ्यो लेखकेभ्यो विचारं ददाति, स्फूर्तिमोजोऽपि च । यदि लेखनं कठिनं तर्हि अध्ययनमपि सरलं नास्ति । विरला एव जानन्त्यध्ययनविधिम् । आङ्लभाषाया लब्धप्रतिष्ठेन प्रबन्धकारेण 'बेकन'-महोदयेन कथितं कस्मिंश्चित् स्थले, 'कानिचित् पुस्तकानि आस्वादनाय भवन्ति, कानिचित् च चर्वणाय' । अन्यत्र 'अध्ययनेन वयं विचारान् अधिगच्छामः, संवादेन चातुर्यं लेखनेन च निश्चिततताम्' इति । किमपि पुस्तकमुद्विग्नमनसा उदासीनेन वा नैवाध्येतव्यम् । समयनाश एव सः । अतः सावधानेन मनसा धैर्येण विविधविषयाणां पुस्तकानामध्ययनं कर्तव्यम् ।

एष खलु साधारणोऽध्ययनस्य सफलो विधिः-

१. 'देवो भूत्वा देवं यजेत्' इतिवत् लेखको भूत्वा लेखकं पठेत् । लेखकस्य मानसिक्यामवस्थायां स्वात्मा प्रक्षेप्तव्यः । अध्येतृभिः तत्कालीनाः परिस्थितयश्च सुष्ठु स्मर्तव्याः ।

२. प्रभावोत्पादकानि स्थलानि पौनःपुन्येनाध्येतव्यानि ।

३. अधमसाहित्यं नैवाध्ययनीयम् । एतेन विचारा भाषाशैल्यावपि विकृतिं यान्ति । सत्साहित्यमेवाध्येतव्यम् । यदि यूयं तन्निर्णयेऽसमर्थाः स्थ तर्हि अध्यापकप्रवरा वो मार्गं निर्देशयन्ति । सुरभारत्यां कानिचित् पत्रपत्रिकाण्यपि विद्यन्ते, तानि खलु नियमेन पठितव्यानि ।

४. उत्तमलेखकानां महापुरुषाणां च सूक्तयः सावधानं लिपिबद्धाः करणीयाः । ताभिरलङ्कृतस्य प्रबन्धस्य महत्त्वं वर्धते खलु ।

**(आ) प्राकृतिकमध्ययनम्**

किं नाम प्राकृतिकमध्ययनम् ? इति पिपृच्छायामुच्यते- 'ननु सहृदयेन प्रकृतेः सूक्ष्मं निरीक्षणम् । पुस्तकपरो मा भूः । यच्च पुस्तकेष्वधीयते तत् सर्वं प्रकृतेरध्ययनेन सन्तोलनीयम् । चक्षुष्युन्मील्य चलनाद् वयं प्रकृतेर्बहून् विचारान् प्राप्नुमः । क्षणदायां छात्रेण केनचिद् भित्तौ कीटमेकं दृष्टम् । तत् तु विद्युत्प्रदीपस्य प्रभया भासते स्म । तदवलोक्य झटिति गदितं मेधाविना तेन 'ज्ञातमधुना, कथं नु चन्द्रमाः प्रकाशते' इति ।

अस्माकमृषिमुनितपस्विभिः सिद्धकविविचारकैर्यदधिगतं तत् प्रकृतेः सहभावेन । प्रकृतेर्निरीक्षणेन । विशेषतया तु विविक्ते स्थले शान्तसमये वा नवनवा विचारा उत्पद्यन्ते, कल्पना वर्धते, प्रतिभा संवर्धते, साहित्यिकं ज्ञानं च परिपुष्टं भवति । ईशावास्यमिदं सर्वं जडं वा चेतनं वा परं श्रोतार एव तच्छृण्वन्ति, द्रष्टार एव च पश्यन्ति ।

प्रकृतिरूपाया जनन्या वरमप्राप्य न कोऽपि लेखको महान् भूतः भवति भविष्यति वा । कविकुलगुरुः कालिदास, महाकविर्भारविः, भवभूतिः, भर्तृहरिश्च सर्वे एते प्रकृतेरुपासका बभूवुः । न किमपि महाकाव्यं रचयितुं शक्यं विना नदीपर्वतसूर्योदयचन्द्रोदयजलक्रीडादिप्राकृतिकदृश्यानां रुचिरवर्णनात् । यथा- नेपालिभाषायां महाकविर्लक्ष्मीप्रसादः कविशिरोमणिर्लेखनाथः युगकविः सिद्धिचरणश्रेष्ठः इत्यादयः, अवधी-हिन्दीभाषायां कविशिरोमणिः तुलसीदासः, महाकविः सूरदासः, कबीर-रहीम-केशवादयः, आङ्लभाषायां वर्डस्वर्थ-कीट्स-प्रभृतयः । एवमन्यास्वपि भाषासु ये के च महान्तः कवयो जातास्तैः सर्वैः प्रकृतेः साहचर्यमनुभूतम् । वर्णनात्मकेषु प्रबन्धेषु तु प्रकृतेः सूक्ष्मं वर्णनं विशिष्यावश्यकम् । सफलाः प्रबन्धकारा भवितुमिच्छन्ति यदि भवन्तः, तर्हि प्रकृतेः सूक्ष्मं निरीक्षणं नित्यं ससावधानं कार्यम् । साफल्यस्य तूपाय एष यत् किञ्चिदपि साहित्यावलोकनं कुर्याम वा यत्किचिदपि प्रकृतिनिरीक्षणं कुर्याम तस्य सुष्ठु मननं कुर्याम । मननादेव मानवो यथार्थनामा भवति ।

## प्रबन्धस्य अङ्गानि

प्रबन्धस्य चत्वारि मुख्यानि अङ्गानि भवन्ति- (क) उपक्रमः (ख) शरीरम् (ग) दृष्टान्तः (घ) उपसंहारः । एतेषां संक्षिप्तः परिचयोऽत्र दीयते ।

## उपक्रमः

उपक्रमस्तु प्रबन्धस्य भूमिकाभागरूपो भवति । कैश्चिद् विद्वद्भिः स 'प्रतिज्ञा' इति उच्यते, अन्यैस्तु 'अवतरणिका' इति । प्रबन्धे उपक्रमस्य तदेव स्थानं भवति यच्छरीरे शिरसः । अतो महत्त्वपूर्णं खल्विदमङ्गम् । उपक्रमो लघुरेव शोभते । स प्रभावोत्पादको रोचकः प्रासङ्गिकश्च स्याद् येन पाठकानां चेतः पठनाय आकृष्टं भवेत् । नास्ति तस्य कोऽपि निश्चितो लेखनविधिः । प्रसङ्गानुसारं लेखकस्य वृत्तेरनुसारं च विविधास्तस्य प्रकारा भवन्ति । यथा हि केनापि कथाया घटनाया उल्लेखेन वा, केनापि कस्या अपि विपयसम्बन्धिन्या सूक्तेरुद्धरणेन वा, केनापि सिद्धान्तवर्णनेन, केनापि समस्याद्वारेण, केनापि परिभाषया, अन्येन कयापि च वस्तुनिर्देशेन प्रबन्धस्य उपक्रमो विधीयते ।

विचारणीयं खल्वेतद् यद् वर्णनात्मकेषु विवरणात्मकेषु च प्रबन्धेषु क्रमस्य पालनमनिवार्यं भवति । तथा हि भवनस्य वर्णने प्रथमं तस्य स्थितिः ततो बाह्यरूपं ततो द्वाराणि तत आन्तरिकभागाः, महत्त्वादि च वर्णनीयम् । चरितात्मकेषु प्रस्तावेषु घटनानां वर्णनेषु च तिथिक्रमः पालनीयो भवति । तथा हि प्रथमं जन्म शैशवं च ततो यौवनं ततो वार्धक्यं ततो निर्वाणम् । जीवितस्य तु दीर्घायुष्याय शुभाशंसनं वा ।

संक्षेपतः कथने उपक्रमे प्रतिज्ञायां वा प्रस्तूयमानस्य विषयस्य स्पष्टतया निर्देशो भवति । 'साध्यनिर्देशः प्रतिज्ञा' इति लक्षणात् । अत्र हि विषयस्य स्वरूपं लक्षणं वा, विधेयस्य विधिर्निन्द्यस्य निषेधः, लेखकस्य विचारा धारणाश्चेति सम्पूर्णा अपि रूपरेखाः संक्षेपेण दर्शयितव्या भवति । यद्युपक्रमे विस्तारो मध्ये च संक्षेपः स्यात्, तर्हि अयं बृहच्छिरस्तनुमध्यं विकृतशरीरमिव न कस्मैचित् रोचयेत् ।

## शरीरम्

शरीरं खलु प्रबन्धस्य मध्यं भवति । प्रमुखतममिदमङ्गम् । उपक्रमो यदि प्रबन्धस्य मुखद्वारं तर्हि इदं निवासस्थानम् । उपसंहारस्तस्य निष्कर्षरूपं चरममङ्गम् । अत्र खलु पूर्वं निर्दिष्टस्य विपयस्य हेतुभिः तर्कवितर्कैश्चान्वयव्यतिरेकाभ्यां समर्थनं भवति । अत इदमुपपत्तिरिति चाभिधीयते । अत्र हि विषयस्य लाभा अलाभाः विख्याततमानां पौरस्त्यानां पाश्चात्त्यानां च विदुषां मतं तदुपयोगित्वं सामाजिक-राजनीतिक-वैज्ञानिकमहत्त्वम्, इति सर्वमुल्लेख्यं भवति । गौणानां वस्तूनां वर्णनं परिहार्यम् ।

## दृष्टान्तः

उपक्रमे निर्दिष्टस्य मध्ये चोपपत्तिभिः समर्थितस्य विषयस्य पुराभवेनाधुनिकेन वा केनापि इतिवृत्तेन यत्

परिपोषणमिष्यते स एव दृष्टान्त उच्यते । यथा प्रकाशेन पदार्थस्य तथा दृष्टान्तेन विषयस्य बोधः स्फुटतरो जायते । कुशलैर्लेखकैरेतस्य प्रयोगः प्राचुर्येण क्रियते । एवं प्रबन्धस्य प्रभावात्मकता वर्धत एव ।

## उपसंहारः

उपसंहारस्तु प्रबन्धस्यान्तिमो भागः । उपक्रमवद् उपसंहारोऽपि संक्षिप्तो भवेदित्यत्र सावधानता प्रबन्धकारैर्निर्वहणीया । उपसंहारः स्वाभाविकः स्यान्न तु बहुप्रयासपूर्णः । विविधाः खलु तस्य प्रकाराः । क्वापि चरमं प्राप्तः प्रबन्धस्तत्रैव समाप्यते । क्वापि मध्य आगतानां विचाराणां सारोऽत्र दीयते । क्वापि पूर्वकृतस्य सकलस्यापि वर्णनस्य सिंहावलोकनं क्रियते । प्रबन्धस्य शीर्षकवाक्यं पदं वा हृदयहारिणा विधिना संस्मरणमत्र कर्तव्यं भवति । अधोलिखितैः प्रकारैः प्रबन्धस्य समापनं नहि कर्तव्यम्, यत एते लेखकस्य विचाराभावं द्योतयन्तः प्रबन्धं प्रति पाठकस्य परीक्षकस्य चारुचिं जनयन्ति । ते च-

(अ) खेदोऽस्मासु यतः समय समाप्तः ।

(आ) समयोऽधुना आगतो यद् वयं प्रबन्धस्योपसंहारं कुर्याम ।

(इ) समय एव समाप्तः, अन्यथा मया बहु लेखितव्यं विवेचनीयं चासीत् ।

(ई) अन्ते एतद् वक्तव्यं भवति ।

(घ) परिणामे वयं कथयितु शक्नुमः, इत्यादयः ।

## प्रबन्धानां गुणदोषविवेचनम्

### (अ) गुणाः

सुन्दरस्य मनोहरस्य च प्रबन्धस्य केचन गुणा भवन्ति । तेषां विषयेऽत्र क्रमेण प्रस्तूयते ।

#### (क) ओजः

ओजः खलु गद्यस्य निकषं विशेषतः प्रबन्धस्य । चतुराः प्रबन्धकाराः शब्दार्थयोर्मन्थनकौशलेन पाठकानां हृत्सु विचित्रं खलु प्रभावं जनयन्ति । यथोक्तम्-

**त एव पद्यविन्यासा ता एवार्थविभूतयः ।**
**तथापि नव्यं भवति काव्यं ग्रन्थनकौशलात् ॥**

अन्यत्र च

**यानेव शब्दान् वयमालपामो**
**यानेव चार्थान् वयमुल्लिखामः ।**
**तैरेव विन्यासविशेषभव्यैः**
**सम्मोहयन्तः कवयो जयन्ति ॥**

(ख) **प्रसादः (भाषा सौष्ठवम्, पाञ्चालीप्राया च रीतिः)**

सरलया सौन्दर्यपूर्णया स्वाभाविकया च भाषया कृतं विचाराणां वर्णनं सर्वेषां कृतेऽभिमततरं भवति । भाषायाः क्लिष्टत्वं कृत्रिमत्वं वा पाठकमनसि क्लेशं जनयति । सप्रयासं प्रयुक्ता श्लेषप्रचुरा भाषा अर्थबोधे काठिन्यमुत्पादयति । तादृशी प्रयासपूर्णा शैली न रोचते पाठकेभ्यः परीक्षकेभ्यश्च । प्रसन्ने संस्कृते एव स्वकीयस्य वक्तव्यस्याभिव्यक्तिः स्यात् । रामायण-महाभारत-पुराणानि पञ्चतन्त्र-हितोपदेशादयो ग्रन्थाः प्रसन्नसंस्कृते एव रचिताः सन्ति । अत्र खलु विख्याततमानां शब्दानां प्रयोगः, द्वित्राणामेव पदानां समासो वर्तते । याः खलु वैदर्भी-गौड़ी-पाञ्चाली-रीतयः सन्ति वर्णनस्य तत्र तु वैदर्भी रीतिरर्थालङ्कारप्रचुरा भवति । गौड़ी च शब्दालङ्कारप्रधाना । अत एव पाञ्चाली रीतिरनुस्रियते कुशलैर्लेखकैः । नदीप्रवाहवद् विचाराणां स्वतः प्रवाह स्यात् । भाषा च पाठकस्य सुखबोधा स्यात् । एतदेवाभीष्टं भवति प्रबन्धे । एतदवधेयम्- ययोः परस्परं सन्निकटस्थितयोः पदमध्यगतयोरान्तरिकसन्धिकरणमावश्यकं तत्र सन्धिः कर्तव्यः परं शब्दयोर्बाह्यसन्धिकरणं बहु न स्यादल्पमेव भवेदित्यत्र ध्यानं देयम् । अतो बाह्यसन्धीनां समासानां च परिहरणाद् भाषा सरलयितुं शक्या । दण्डिनः पदलालित्यमत्रानुकरणीयम् ।

(ग) **भावगाम्भीर्यम्**

भावः खलु रचनाया आत्मा, भाषाशैल्यौ तु शरीरमात्रम्, इत्युक्तचरम् । शरीरी शरीरादतिरिच्यते, इति सम्मतं सर्वेषाम् । प्रबन्धे विचाराणां स्वोपज्ञताऽऽवश्यकी भवति । भावगाम्भीर्यं विशिष्टां रुचिं पठनाय वर्धयति पाठकस्य । तद्रहितः शुष्कः प्रस्तावस्तु मृतशरीरवत् कस्यापि प्रियो न भवति ।

(घ) **अनुपातः**

यथा चित्रकलायां तथा प्रबन्धे च नानाभागेष्वनुपातः परमावश्यकः । यदि कस्यचिन् मनुष्यस्य चित्रे विशालं मस्तकं तनुश्च मध्यं स्यात् तर्हि दर्शका एतच्चित्रमशोभनमिति वदन्तस्तस्य निर्मातारमेव निन्दिष्यन्ति । एवं यदि कस्यचित् प्रबन्धस्योपक्रमस्तु विस्तृतो मध्यं च लघु स्यात् तर्हि अनुपातहीना एषा रचना न सहृदयैः स्तुत्या भवेत् । परीक्षकास्तु एतादृशीं रचनां लघ्वीं मन्यन्ते ।

(आ) **प्रबन्धदोषाः**

अनुकूला प्रवृत्तिर्हि गुणरूपा मन्यते । प्रतिकूला तु सा दोषनाम्ना गृह्यते । प्रबन्धे च दोषाः कीदृशा भवन्तीति विषयेऽत्र विचार्यते ।

**(क) व्याकरणप्रमादाः**

शिक्षार्थिभिः सावधानतया व्याकरणस्य प्रमादाः परिहर्तव्याः। प्रमादः कस्यामपि रचनायां नहि शोभते। यतो हि एते लेखकस्याल्पज्ञत्वं द्योतयन्ति। लेखने भाषिकलिङ्गस्य व्यवहारो विभक्तीनां प्रयोगः शब्दानां धातूनां चोच्चारणमुपसर्गाणां प्रत्ययानां च प्रयोगः कारकस्य च व्यवहारः, इति सर्वं संस्कृतव्याकरणदृशा साधु स्यात्। शुद्धा भाषा प्रिया भवति पाठकानां सर्वेषां कृते। विरामादिचिह्नानामपि लेखे सावधानतया प्रयोगः कर्तव्यः। विरामचिह्नानामशुद्धप्रयोगेणार्थस्यानर्थो जायते। यथा हि कयापि गर्भिण्या 'पुत्रो भविष्यति पुत्री वा' इति पृष्टे दैवज्ञो ब्रवीति- 'पुत्रो न पुत्री'। विराम-चिह्नाद् विना अत्रार्थोऽस्पष्ट एव। अत्र 'पुत्रो, न पुत्री' इत्यस्यार्थः पुत्रो भविष्यति, पुत्री न भविष्यति, इत्यस्ति। 'पुत्रो न, पुत्री' इत्यस्य तात्पर्यं 'पुत्रो न भविष्यति, पुत्री भविष्यति, इति। 'पुत्रो न पुत्री' इत्यस्यार्थो 'न पुत्रो भविष्यति, न पुत्री भविष्यति' इति। अत एव विरामचिह्नानां प्रयोगस्य बोधः सुष्ठु कर्तव्यः।

**(ख) समासभूयस्त्वम्**

'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्' इत्युच्यते। प्रतीयते यदेतन्मन्यमानैर्दण्डिसुबन्धु-बाणभट्टादिभिर्विख्याततमैर्लेखकैः समासबहुला ग्रन्था रचिता। अद्यत्वे खलु समासबहुला रचना न रोचते पाठकेभ्यः, यतो ह्येषा प्रयासपूर्णा सती प्रसादगुणाद् व्यपेता भवति। प्रसादगुणस्त्वावश्यको भवति रचनायामित्युक्तचरम्। अतः समासभूयस्त्वं यथाशक्ति परिहर्तव्यम्।

**(ग) अक्रमः**

प्रबन्धस्य विचारा यथाक्रमं स्युरित्यावश्यकम्। वर्णनात्मकेषु विवरणात्मकेषु च प्रस्तावेषु क्रमस्याभावो विशिष्य दुनोति हृदयानि पाठकानाम्। यथा हि यात्रावर्णने प्रथमं तत्स्थानस्य दर्शनीयभवनानां वर्णनं पश्चाच्च प्रस्थानोद्योगस्य, कस्यचित् चरितवर्णने प्रथमं यौवनस्य वर्णनं पश्चाच्च बाल्यस्य। एतादृशस्य दोषस्य परिहरणाय प्रथमं प्रबन्धस्य रूपरेखा निर्मातव्या, तदनन्तरं लेखनाय लेखनी करे ग्रहणीया। रूपरेखानिर्माणस्य साधारणविधिरस्त-

(क) प्रथमं निर्दिष्टस्य विषयस्य मुख्यान् विचारानङ्कितान् कुरुत, तांश्च १, २, ३, ४, इत्यादि क्रमेण लिखत।

(ख) प्रतिविचारं तदन्तर्गता या या वार्ताः स्युस्ताः (क), (ख), (ग) इत्यादिनाङ्कितव्याः।

(ग) ततस्ते सर्वे विचारा यथाक्रमं कर्तव्याः।

(घ) विचाराणां तदन्तर्गतानां वार्तानां च मिथो विरोधो मा भूदित्यत्र सावधानेन भाव्यम्।

(घ) **पुनरुक्तिः**

पुनरुक्तं नाम मुख्यया वृत्त्याऽसकृदुक्तं व्यर्थं वचः । लक्षणया पुनः पूर्वेण सदृशमनपेक्षितमर्थमात्रम्, इति । "पुनरुक्तवस्तुविरसः सर्गक्रमो वेधसः" इति स्मर्तव्यं प्रबन्धकर्तृभिः । "व्यापारैः पुनरुक्तभूतविषयैः, इति गदितं भर्तृहरिणा । विचाराणां वाक्यांशानां वाऽसकृद् वचनं विरसं भवति । एतेन व्यर्थं समययापनं भवति लेखकस्य पाठकस्य च । समयो हि नोऽमूल्यनिधिः । पुनरुक्त्या वाचोऽर्थस्य वाऽरुचिर्जायते । अतः शिक्षार्थिभिः पुनरुक्तिदोषः सर्वथा सावधानतया परिहर्तव्यः ।

उपरि प्रबन्धस्य विषये यदुपलब्धं तत्स्वरूपादिबोधकं सामग्रीजातं तत् संक्षेपेण प्रस्तुतम् । प्रबन्धस्य लेखने विचारणीयाः पक्षाश्च दर्शिताः । प्रबन्धस्य गुणा दोषाश्च प्रदर्शिताः । कथं प्रबन्धः सुन्दरो रुचिकरश्च सम्पादयितुं शक्यत इत्यत्रापि मार्गदर्शनं कृतम् । एतत्सर्वं विचार्य प्रबन्धलेखने विद्यार्थिभिरभ्यासः कर्तव्यः । यतो ह्यभ्यासेनैव कस्मिन्नपि विषये प्रावीण्यं जायते जनस्य । वारं वारमभ्यसनेनैव सिद्धिः सफला सम्पत्स्यते । अतश्च सर्वैः सिद्धये यतनीयमेव ।

**सप्तदशः पाठः**

# मानवजीवने धर्मस्य मूल्यम्

## उपक्रमः

दृश्यं जगदस्माकं पुरतो वर्तते । तत्र चरा अचराश्च प्राणिनो जीवाश्च सन्ति । सांसारिकदृष्ट्या विचारणे सर्वेऽपि जीवा जननमरणशीलाः सन्ति । परिवर्तनं समेषां स्वाभाविकं चरित्रं विद्यते तथापि प्रतिव्यक्ति प्रकृतिर्भिन्नेव विभाति । चैतन्यदृशा चिन्तनशीलतादृष्ट्या च तेषु भिन्नता परिलक्ष्यते । प्राणिषु मानवो विशिष्टचैतन्यवान् चिन्तने मनने सुष्ठु व्यवहरणे च समर्थो जन्तुविशेषो वर्तते । विशिष्टचैतन्यवत्त्वादेव तस्य गुणा अपि भिन्नाः सन्ति अन्यजन्तूनां तुलनायाम् । अतश्च मानवेन विशिष्टगुणवता भाव्यमेव । ये च तस्य विशिष्टा गुणास्ते तस्य पशुपक्ष्यादिजन्तुभ्यः पृथक्त्वं साधयन्ति । त एव गुणास्तस्य धर्माः कथ्यन्ते । उक्तञ्च-

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम् ।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥**

अर्थाद् आहारादयो विषयाः पशूनां मानवानां च समानाः सन्ति । तत्र पशुभ्यो वैशिष्ट्यं मानवस्य द्योतकं तत्त्वं धर्म एव वर्तते । तेन हीना जनाः पशुभिः समानास्तुल्या वा भवन्ति । अत एव धर्मसम्बद्धैरेव गुणैस्तस्य मानवता रक्षिता भवति । विना धर्मं नहि कोऽपि मानवो जीवितुं जगति स्थातुं वा शक्नोति । धर्मो हि सर्वप्राणिनां मूलम् । अतश्च धर्मस्य मर्म मानवैः सम्यग् विज्ञेयम् । धर्म किमिति विषये सगभीरमत्र विचार्यते ।

## धर्मशब्दस्य व्युत्पत्तिरर्थश्च

धर्मशब्दो धारणार्थकाद् धृञ्-धातोर्मन्-प्रत्ययेन (धृ+मन्) निष्पाद्यते । ध्रियते लोकोऽनेनेति, धरति लोकं वेति, धरति लोकान्, ध्रियते पुण्यात्मभिरिति वा धर्मः । धर्मशब्दस्य पर्यायाः शुभादृष्टम्, पुण्यम्, श्रेयः, सुकृतम्, वृषः इत्याद्याः सन्ति । क्रतुः, न्यायः, स्वभावः, आचारः, उपमा, अहिंसा इत्याद्याश्च तस्यार्थाः प्राप्यन्ते । जगतो धारणं येन क्रियते स एव धर्मः इति बोध्यम् । स च धर्मः अनादिकालादेव प्रवर्तितो जगति सनातनरूपेण प्रचलितः परिपालितश्च दृश्यते । अत एव नात्र धर्मशब्देन सम्प्रदायरूपा धर्मा गृह्यन्ते ।

## धर्मस्य परिभाषा

चोदनालक्षणाऽर्थो धर्म इत्युच्यते मीमांसकैः । चोदना चोपदेशः प्रेरणा वा । धर्मकर्मणि प्रवर्तनं चोदना तल्लक्षणः प्रवर्तनारूपोऽर्थः 'स्वर्गकामो यजेत' इत्यादिरूपो धर्मः । स च यागादिपरः अर्थाद् यज्ञादिबोधकः ।

अतश्च विविधयज्ञसम्पादनमपि धर्मशब्देनोच्यते । यदेव तत्त्वं मानवानां कृते स्फूर्तिजनकमन्तश्चेतनाप्रबोधकं सत्कर्मणि प्रवर्तकं च तदेव धर्मशब्दवाच्यं तत्त्वम् । एवञ्च मानवलोकपरित्रायकः लोकसमुन्नतिकारकः अवनतिनिरोधकः ज्ञानविज्ञान-शौर्यादिगुणसम्पादकः आस्तिक्यभावनाप्रवर्तकश्च तत्त्वविशेषो धर्म इति सिद्ध्यति । पुनश्च वैशेषिकदर्शने यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इत्युच्यते । येन च लौकिकपारलौकिकसमुन्नतिः सम्पाद्यते स धर्म इत्यस्यार्थः । एवं लोकोभयसाधकानि तत्त्वानि धर्मशब्दवाच्यानि भवन्ति ।

## धर्मरूपेण गृहीतानि तत्त्वानि

प्रसङ्गेऽस्मिन् धर्मशब्दस्य मुख्यतया धारणरूप एवार्थः प्रधानोऽस्ति । यो लोकान् धारयति स एव धर्मः । जगतः संसारस्य वा धारणे समर्थानि तत्त्वानि धर्मशब्देन गृह्यन्ते । केचन तादृशा गुणाः सन्ति यैश्च लोकस्य धारणं सम्भवति । अतस्ते गुणा धर्मशब्देन स्वीकृताः सन्ति । यतो हि जगद्धारकत्वेनैव धर्मस्य धर्मत्वम् । महभारते-

**'धारणाद् धर्ममित्याहुर्धर्मो धारयते प्रजाः ।**
**यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः ॥ इत्युक्तमस्ति ।**

पुनश्च 'नहि सत्यात् परो धर्मः' इत्युच्यते । सत्यञ्च सर्वलोकहितसम्पादकं जगति सुखप्रदायकं समग्रस्य जगतः संरक्षकं तत्त्वम् । उक्तञ्च-

**सत्यं सर्वजगन्मूलं जगदाधारकं परम् ।**
**सत्यान्नास्ति परं ज्योतिः सत्यं धर्मस्य जीवितम् ॥**

समग्रधर्मस्य सत्यमेवाधारभूतं तत्त्वम् । सत्येन विना नहि कस्यापि धर्मस्याधारोऽन्यः कश्चित् प्राप्यते । अतश्च धर्मस्य मूलं सत्यं सत्यमेव धर्म इति ज्ञेयम् । यतो हि सर्वं सत्ये प्रतिष्ठितमस्ति । सत्यं ब्रह्म इत्यपि निगद्यते । इत्थञ्च सत्ये समाश्रितानि जगद्धारकाणि तत्त्वानि धर्मशब्देनोच्यन्ते । जगद्धारकाणि तत्त्वानि च योगशास्त्रे अहिंसादीनि परिगणितानि सन्ति- अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहः, यमः । अतश्च धर्मस्य परिपालनं महाव्रतमिति कथ्यते । मनुना धृत्यादयो गुणा धर्मशब्दवाच्यत्वेन निर्दिष्टाः सन्ति-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**

एतदनुसारेण च धृतिः, क्षमा, दमः, अस्तेयम्, शौचम्, इन्द्रियनिग्रहः, धीः, विद्या, सत्यम्, अक्रोधश्चैतानि दश तत्त्वानि धर्मरूपाणि । धैर्यं मानवैः सर्वैर्धार्यम् । क्षमा सहिष्णुतारूपो धर्मः । दमो मनसः स्थैर्यम् । अस्तेयमचौर्यम् । शौचं पवित्रता शुचित्वं वा । इन्द्रियनिग्रहो विषयेभ्य इन्द्रियाणां नियमनम् । धीर्बुद्धिमत्ता ।

विद्या ज्ञानम् । सत्यं सर्वदैकरूपं मूलं तत्त्वम् । अक्रोधो रोषराहित्यम् । एतानि दश तत्त्वानि धर्मनाम्ना निदर्शितानि ।

मनुना पुनश्च धर्मलक्षणं निर्दिश्यते यद्-

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**
**एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम् ॥**

चतुर्विधधर्मे वेदस्मृत्योरनन्तरं सदाचारोऽपि धर्म वर्तते । सदाचारेणैव सर्वार्थसिद्धिरित्यत्र विदुषां न काचन विप्रतिपत्तिः । अत एव मनुना व्याह्रियते-

**आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।**
**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ॥**
**आचाराद् विच्युतो विप्रो न वेदफलमश्नुते ।**
**आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत् ॥**
**सर्वस्य तपसो मूलमाचारं जगृहुः परम् ।**

धर्मलक्षणे 'स्वस्य च प्रियमात्मनः' इत्यनेन मधुरभाषणं परोपकरणम् अहिंसा च समर्थ्यते । अत एव महाभारते प्रोच्यते-

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥**

न केवलं पूर्वोक्तानि दश तत्त्वानि धर्मास्तदतिरिक्ततया च अन्यान्यपि तत्त्वानि तत्र निवेशितानि प्राप्यन्ते । तेषु आचारः परमो धर्मो मन्यते । आचारं सर्वस्य तपसो मूलं कथयन्ति विद्वांसः । सदाचारेणैव मानवस्य प्रतिष्ठा उच्चैः सम्पाद्यते । सत्यवचनं चापि धर्मः । सत्यं हि सर्वस्य जगतो मूलम् । सत्यमेव जगत आधारभूतम् । सत्यमेव परमं ज्योतिः । सत्यमेव धर्मस्य जीवितं प्राणस्वरूपं तत्त्वम् ।

त्यागो दानमपरो धर्मः । परेषामुपकाराय कल्याणार्थं वा यद्दीयते अन्न-द्रव्य- वस्त्रादिकं तद्दानम् । तत्र दाने दातुर्मनसि प्रत्युपकारापेक्षा नैव जागर्ति । 'अहं किञ्चित् तस्मै दास्ये सोऽपि मह्यं किमपि दास्यति' इति चिन्तनं नहि दानस्य मर्म जानाति प्रकटयति वा ।

दया चापरो धर्मः । स्वकीयेन प्रयत्नेन परस्य दुःखनिवारणाय या इच्छा मनसि उत्पद्यते सा दया । आत्मवत् सर्वभूतेषु दृष्टिर्दया कथ्यते । तेषां हिताय शुभाय च प्रयतनम्, सन्तोषेण तत्र सततं संलग्नता च दया । परे मित्रे बन्धुवर्गे द्वेषकर्तरि वा समानभावेनात्मवद् व्यवहरणं दया । करुणया दयया च सर्वथा परदुःखनिवारणे यत्नः क्रियते चेत् ततो धर्मो जायते । अतश्च दयया अपरः कोऽपि धर्मो नास्तीति कथ्यते- **नास्ति धर्मो दयापरः ।** एवञ्चालोलुपत्वं मृदुता ह्रीः चपलताराहित्यम् इत्यादयो गुणा अपि धर्मे सन्निविष्टाः प्राप्यन्ते ।

परोपकारोऽपरो धर्मः । मानवः परस्य कल्याणाय दुःखितजनानामुद्धाराय पीडितानां हितसाधनार्थं वा स्वशक्त्या कस्यचन लाभस्य प्राप्तेरिच्छां विना यत् किञ्चित् प्रयच्छति, मनसा वाचा कर्मणा वा परस्य हितं सम्पादयति, परेषां कल्याणं कर्तुं सर्वथा संलग्नो भवति तादृशं सर्वं कार्यं परोपकारनाम्ना गण्यते । परोपकारेणैव समाजे समेषामुत्कर्षः सम्भवति । परस्परं सद्भावनां स्थापयित्वा स्वार्थं विहाय परदुःखनिवारणेन लोकस्योपकारसाधनेन च सर्वत्र भौतिकी समुन्नतिर्भवति । सर्वजीवेषु दयापरेण प्रकृत्या सह अनुग्रहपरेण च यदि जीव्यते तत्रैव लोकस्य स्थितिः सुदृढा सम्पद्यते । परोपकारशून्यस्य मनुष्यस्य जीवितं धिक् इति कथयित्वा गर्हयन्ति जनाः । इत्थं समाजस्य स्थापनार्थं परोपकारस्य धारा प्राचीनकालतः प्रचलन्ती समायातास्ति । परोकारेणैव लोको धृतः इति स धर्मः कथितः ।

धर्म एव जीवनस्य सारः । पूर्वोक्ताश्च धर्मलक्षणरूपा गुणाः समग्रस्य विश्वस्य मानवानां धर्माः । अत्र नहि हिन्दु-बौद्ध-इस्लाम-जैनादीनां धर्माणां बोधनमुद्देश्यम्, किन्तु केवल मानवजातेः धर्माः अहिंसादयः सर्वत्र विश्वे पालयितुं योग्याः गुणाः धर्मा इति बोधनेन तेषां सम्यक्तया परिपालने प्रेरणं मुख्यमुद्देश्यम् । धर्मेण हीनो मानवः पशुर्भवतीति भर्तृहरिणा प्रोक्तम् ।

साम्प्रतं लोके धर्मस्य द्विविधं रूपम्- कर्मकाण्डमूलकम् आचारमूलकं च । लोके ये धार्मिका विवादाः प्रवर्तन्ते, प्रवर्तिष्यन्ते च तेषां मूलं कर्मकाण्डमेव । नहि धर्मो विद्वेषं शिक्षयति । ये साम्प्रतं विविधाः सम्प्रदायास्ते 'भिन्नरुचिर्हि लोकः', 'मुण्डे मुण्डे मतिर्भिन्ना', इत्यादिकं प्रवादमाश्रित्यैव प्रवर्तन्ते । ते विवादं सङ्घर्षं मनोमालिन्यं हिंसां चानुदिनं प्रवर्तयन्ति । आचारमूलकस्य सत्याहिंसादिरूपस्य धर्मस्य सर्वधर्मेषु समत्वम् अनिवार्यत्वं च व्यादिश्यते । तत्र न कस्यापि सम्प्रदायस्य प्राधान्यं वर्तते । तत्पालने न कस्यचिदपि विपश्चितो विप्रतिपत्तिः । एवं धर्मो मानवं देवत्वं गमयति, परमसुहृद्रूपेण चाभीष्टार्थावाप्तौ साहाय्यं वितरति ।

प्रजाधारकत्वमेव धर्मस्य मूलम् । धर्मः प्रजानां धारणं करोति । धर्मेण मानवेषु पारस्परिको विश्वास उत्पाद्यते, तादृशविश्वासस्य साधने च धर्म एव मूलं कारणम् । अत एव धर्मः प्रजानां धारकः । अहिंसादिषु गुणेषु धर्मरूपेषु विद्यमानेषु जने न केवलं जनानां किन्तु समेषामपि प्राणिनां विश्वासः समुत्पद्यते । 'असौ मां न मारयति, असौ मम रक्षां करोति । असौ दयावान् वर्तते । असौ दानशीलः अस्ति, असौ लोलुपो नास्ति । क्रोधश्चास्य न वर्तते । असौ शुचिः (पवित्र) वर्तते । सदाचारी चासौ दृश्यते ।' एतेन सर्वेणापि गुणसमुदायेन जनो विश्वासपात्रं सम्पद्यते । अत एते गुणाः धर्मस्वरूपाः । एते च यस्मिन् जने व्यवहारे दृश्यन्ते स जनो धर्मशीलः धार्मिको वा । तत्रैव जने समेषां विश्वासः ।

## धर्माचरणस्य मूल्यवत्ता

'धर्मो रक्षति रक्षितः' इति कथ्यते । अत एवात्मरक्षां कर्तुं वाञ्छता जनेन धर्मस्य धारणेन तस्य रक्षा अपि कर्तव्या । परार्थसाधनं परहितचिन्तनं च जीवने सुखमनुप्राणयति । हिंसा हिंसाम्, अहिंसा चाहिंसां प्रवर्तयति । एवं रक्षितो धर्मोऽपि धर्मबुद्धेरनर्थवारणपुरःसरं रक्षामातनुते । बद्धमूलो धर्मो धर्मिष्ठं पावयति त्रायते च ।

'न धर्मात् परमं मित्रम्' इति कथ्यते । जगति धर्म एव सर्वोत्कृष्टं मित्रम् । सम्पदि विपदि सुखे दुःखे चाजस्रं साहाय्याचरणेन धर्मः परमः सुहृत् । न केवलं जीवने, परत्रापि सुखसाधनेन धर्मस्य परमबन्धुत्वं परममित्रत्वं च व्यादिश्यते । उच्यते च-

**एक एव सुहृद् धर्मो निधनेऽप्यनुयाति यः ।**

**शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥**

धर्मः स नो यत्र न सत्यमस्ति, इत्युच्यते । एतदनुसारेण सत्या-हिंसादिगुणरहितो न धर्मः । सत्यं धर्मस्य मूलम् । सत्याद् ऋते न धर्मस्य प्रतिष्ठा । सत्याश्रयैव धर्मवृत्तिः । यत्र सत्यं तत्र धर्मः, तदभावे तदभावः । धर्मो धारयते प्रजाः इत्युच्यते । जगति धर्म एव पारस्परिकविश्वाससंधानात् प्रजानां धारकः । धर्मस्य विश्वजनीनत्वं सार्वलौकिकत्वं सार्वभौमिकत्वं च विश्वहितसम्पादनादेव प्रवर्तते । धर्म एव शिक्षयति- 'उदारचरितानां तु वसुधैव कुटुम्बकम्' । अतश्च सत्यं दया परोपकारादयो धर्मस्य मूलतत्त्वानि गण्यन्ते । अतः परदुःखनिवारणं करुणाद्रवत्वं च धर्मे सङ्गृह्यते । अत एव प्रोच्यते- 'न च धर्मो दयापरः' इति ।

केवलं प्राणिनामेव न किन्तु जगति विद्यमानानां जडत्वेन गृहीतानामपि नदीवृक्षवायुतेजःपक्षिपर्वतमृत्तिकादीनामपि पदार्थानां प्राकृतिको धर्मो भवतीति प्रत्यक्षतयानुभूयते । यथा जलस्य शैत्यं सततमधोवहनञ्च धर्मः । तेजसः प्रकाशप्रदत्वमुष्णतासम्पादकत्वं च धर्मः । वायोः शीतलता नित्यं सञ्चरणशीलता च धर्मः । गन्धवत्त्वं पृथिव्या धर्मः । सहिष्णुता च तत्र दृश्यते दृष्टान्तभूता । पाषणमृत्तिकयोः परस्परं धारकत्वं पृथिवीसम्बद्धवस्तुनो धर्मः । आकाशस्य च व्यापकत्वं धर्मः । यदि एतानि तत्त्वानि स्वकीयं धर्मं स्वल्पस्यापि समयस्य कृते त्यजन्ति तर्हि सृष्टेर्गतिरवरुद्धा जायते । धर्मस्य धारणेनैव तानि जगदपि धारयन्ति लोकं पुष्णन्ति च । अत एव धर्मस्य धारणमवश्यमेव कर्तव्यं भवतीति तेषां दृष्टान्तेन परिज्ञायते ।

एवम् अवलोक्यते यद् जीवने धर्मस्य सर्वदा सर्वथा चानिवार्यत्वं वर्तते । तस्याश्रयणेनैव ऐहिकम् आमुष्मिकं च सुखमवाप्यते । धर्मो जीवनरक्षकः, सुखशान्ति-संधायकः, सत्कर्मप्रेरकः, दुःखनिरोधकश्चेति सततम् आश्रयणीयः । विश्वबन्धुतायामपि मूले धर्म एवं वर्तते । धर्मेणैव मानवः आत्मानं देवं कर्तुं प्रभवति । पुण्यकर्म सुकृतं सुकृतं वर्धयति, स्नेहः स्नेहं वर्धयति, प्रेम प्रेम्णो भावनां संवर्धयति । एवमेव सहानुभूतिः सहानभूतिम्, सद्भावः सद्भावम्, ममता ममतां संवर्धयन्ति । सहानुभूति-विश्वासाश्रितं हि कर्म धर्ममूलकं तच्च सुखदं समृद्धिकरञ्च पुनर्लोकहितकारि चेति सम्पद्यते ।

लोकोपकारनिरतैः ऋषिभिरस्माकं सर्वदा सर्वभूतहितसाधनमेव मानवानां लक्ष्यं निर्धारितं सर्वदा सर्वथा च तदनुसृतञ्च । स्वार्थपरित्यागेनैव तादृशहितसाधनं सम्भवति । स्वार्थपरिहारपूर्वकं परार्थसाधनमेव वेदादिशास्त्रैः शिक्ष्यते । त्यागस्य कृते यज्ञकर्मणि हवनादौ 'स्वाहा' इत्युच्यते । स्वं- स्वार्थम्, तस्य आ- आसमन्तात्, हा- त्यागः । स्वार्थस्य त्यागं स्मारयति स्वाहेति पदम् ।

धर्मो विश्वजनीनो भवितुमर्हति । विश्वजनीनत्वं नाम समग्रस्यापि विश्वस्य कल्याणसम्पादकत्वं हितकारकत्वं वा इत्यवधेयम् । सर्वस्यापि लोकस्योपकारकत्वं यत्र धर्मे दृश्यते तस्यैव सार्वभौमिकत्वं सार्वलौकिकत्वं च । यस्य चरितमुदारं तस्य कृते समग्रापि पृथिवी कुटुम्बरूपा भवति । सत्यं, दया, परोपकारादयो गुणाः प्रजानां समग्रस्य लोकस्य धारणे निमित्तभूताः, अतश्च ते धर्मस्य मूलतत्त्वरूपा गण्यन्ते । करुणया दयया च सर्वथा परदुःखनिवारणे यत्नः क्रियते चेत् ततो धर्मो जायते । अतश्च दयया अपरः कोऽपि धर्मो नास्तीति वदन्ति जनाः । अस्य धर्मस्य पालनेन पालको जनः सन्तोषमनुभवति, तस्य जागतिकं जीवनं सुरक्षितं भवति, पारलौकिकञ्च जीवनं तेनैव धर्मेण प्रकाशितं जायते ।

अल्पबुद्धयो जना एव निजत्वं परत्वं विचार्य कार्यं कुर्वन्ति । मम परकीयम्, इति कृत्वा भेदबुद्धिं समाश्रित्य विभेदं कृत्वा व्यवहरन्ति । तत्त्वदर्शिनो धीरा ज्ञानिनस्तु तत्सर्वं परित्यज्य समत्वबुद्धिं समाश्रयन्ति, जगतः समग्रस्य हितसाधने सर्वलोककल्याणचिन्तने च सततं प्रवर्तन्ते । उदारचरितानां कृते सर्वा अपि वसुधा कुटुम्बरूपा जायते । उक्तञ्च-

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**

धर्मस्य पालनेनैव विश्वकल्याणस्य सम्पादनं सम्भवति । विश्वकल्याणे सम्पादिते हि विश्वधर्मः सम्पादितो भवति । यतो हि मानवतैव विश्वधर्मस्य मूलं विद्यते । न तत्र जाति-वर्ण-धर्मादिभेदेन विरोधः प्रवर्तते । विश्वस्थस्य सर्वस्यापि मानवमात्रस्य कल्याणं मानवतायां समाश्रितं वर्तते । विश्वधर्मस्य भावना विश्वकल्याणमूलास्ति । सम्प्रदायरूपाणां सम्प्रति प्रचलितानां समेषां धर्माणां सारभूतानां तत्त्वानां सङ्ग्रहणेन विश्वधर्मस्य स्वरूपं निर्मातुं शक्यते । यत्र केवलं मानवानां प्राणिनां प्रकृतेश्च सर्वथा कल्याणं विचार्यते, सर्वभूतप्रकृतेर्हितसाधनाय व्यवहारा अस्माकं प्रवर्तन्ते, सत्य-अहिंसादीनां वैश्विकधर्माणां परिपालनं सर्वैः प्रयत्नतः क्रियते तत्रैव धर्मस्य विश्वकल्याणकर्तृत्वं विश्वव्यापिधर्मत्वञ्च सम्भवति । जाति-देश-काल-सिद्धान्तादिभिरपरिच्छिन्ना धर्माः सार्वभौमा महाव्रतरूपा भवन्ति । विश्वधर्मे सर्वेषामुदयस्य समेषां कल्याणस्य च भावना सर्वोपरि सम्मान्या दृश्यते । तत्र समेषां सुखं सर्वेषां भद्रं समस्तानां दुःखराहित्यञ्च काम्यते, तत्सम्पादनाय प्रयत्नश्च क्रियते । अतश्चोक्तम्-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥ इति ।**

## उपसंहारः

धर्मो भवति कस्यापि प्राणिनो महाभूतस्य वा नैसर्गिकतत्त्वविशेषः प्रकृतिगुणानुरूपं सृष्टिकालत एव प्राप्तः । सूर्यस्य तपनं प्रकाशः चन्द्रमसि प्रकाशेन सह शीतलता जले शैत्यं प्रवाहशीलता वायोरदृश्यत्वेऽपि सञ्चरणशीलता नभसो व्यापकत्वं पृथिव्याश्च सर्वधारकत्वं गन्धवत्त्वं चेति प्राकृतिका गुणाः । एकेनापि

तत्त्वेन स्वकीयो धर्मो निजस्वभावरूपो यदि त्यज्यते स्वल्पस्यापि समयस्य कृते तदा सृष्टिरान्दोलिता जायते । प्रकृतिगता गुणा यथा जगति धर्मभूतास्तथैव मानवस्यापि प्रथमं मानवता मूलधर्मः । तस्या अभावे मानवो मानव एव न भवति । मननं मानवस्य मुख्यो गुणः । पश्चादेव कुलपरम्परादिरूपेण जातिभाषासंस्कृत्यादिपक्षविशेषाग्रहेण वा स्वीकृता धर्मा हिन्दुजैनादयो यज्ञयागादिविधानपराः सदाचारादिनिरूपकाः समायान्ति । विश्वस्य कल्याणाय परिपालनीया आचाराः सत्याहिंसादयो धर्मत्वेन गृहीताः सन्ति । 'आचारहीनं न पुनन्ति वेदाः' इत्युक्तत्वात् तादृशधर्मस्य पालनमत्यावश्यकं भवति ।

प्राचीनैर्महर्षिभिः सकलस्य विश्वस्य कल्याणकामनयाभिप्रेरितैः स्वकीयतपोबलेन सर्वाणि शास्त्राण्यालोच्य विविधेषु ग्रन्थेषु धर्मस्य मूलं मर्म साररूपेण समुद्घाटितं प्राप्यते । धर्मस्य तत्त्वानि, मानवताया मूलं स्वरूपम्, विश्वकल्याणस्य भावना, उदारतया सर्वेषां हितसाधने चिन्तनञ्च तैर्यत् कृतं तन्न केवलं मानवस्य अपितु समग्रस्यापि जगतः, समस्ताया अपि प्रकृतेः समेषां भूतानाञ्च कल्याणकरं वर्तते । वाञ्छद्भिस्तैः समस्तलोकहितसाधकस्य धर्मस्य स्वरूपं सुष्ठु च प्रतिपादितम् । एतत् सर्वं वैदिकसनातनधर्मस्य मूलसिद्धान्तरूपं विद्यते । अहिंसादयो ये धर्माः प्रोक्तास्ते नैकस्मिन् देशे प्रचलिताः न वा कस्यचनैकस्य सम्प्रदायस्य सम्पद्रूपाः, न च कैश्चित् त्यक्तुं योग्याः, अपितु सर्वैराचारे स्थापनीया अनुसरणीयाश्च सर्वदा सर्वथेति धारणरूपेणैव तेषां धर्मत्वं सुसिद्धम् । यथा प्रकृतौ विद्यमानानां महाभूतानां धर्माः कदाचिदपि न त्याज्यास्तैस्तथैव सत्यादयोऽपि धर्माः परिपालने योग्याः । पालने सुखं भवति । नहि पालने लोकेऽस्मिन् परलोके च दुःखं जायते । रक्षिता एव ते लोकस्य रक्षणं कुर्वन्तीति न विस्मर्तव्यम् ।

ये धर्मा विश्वकल्याणहेतोः प्रतिपादिताः, ये च मानवानां कृते देवत्वसाधने कारका निरूपितास्ते सर्वे वैदिकसनातनधर्मे प्रधानसिद्धान्तभूताः प्राप्यन्ते । वैदिकसनातनधर्मो हि समस्तस्य जगतः कल्याणाय व्यवहरणीयानां सदाचारमर्यादादीनां रक्षणे सम्यक्तया परिपालने च जनान् प्रेरयति । 'उदारचरितानां तु वसुधैव कुटुम्बकम्' इत्युदात्ता भावनात्र सर्वोपरि प्रधानभूता प्रतिपादिता विद्यते । अतश्च वैदिकसनातनधर्म एव याथार्थ्येन धर्म इति कथनं स्वाभाविकं मन्यते । अत एव स एव वैश्विको विश्वधर्मः । अन्ये च ये सम्प्रति समुदायविशेषैः स्वीकृताः स्वल्पसमुदायस्य हितसाधका धर्माः कथ्यन्ते ते च केवलं सम्प्रदायरूपाः । कस्यचन व्यक्तिविशेषस्य मतमाश्रित्य कस्यचन समूहस्य सम्प्रदायस्य वा केवलं हितसाधकाः स्वल्पजनानामुत्कर्षस्याभिलाषुकाः साम्प्रदायिकभावनापरिप्लुता धर्माः नहि विश्वधर्मत्वं समाप्नुवन्ति । वैदिकसनातनधर्मस्य तु न तथा स्वल्पसम्प्रदायान्तर्गतत्वं विद्यते । समग्रस्य विश्वस्य कल्याणसाधकत्वेनास्य धर्मस्य विश्वव्यापित्वं मानवसहितायाः समग्राया अपि प्रकृतेर्जगतश्च संरक्षणे प्रवृत्तिश्च सनातनधर्मस्य विश्वकल्याणकारितायाः साधकानि तत्त्वानि धर्मेऽस्मिन् सुसिद्धानि । अतश्चास्माभिरपि तदर्थं अर्थाद् विश्वधर्मस्य परिपालनेन समग्रमानवसहितायाः प्रकृतेः संरक्षणेन जगतो रक्षणाय मनावानां हिताय च सहिष्णुभिर्धर्मपरैर्भाव्यम्, तदर्थं सर्वथा यतनीयञ्च । तथा सत्येव जगति सुशान्तिः स्यात् ।

# अभ्यासः

१. **अधस्तनप्रश्नानामुत्तरं लिखत**

(क) प्रबन्धशब्दस्य कोऽर्थः ?

(ख) प्रबन्धस्य परिभाषा का ?

(ग) प्रबन्धरचनाकलाया महत्त्वं किमस्ति ?

(घ) प्रबन्धाः कतिप्रकारका भवितुं शक्नुवन्ति ?

(ङ) प्रबन्धरचनाया अङ्गानि कानि ?

(च) प्रबन्धे दृष्टान्तस्य मूल्यं किमस्ति ?

(छ) प्रबन्धस्य गुणाः के ?

(ज) प्रबन्धस्य दोषाः के ?

(झ) प्रबन्धलेखनस्य प्राग्रूपं रूपरेखा वा कथं निर्मीयते ?

२. **प्रबन्धरचनाविषये कक्षायां समूहं निर्माय पृथक् पृथग् विचारविमर्शं च कृत्वा निष्कर्षं गुरवे समर्पयत ।**

३. **अधोलिखितानां प्रश्नानां संक्षिप्तमुत्तरं दत्त ।**

(क) धर्मशब्दस्य का व्युत्पत्तिः कश्चार्थः ?

(ख) धर्मशब्दस्य पर्यायाः के सन्ति ?

(ग) किं तत्त्वं मानवान् पशुभ्यो भिन्नान् सम्पादयति ?

(घ) धर्मस्य परिभाषा का ?

(ङ) केन हेतुना सत्याहिंसादीनां तत्त्वानां धर्मत्वम् ?

(च) धर्मः कं धारयति ?

(छ) 'आत्मनः प्रतिकूलानि परेषां न समाचरेत्' इत्यस्य तात्पर्यं किम् ?

(ज) धर्मधारणस्य दृष्टान्तः कः ?

(झ) विश्वजनीनधर्मे किमपेक्ष्यते ?

(ञ) सम्प्रदायरूपाणां धर्माणां विश्वजनीनधर्मस्य च परस्परं को भेदः ?

(ट) धर्मः किमर्थं सततमाश्रयणीयः ?

४. **अधस्तनश्लोकस्याशयं स्वकीयैः शब्दैर्लिखत**

अयं निजः परो वेति गणना लघुचेतसाम् ।

उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

५. **वैदिकसनातनधर्मस्य विश्वधर्मतासम्पादका गुणाः के के सन्ति ? सविमर्शं लिखत ।**

६. **अधस्तनं गद्यभागं पठित्वा पृष्टानां प्रश्नानामुत्तराणि लिखत**

धर्मस्य पालनेनैव विश्वकल्याणस्य सम्पादनं सम्भवति । विश्वकल्याणे सम्पादिते हि विश्वधर्मः सम्पादितो भवति । यतो हि मानवतैव विश्वधर्मस्य मूलं विद्यते । न तत्र जाति-वर्ण-धर्मादिभेदेन विरोधः प्रवर्तते । विश्वस्थस्य सर्वस्यापि मानवमात्रस्य कल्याणं मानवतायां समाश्रितं वर्तते । विश्वधर्मस्य भावना विश्वकल्याणमूलास्ति । सम्प्रदायरूपाणां सम्प्रति प्रचलितानां समेषां धर्माणां सारभूतानां तत्त्वानां सङ्ग्रहणेन विश्वधर्मस्य स्वरूपं निर्मातुं शक्यते । यत्र केवलं मानवानां प्राणिनां प्रकृतेश्च सर्वथा कल्याणं विचार्यते, सर्वभूतप्रकृतेर्हितसाधनाय व्यवहारा अस्माकं प्रवर्तन्ते, सत्या-हिंसादीनां वैश्विकधर्माणां परिपालनं सर्वैः प्रयत्नतः क्रियते तत्रैव धर्मस्य विश्वकल्याणकर्तृत्वं विश्वव्यापिधर्मत्वञ्च सम्भवति । जाति-देश-काल-सिद्धान्तादिभिरपरिच्छिन्ना धर्माः सार्वभौमा महाव्रतरूपा भवन्ति । विश्वधर्मे सर्वेषामुदयस्य समेषां कल्याणस्य च भावना सर्वोपरि सम्मान्या दृश्यते । तत्र समेषां सुखं सर्वेषां भद्रं समस्तानां दुःखराहित्यञ्च काम्यते, तत्सम्पादनाय प्रयत्नश्च क्रियते ।

(क) विश्वधर्मस्य मूलं किमस्ति ?

(ख) कुत्र सर्वभूतप्रकृतेर्हितसाधनाय व्यवहाराः प्रवर्तन्ते ?

(ग) मानवतायां किं समाश्रितं वर्तते ?

(घ) वैश्विका धर्माः के सन्ति ?

(ङ) के धर्माः सार्वभौमा भवन्ति ?

७. **निम्नाङ्कितानि शीर्षकाण्यवलम्ब्य पृथक् पृथक् प्रबन्धं रचयत ।**

१. संस्कृतं संस्कृतेर्मूलम्

२. संस्कृतिः समृद्धसमाजस्य दर्पणम्

३. विज्ञानस्य महत्त्वम्

४. देशसमुन्नत्यै नार्यः शिक्षणीयाः

५. जननीसमा जन्मभूमिः

## अष्टादशः पाठः

# छन्दोज्ञानम्

### छन्दःपरिचयः

संस्कृतवाङ्मये विद्यमानानां शास्त्राणां मध्ये वेदः प्रधानं शास्त्रं वर्तते । पुरुषरूपस्य वेदस्य षडङ्गानि सन्ति । तेषु छन्दः चरणस्थानीयमङ्गमस्ति । छन्दोविषयकं शास्त्रं वैदिकं लौकिकञ्चेति द्विप्रकारकं प्राप्यते । छन्दोविषयका ग्रन्थाः पिङ्गलच्छन्दःशास्त्रं वृत्तरत्नाकरः छन्दोमञ्जरी इत्याद्याः सन्ति ।

येन चित्तमानन्दितं भवति तत् छन्दः । अतो जनाश्चित्ताह्लादकं तत्त्वविशेषं छन्दः इति कथयन्ति । छन्दःशब्दस्य वेदः इच्छा रुचिः आच्छादनम् चित्ताह्लादः वृत्तम् इत्यादयो भिन्नार्थसम्बद्धाः पर्यायाः सन्ति । अत्र वृत्तार्थपरः छन्दःशब्दः स्वीक्रियते ।

छन्दसा रचनायां लयात्मकता समायाति । तया च रचनायाः पठने श्रवणे च माधुर्यमनुभूयते । विभिन्नानां विषयाणां कण्ठस्थीकरणाय छन्दसा सौकर्यं सारल्यं च जायते । साहित्यविषयस्य पठने बोधे च छन्दसो महत्त्वमुच्चैर्वर्तते ।

### छन्दोभेदाः

प्रथमतश्छन्दो द्विविधं वर्तते- वैदिकं लौकिकञ्चेति । वैदिकच्छन्दांसि बहूनि सन्ति । तेषु सप्त छन्दांसि प्रधानानि । तानि गायत्री, उष्णिक्, अनुष्टुप्, त्रिष्टुप्, जगती, पृथ्वी, पङ्क्तिश्चेति । लौकिकं छन्दश्च वेदातिरिक्तेषु ग्रन्थेषु साहित्यिकरचनासु च प्रयुक्तं प्राप्यते । लौकिकच्छन्दःसु निबद्धं श्लोकं पद्यमिति कथयन्ति तद्विदः ।

### पद्यलक्षणम्

छन्दसि रचिता रचना पद्यम् इति कथ्यते । पद्यस्य परिचयप्रदानक्रमे 'छन्दोबद्धं पदं पद्यम्' इत्युक्तमस्ति । अतश्छन्दसि रचितः श्लोकः पद्यमिति ज्ञेयम् । पद्यं च चतुष्पदि- पादचतुष्टयात्मकं भवति । एकस्मिन् श्लोके चत्वारः पादा भवन्ति । पादश्चरणनाम्नापि गृह्यते । ते च छन्दोनियमानुसारेण प्रत्येकं छन्दसि भिन्नभिन्नवर्णसङ्ख्यया मात्रासङ्ख्यया युक्ताः पृथक् पृथक् प्राप्यन्ते ।

## पद्यभेदौ

पद्यं वृत्तं जातिश्चेति द्विप्रकारकं भवति । तयोः परिचयो यथा-

**पद्यं चतुष्पदी, तच्च वृत्तं जातिरिति द्विधा ।**
**वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥**

एतयोः स्वरूपमधः पृथक् पृथक् प्रस्तुतमस्ति ।

## जातिः

मात्राणां गणनया यत्र पद्ये छन्दः प्रचलति तादृशं पद्यं जातिः, इति निगद्यते । मात्रा चात्र लघुवर्णस्य कृते १ गुरुवर्णस्य कृते २ इति कृत्वा गण्यते । जातिच्छन्दसि पञ्च गणा भवन्ति । उक्तञ्च-

**ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ।**
**गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥**

एतदनुसारेण गणव्यवस्था निम्नाङ्कितस्वरूपा समुत्पद्यते-

| सर्वगुरुः | अन्तगुरुः | मध्यगुरुः | आदिगुरुः | चतुर्लघुः |
|---|---|---|---|---|
| ऽऽ | ।।ऽ | ।ऽ। | ऽ।। | ।।।। |

## वृत्तम्

यत्र वर्णानामक्षराणां वा गणनां कृत्वा छन्दसः प्रयोगः क्रियते तादृशं पद्यं वृत्तमिति कथ्यते । छन्दोमञ्जर्यां 'वृत्तमक्षरसङ्ख्यातम्' इत्युक्तमस्ति । तत्र पद्ये अनुष्टुप् इन्द्रवज्रा उपेन्द्रवज्रा इत्यादीनि वृत्तानि प्रयुक्तानि प्राप्यन्ते ।

## वृत्तभेदाः

समम् अर्धसमं विषमं चेति कृत्वा वृत्तस्य त्रयो भेदाः सन्ति । उक्तञ्च-

**सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा ।**
**समं समचतुष्पादं भवत्यर्धसमं पुनः ॥**
**आदिस्तृतीयवद् यस्य पादस्तुर्यो द्वितीयवत् ।**
**भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम् ॥**

## समवृत्तम्

समं वृत्तं समानानां चतुर्णां पादानां प्रयोगे भवति । अर्थात्, प्रथमे पादे यावन्त्यक्षराणि समाविष्टानि तावन्त्येवाक्षराणि शिष्टेषु त्रिष्वपि पादेषु सन्ति चेत् तत् समचतुष्पादात्मकं वृत्तं भवति । एतादृशं वृत्तं समं वृत्तम्, इति कथ्यते । 'समं समचतुष्पादम्' इति पूर्वं तस्य लक्षणक्रमे प्रतिपादितमेव । उदाहरणं यथा-

**कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।**
**सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥**
**अत्र चतुर्ष्वपि पादेषु वर्णसङ्ख्या समाना(११) वर्तते ।**

## अर्धसमवृत्तम्

श्लोकार्धस्य समतायामर्धसमं वृत्तं भवति । प्रथमचरणवत् तृतीयं चरणं पुनश्च द्वितीयचरणवत् चतुर्थं चरणं यत्र समानं भवति तदर्धसमं वृत्तम् । उदाहरणं यथा-

**विहितां प्रियया मनःप्रियामथ निश्चित्य गिरां गरीयसीम् ।**
**उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥**

## विषमवृत्तम्

विषमं वृत्तं च प्रत्येकं पादे भिन्नभिन्नवर्णसङ्ख्यायुक्तं भवति । सर्वेषु पादेषु यत्र वर्णानां सङ्ख्या समाना न भवति तद् वृत्तं विषमम्, इति कथ्यते । अस्मिन् वृत्ते किमपि चरणमन्येन चरणेन सह वर्णसङ्ख्यादृष्ट्या समानं न भवति । उदाहरणं यथा-

**परिभूतफुल्लशतपत्र-वनविसृतगन्धविभ्रमा ।**
**कस्य हन्त हरतीह हरे ! मुखपद्मसौरभकला तवाद्भुता ॥**

# अभ्यासः

१. **अधोनिर्दिष्टानां प्रश्नानामुत्तराणि लिखत**

(क) छन्दःशास्त्रं कतिप्रकारकं प्राप्यते ?
(ख) लौकिकं छन्दः कुत्र प्रयुज्यते ?
(ग) छन्दःशब्दस्य कोऽर्थः ?
(घ) छन्दःशब्दस्य पर्यायाः के सन्ति ?
(ङ) छन्दःशास्त्रे छन्दःशब्दस्य कोऽर्थो गृह्यते ?
(च) पद्यस्य लक्षणं किम् ?

(छ) पद्यं कतिविधं भवति ?

(ज) वृत्तस्य स्वरूपं किम् ?

(झ) जातेर्लक्षणं किम् ?

(ञ) वृत्तस्य कति प्रकाराः सन्ति ?

(ट) समवृत्तस्य लक्षणं किमस्ति ?

(ठ) अर्धसमं वृत्तं कस्यां स्थितौ भवति ?

(ड) विषमं वृत्तं कीदृशं भवति ?

## २. अधोनिर्दिष्टानां पदानां संस्कृतेऽर्थान् लिखत

चित्ताह्लादः, छन्दोबद्धम्, पादः, कण्ठस्थीकरणम्, सौकर्यम्, माधुर्यम्, सारल्यम्, प्रथमचरणवत्, वर्णसङ्ख्यादृष्ट्या ।

## ३. परस्परं मेलयत

| | |
|---|---|
| छन्दः | मात्राकृता |
| पद्यम् | पादेषु प्रथमस्य तृतीयेन द्वितीयस्य चतुर्थेन च समानम् |
| समं वृत्तम् | वेदस्य चरणस्थानीयम् अङ्गम् |
| अर्धसमं वृत्तम् | छन्दोबद्धं पदम् |
| जातिः | भिन्नचतुष्पादयुक्तम् |
| विषमं वृत्तम् | समानैश्चतुर्भिः पादैर्युक्तम् |

## ४. अधोनिर्दिष्टपद्यस्य तात्पर्यं लिखत

पद्यं चतुष्पदी, तच्च वृत्तं जातिरिति द्विधा ।

वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥

## ५. साहित्यविषये छन्दसो महत्त्वं किमर्थमुच्चैर्वर्तते ? स्पष्टं कुरुत ।

## ६. अस्य पाठस्य पठनेन किं ज्ञायते ? सरलतया स्वकीयैः शब्दैर्लिखत ।

एकोनविंशः पाठः

# लघुगुरूवर्णबोधो गणयतिज्ञानञ्च

## वर्णपरिचयः

भाषायां वर्णा अक्षराणि वा शब्देषु सम्मेल्य प्रयुज्यन्ते । वर्णाश्च शब्दे प्रयुक्ताः कस्याप्यर्थस्य बोधका अर्थभेदकाश्च भवन्ति । ते च देवनागरीलिपौ अ, आ, इ, उ, क्, ख्, ग् ... इत्यादयः सन्ति ।

## वर्णभेदौ

भाषिकप्रयोगे उपयुज्यमाना वर्णा द्विप्रकारकाः सन्ति- स्वरवर्णा व्यञ्जनवर्णाश्च । अचः स्वराः कथ्यन्ते । अ, आ, इ, उ, इ ... इत्यादयो वर्णाः स्वराः । स्वरवर्णा व्यञ्जनवर्णरहिता भवन्ति । हल्वर्णा व्यञ्जनानि कथ्यन्ते । स्वरवर्णं विना एतेषामुच्चारणं पूर्णतया नहि भवति । क्, ख्, ग्, घ्, च्, छ्, ... इत्यादयो व्यञ्जनवर्णाः सन्ति । स्वरैः सह संयुक्तास्ते क, ख, ग, ... इत्यादिरूपेण पूर्णामुच्चार्यावस्थां प्राप्नुवन्ति ।

## वर्णानां ह्रस्वदीर्घव्यवस्था

उच्चारणकालस्य भेदेन वर्णाः पुनर्द्विप्रकारकाः सन्ति- ह्रस्ववर्णा दीर्घवर्णाश्च । स्वल्पेन कालेनोच्चारयितुं शक्या वर्णा ह्रस्वा भवन्ति । ततोऽधिकसमयेनोच्चार्यमाणा वर्णा दीर्घवर्णाः कथ्यन्ते । उच्चारणकालस्य दीर्घतासूचिका मात्रा ह्रस्ववर्णेषु न प्रयुज्यते । स्वरवर्णेषु अ, इ, उ, ऋ, ऌ चेति वर्णा ह्रस्वाः सन्ति । आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ इत्येते स्वरा दीर्घाः सन्ति ।

व्यञ्जनवर्णाः स्वरवर्णैः सह संयुक्ताः सन्तः पूर्णमुच्चार्या भवन्ति । ते च ह्रस्वैः स्वरवर्णैः सह संयुक्ता ह्रस्वा दीर्घैश्च संयुक्ता दीर्घा भवन्ति । क, ख, ग, घ कु, खु, गि, चि, कृ, घृ ... इत्यादयो वर्णा ह्रस्वस्वरसंयुक्ताः सन्ति । अतस्ते ह्रस्ववर्णाः कथिताः । का, खा, की, खी, कू, खू, कॄ, खॄ, के, कै, खे, खै, को, कौ, खो, खौ ... इत्यादयो दीर्घव्यञ्जनानि । तानि च दीर्घकालोच्चार्यस्वरैः संयुक्ताः सन्ति ।

ह्रस्वेषु व्यञ्जनवर्णेषु ह्रस्वबोधिका मात्रा प्रयुज्यते परमवर्णस्य परिचायिका ह्रस्वमात्रा लेखनकाले न दृश्यते । इकारोकारयोर्ह्रस्वमात्राबोधकं चिह्नं प्राप्यते । एवम् ऋकारस्यापि ह्रस्वमात्राचिह्नं लभ्यते । यथा- इकारस्य- ि, उकारस्य- ु, ऋकारस्य- ृ इति ।

दीर्घस्वरयुक्तेषु व्यञ्जनवर्णेषु दीर्घताबोधिका मात्रा प्रयुज्यते । तत्र प्रायेण सर्वेषां दीर्घस्वराणां मात्रा लेखनकाले पृथक् संयोजयितुं शक्यन्ते । ताश्च मात्रा यथा- आ- ा, ई- ी, ऊ- ू, ॠ- ॄ, ए- े, ऐ- ै, ओ- ो, औ- ौ । इत्थं मात्रायाः प्रयोगं विलोक्य वर्णानां ह्रस्वदीर्घभेदो ज्ञातुं शक्यते ।

## लघुगुरुपरिचयः

छन्दसि एकमात्रिको ह्रस्वो वर्णो लघुरिति कथ्यते । द्विमात्रिको दीर्घवर्णश्च गुरुरिति निगद्यते । उच्चारणकालस्य लघुतया ह्रस्ववर्णो लघुः, पुनश्च उच्चारणकालस्य गुरुत्वाद् दीर्घो वर्णो गुरुरिति नियमोऽस्ति । लघुवर्णस्य चिह्नम्- '।' इति, दीर्घवर्णस्य च चिह्नम्- 'ऽ' इति प्रदत्तमस्ति । वृत्ते लघुवर्णस्य सङ्केतो 'लः' इत्यनेन गुरुवर्णस्य सङ्केतश्च 'गः' इत्यनेनाक्षरेण क्रियते ।

## ह्रस्ववर्णानां गुरुभावावस्था

वृत्ते छन्दसि वा छन्दोनियमानुसारेण कदाचिद् ह्रस्वोऽपि वर्णो गुरुः भवति । तत्र सानुस्वारो (अनुस्वारसहितः कं यं लं इत्यादिरूपः) वर्णो लघुरपि गुरुर्भवति । एवं सविसर्गो (कः, हः, सः इत्यादिरूपः विसर्गसहितः) वर्णोऽपि लघुर्वर्तते चेदपि गुरुर्भवति । तथैव संयुक्तस्याक्षरस्य पूर्वं स्थितो वर्णो ह्रस्वोऽपि दीर्घो भवति । यथा- 'वंशः' इत्यत्र व-वर्णो ह्रस्वः परमनुस्वारस्य योगाद् गुरुर्मन्यते । 'रामः' इत्यत्र म-वर्णो ह्रस्वोऽस्ति किन्तु विसर्गस्य योगात् स गुरुर्मन्यते । एवमेव 'पक्षः' इत्यत्र क्ष-इत्यस्य संयुक्तत्वात् तत्पूर्ववर्ती प-वर्णो ह्रस्वोऽपि दीर्घो गण्यते । पादान्ते प्रयुक्तो वर्णो लघुरपि विकल्पेन गुरुर्गण्यते । एतत् सर्वं विचार्य वर्णानां लघुगुरुभावो विज्ञेयः ।

## गणपरिचयः

छन्दसि प्रत्येकं गणानां बोधाय 'मयरसतजभनगल'नामका दश वर्णा गृहीताः सन्ति । तेषु दशसु वर्णेषु समस्तं वृत्तरचितं वाङ्मयं समाहितमस्ति । नेपाल्याञ्च ते वर्णा 'यमाताराजभानसलगाः' इति क्रमेण स्थापिताः सन्ति । एनं क्रममाश्रित्य गणानां निर्माणं कर्तुं शक्यते । उक्तञ्च-

**म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।**
**समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥**

एकस्मिन् गणे त्रयो वर्णाः स्थाप्यन्ते । 'यमाताराजभानसलगाः' इति वर्णसमूहे आदितः क्रमेण त्रीन् त्रीन् वर्णान् गृहीत्वा अक्षराणां नामानुसारेण गणा निर्मीयन्ते । तत्र सूत्रे स्थितेषु वर्णेषु प्रथमं त्रयो वर्णा 'यमाता' गृह्यन्ते चेत् तेषां त्रयाणां वर्णानां समूहो 'य'गण इति कथ्यते । पुनश्च तत्रैव पूर्वस्थितं यवर्णं विहाय 'मातारा' इत्येतान् त्रीन् वर्णान् गृहीत्वा 'म'गण उत्पाद्यते । एवं क्रमेण यथोत्तरं पूर्ववर्तिवर्णस्य त्यागेन वर्णत्रयं गृहीत्वा त-र-जादयो गणाः क्रमशो निर्मीयन्ते ।

'यमाताराजभानसलगाः' इति सूत्रानुसारेण गणा अष्टौ भवन्ति । ल- इत्यनेन लघुवर्णस्य ग- इत्यनेन च गुरुवर्णस्य सङ्केतः क्रियते । लघुगुरुवर्णानां सङ्केतचिह्नानुसारेण गणा निम्नाङ्किता भवन्ति-

| गणः | सङ्केताक्षराणि | सङ्केतचिह्नानि |
|---|---|---|
| यः | यमाता | ।ऽऽ (आदिलघुः) |
| मः | मातारा | ऽऽऽ (त्रिगुरुः) |
| तः | ताराज | ऽऽ। (अन्त्यलघुः) |
| रः | राजभा | ऽ।ऽ (मध्यलघुः) |
| जः | जभान | ।ऽ। (मध्यगुरुः) |
| भः | भानस | ऽ।। (आदिगुरुः) |
| नः | नसल | ।।। (त्रिलघुः) |
| सः | सलगा | ।।ऽ (अन्त्यगुरुः) |

तत्र गणव्यवस्थाया नियमनाय पद्यद्वयं यथा-

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ।**
**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥**
**आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ॥**

## यतिनियमः

पद्यस्य वाचनसमये वाचकस्य जिह्वा यत्र शब्दे स्वेच्छया विरमते तत् स्थानं यतिरित्युच्यते । विद्वांसः स्वेच्छया विच्छेद-विराम-विश्रामादिभिः पदैर्यतिं बोधयन्ति । पद्यश्रवणे लग्नानां सुधियां यथोद्वेगो न भवति तथा श्रुतिमधुरतां सम्पाद्य पद्यानां वाचनं भवेदिति हेतोर्यतिः कविभिर्लक्षिता । यतिप्रयोगेण श्लोकेषु निश्चितस्थाने पदच्छेदं कृत्वा पद्यानामुच्चारणाय सौकर्यं जायते । तादृश्या यत्या भ्रष्टा पद्यरचना दुष्टा भवति । तस्या गायनञ्च श्रोतुः श्रवणोद्वेजकं सम्पद्यते ।

पद्यगायने यतिव्यवस्थया लयविधानार्थं सहयोगः प्राप्यते । उचितस्थाने विहिता यतिर्वृत्तस्य शोभां वर्धयति । वृत्तभेदानुसारेण पद्येषु यतिरपि भिन्नभिन्नस्थानेषु क्रियते । कुत्र कुत्र यतिर्भवतीति विषये छन्दोनियामकेषु ग्रन्थेषु प्रत्येकं वृत्तस्य लक्षणे सङ्केतस्तत्र तत्र प्रदत्तः प्राप्यते । तन्नियममनुसृत्यैव कविभिः श्लोकरचनावसरे समुचितपदविन्यासेन निश्चितस्थाने यतिः कर्तव्या । गायनकालेऽपि यतिनियमं विचार्यैव पद्यस्य वाचनं गायनं वा कर्तव्यम् ।

यतिविषयकं नियमवाक्यं यथा-

**यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।**
**सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥**
**श्लोकेषु नियतस्थाने पदच्छेदं यतिं विदुः ।**
**तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा ॥**

## अभ्यासः

१. **निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) के वर्णाः स्वराः ?

(ख) के वर्णा व्यञ्जनानि ?

(ग) वर्णानां ह्रस्वत्वे दीर्घत्वे च को हेतुः ?

(घ) कस्य स्वरस्य ह्रस्वमात्राबोधकं चिह्नं न लभ्यते ?

(ङ) लघुवर्णः कीदृशो भवति ?

(च) गुरुवर्णस्य वैशिष्ट्यं किम् ?

(छ) ह्रस्वा अपि वर्णाः कस्या कस्यां स्थितौ गुरुभावं प्राप्नुवन्ति ?

(ज) समग्रतया गणाः कति सन्ति ?

(झ) एकस्मिन् गणे कति वर्णा भवन्ति ?

(ञ) गणविधायकं सूत्रं किमस्ति ?

(ट) कस्मिन् गणे सर्वे वर्णा गुरवो भवन्ति ?

(ठ) यरतगणाः कुत्र कुत्र लाघवं यान्ति ?

(ड) का नाम यतिः ?

(ढ) यतिभ्रष्टया श्लोकरचनया किं भवति ?

२. **परस्परं मेलयत**

| | |
|---|---|
| यगणः | त्रिलघुः |
| मगणः | आदिगुरुः |
| तगणः | मध्यगुरुः |
| रगणः | त्रिगुरुः |
| जगणः | अन्तलघुः |
| भगणः | अन्तगुरुः |
| नगणः | आदिलघुः |
| सगणः | मध्यलघुः |

## ३. रिक्तस्थानं पूरयत

(क) मात्रायाः प्रयोगं विलोक्य वर्णानां ......... ज्ञातुं शक्यते ।

(ख) गणानां बोधाय ..... दश वर्णा गृहीताः सन्ति ।

(ग) आदिमध्यावसानेषु भजसा ... ... यान्ति ।

(घ) आदिमध्यावसानेषु मनौ तु ......... यातः ।

(ङ) कवयो जिह्वेष्टविश्रामस्थानं .......कथयन्ति ।

## ४. निम्नाङ्कितस्य श्लोकस्य तात्पर्यं लिखत

श्लोकेषु नियतस्थाने पदच्छेदं यतिं विदुः ।
तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा ॥

## ५. छन्दसि गणव्यवस्था कथं निर्धार्यते ? स्वकीयैः शब्दैर्लिखत ।

## ६. कस्यचन वृत्तस्य नियमानुसारेण स्वतन्त्रं पद्यं यस्मिन् कस्मिन्नपि विषये रचयत ।

विंशः पाठः

# अनुष्टुभाद्युपजात्यन्तानां वृत्तानां निरूपणम्

## अनुष्टुभ्

अनुष्टुब्वृत्ते प्रतिपादमष्टौ वर्णा भवन्ति । अष्टाक्षरैः सहितमेकं चरणं भवति । तादृशानां चतुर्णां चरणानां मेलनेनैकं पद्यं सम्पद्यते । चतुर्षु एव चरणेषु पञ्चमो वर्णो लघुर्भवति, षष्ठश्च वर्णो गुरुर्भवति । सप्तमो वर्णः प्रथमे तृतीये च पादे गुरुर्भवति । पुनश्च द्वितीये चतुर्थे च पादे सप्तमो वर्णो लघुर्भवति । शेषेषु वर्णेषु लघुगुरुस्थापने कश्चिन्नियमो नास्ति । शब्दानामुच्चारणगतं सौविध्यं विचार्य स्वेच्छया लघवो गुरवश्च वर्णाः स्थापयितुं शक्यन्ते । उक्तञ्च-

**पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।**
**षष्ठं गुरु विजानीयात् शेषेषु नियमो नहि ॥**

पुनश्च,

**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।**
**द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥**

अस्मिन् वृत्तेऽष्टानां वर्णानां प्रयोग एकस्मिन् पादे भवतीति पादस्य दीर्घता न दृश्यते । अतो लेखनसमये सरलतायै प्रथमद्वितीययोः पादयोर्मेलनेनैका पङ्क्तिः, तृतीयचतुर्थयोश्च पादयोर्मेलनेनापरा पङ्क्तिरिति कृत्वा द्वे पङ्क्ती निर्मीयेते ।

उदाहरणं यथा-

**उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।**
**नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥**

अत्र पद्ये प्रथमे पादे 'हि' द्वितीये पादे 'म' तृतीये पादे 'स्य' चतुर्थे च पादे 'न्ति' इति पञ्चममक्षरं लघु वर्तते । एवं प्रथमे पादे 'सिद्ध्यन्ति' इत्यत्र संयुक्ताक्षरस्य पूर्ववर्ति 'सि' द्वितीये पादे 'मनोरथैः' इत्यत्र 'नो' तृतीये पादे 'सिंहस्य' इत्यत्र सानुस्वारं 'सिं' चतुर्थे च पादे 'मुखे' इत्यत्र 'खे' इति षष्ठमक्षरं गुरु विद्यते । पुनश्च सप्तममक्षरं प्रथमे पादे 'य' तृतीये पादे च 'सिंहस्य' इत्यत्र संयुक्ताक्षरस्य पूर्ववर्ति 'ह' गुरु वर्तते । एवं सप्तमो वर्णो द्वितीये पादे 'र' चतुर्थे पादे च 'मृ' लघुरस्ति । अतश्चात्रानुष्टुब्वृत्तस्य लक्षणमक्षरशो घटत इति लक्षणस्योदाहरणे समन्वयः ।

अन्यदुदाहरणं यथा-

**हरे ! राम ! हरे ! राम ! राम ! राम ! हरे ! हरे ! ।**
**हरे ! कृष्ण ! हरे ! कृष्ण ! कृष्ण ! कृष्ण ! हरे ! हरे ! ॥**

अन्यच्च-

**विद्या ददाति विनयं विनयाद् याति पात्रताम् ।**
**पात्रत्वाद् धनमाप्नोति धनाद् धर्मस्ततः सुखम् ॥**

(**विशेषः**- अत्र प्रथमं वृत्तस्य लक्षणानुसारेण समन्वयः प्रदर्शित इति हेतोः कस्मिन् पादे कस्य वर्णस्य कथं लघुत्वं कथञ्च गुरुत्वमिति स्पष्टीकरणस्यावश्यकतां विचार्य श्लोकस्थानि पदानि तत्रत्या वर्णाश्च पृथक् पृथग् विलिख्य स्फुटं प्रकाशितमस्ति । लक्ष्यस्य सम्यग् बोधेनाग्रेऽपि लक्षणसमन्वयप्रदर्शने विधिरयमनुसर्तुं शक्यते परं सर्वत्र तथा करणेऽधिकस्य समयस्य व्ययो भवति । अतः सङ्क्षेपेणापि समन्वयप्रदर्शने शिक्षकैश्छात्राः शिक्षणीयाः)

## आर्या

आर्याच्छन्दो जातिवर्गान्तर्गतं वर्तते । अतोऽत्र मात्रागणनया विद्वांसश्छन्दोनियमं प्रदर्शयन्ति । एतज्जातिच्छन्दोमध्ये साधारणः प्रकार इति कथ्यते । अस्याः सामान्यलक्षणं निम्नाङ्कितमस्ति-

**यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।**
**अष्टादश द्वितीयके चतुर्थके पञ्चदश सार्या ॥**

अर्थाद् यत्र पद्ये प्रथमे तृतीये च पादे द्वादशमात्रा द्वितीये पादेऽष्टादशमात्राश्चतुर्थे पादे च पञ्चदशमात्रास्तत् पद्यमार्याच्छन्दोयुक्तं भवति । अत्र जातिच्छन्दसो लक्षणमनुसृत्य लघुवर्णस्य कृते १ मात्रा गुरुवर्णस्य कृते च २ मात्रेति कृत्वा गणना कार्या । समन्वयप्रदर्शनेऽपि तदनुसारेणैव लेखनमावश्यकं भवति ।

उदाहरणं यथा-

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।**
**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥**

समन्वयो यथा-

| | | | | |
|---|---|---|---|---|
| प्रथमः पादः- | दानं | भोगो | नाशः | |
| | ऽऽ | ऽऽ | ऽऽ | |
| | २+२ | २+२ | २+२ | =१२ मात्राः |

| | | | | | |
|---|---|---|---|---|---|
| द्वितीयः पादः- | तिस्रो | गतयो | भवन्ति | वित्तस्य | |
| | ऽऽ | ।।ऽ | ।ऽ। | ऽऽऽ | |
| | २+२ | १+१+२ | १+२+१ | २+२+२ | = १८ मात्राः |

| | | | | | |
|---|---|---|---|---|---|
| तृतीयः पादः- | यो न | ददाति | न | भुङ्क्ते | |
| | ऽ । | ।ऽ। | । | ऽऽ | |
| | २+१ | १+२+१ | १ | २+२ | = १२ मात्राः |

| | | | | |
|---|---|---|---|---|
| चतुर्थ पादः- | तस्य | तृतीया | गतिर्भवति | |
| | ऽऽ | ।ऽऽ | ।ऽ। ।। | |
| | २+२ | १+२+२ | १+२+१+१+१ | = १५ मात्राः |

अत्र पद्ये आर्याच्छन्दसो लक्षणानुसारेण मात्राणां व्यवस्था सम्यक् संयोजिता वर्तत इति तस्या लक्षणस्य समन्वयो जातः ।

अन्यदुदाहरणं यथा-

**वृन्दावने सलीलं वल्गुद्रुमकाण्डनिहिततनुयष्टिः ।**
**स्मेरमुखार्पितवेणुः कृष्णो यदि मनसि कः स्वर्गः ? ॥**

अत्राप्यार्याया लक्षणानुसारेण गणव्यवस्था सुष्ठु घटत इति लक्षणस्य समन्वयः ।

## प्रमाणिका

यस्मिन् छन्दसि प्रत्येकं पादेषु जगणरगणौ लघुर्गुरुश्चेति कृत्वाऽष्टौ वर्णा भवन्ति तस्य नाम प्रमाणिका । तस्याः लक्षणञ्चेत्थं प्रतिपादितं दृश्यते-

| | | |
|---|---|---|
| प्रमाणिका | जरौ | लगौ |
| ।ऽ। | ऽ।ऽ | । ऽ |
| जगणः | रगणः | लः गः |

उदाहरणं यथा-

**वसन्ति वृक्षकोटरे खगा विधाय नीडकम् ।**
**ददाति भोजनं क्षितिः कुतो धनस्य सङ्ग्रहः ? ॥**

| | |
|---|---|
| वसन्ति वृक्षकोटरे | खगा विधाय नीडकम् । |
| ।ऽ। ऽ।ऽ । ऽ | ।ऽ। ऽ।ऽ । ऽ |
| जगणः रगणः लः गः, | जगणः रगणः लः गः, |
| ददाति भोजनं क्षितिः | कुतो धनस्य सङ्ग्रहः ? ॥ |
| ।ऽ। ऽ।ऽ । ऽ | ।ऽ। ऽ।ऽ । ऽ |
| जगणः रगणः लः गः, | जगणः रगणः लः गः, |

अत्रोदाहरणे प्रतिपादमष्टौ वर्णाः सन्ति । लक्षणानुसारेण जगणरगणौ लघगुरू च यथास्थानं स्थापितानि विद्यन्त इति प्रमाणिकाया लक्षणस्य समन्वयो जातः ।

उदाहरणान्तरं यथा-

**पुनातु भक्तिरच्युता सदाऽच्युताङ्घ्रिपद्मयोः ।**
**श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ॥**

## इन्द्रवज्रा

यस्मिन् वृत्ते प्रत्येकं पादेषु द्वौ तगणौ एको जगणो द्वौ गुरू च भवन्ति तत्र इन्द्रवज्रानाम वृत्तम् । एतस्मिन् वृत्ते एकादशाक्षराणि भवन्ति । तल्लक्षणं यथा-

| | | | | |
|---|---|---|---|---|
| स्यादिन्द्रवज्रा | यदि | तौ | जगौ | गः । |
| ऽऽ। | ऽऽ। | ।ऽ। | ऽ | ऽ |
| तः | तः | जः | गः | गः |

उदाहरणं यथा-

**सर्वात्मभावेन समाचरन्तं गोपालकं गोपकुलावतंसम् ।**
**देवेन्द्र ! नित्यं त्रिदिवाधिपस्य गर्वेण मत्तो नहि वेत्सि देवम् ॥**

अत्र गणा यथा-

| | |
|---|---|
| सर्वात्मभावेन | समाचरन्तम् |
| ऽऽ। ऽऽ। | ।ऽ। ऽ ऽ |
| तः तः | जः गः गः |

अत्र पद्यस्य प्रथमे पादे लक्षणनुसारेण गणानां मेलनं दृश्यते । एवमेवान्येष्वपि पादेषु क्रमेण ततजगणा द्वौ गुरुवर्णौ च समन्विताः सन्ति । अतोऽत्र इन्द्रवज्रावृत्तस्य लक्षणसमन्वयो भवति ।

उदाहरणान्तरं यथा-

**गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ ।**
**यो गोकुलं गोपकुलञ्च सुस्थं चक्रे स नो रक्षतु चक्रपाणिः ॥**

अत्रापि पूर्वत्र पद्ये इव गणा इन्द्रवज्रानुकूलाः प्राप्यन्ते इति लक्षणसमन्वयो जातः ।

अन्यदुदाहरणं यथा-

**मर्यादया सञ्चरते दिनेशो मर्यादया तिष्ठति वारिराशिः ।**
**मर्यादया भूर्वहते च लोकं मर्यादया नास्ति किमप्यलभ्यम् ॥**

### उपेन्द्रवज्रा

यस्मिन् श्लोके प्रत्येकं पादेषु जगणतगणजगणास्ततो द्वौ गुरू च भवन्ति तत्रोपेन्द्रवज्रानामकं वृत्तम् । अस्मिन् वृत्तेऽपि इन्द्रवज्रावृत्त इव एकादश वर्णा भवन्ति । एतद् वृत्तमिन्द्रवज्रावृत्ते प्रथममक्षरं लघु निर्माय व्यवस्थापितं दृश्यते । अत्रान्यत् सर्वं समानं वर्तते । तल्लक्षणं यथा-

| | | | |
|---|---|---|---|
| उपेन्द्र | वज्रा | जतजास्ततो | गौ |
| ।ऽ। | ऽऽ। | ।ऽ। | ऽ ऽ |
| जः | तः | जः | गः गः |

सा इन्द्रवज्रा यदि प्रथमे लघुवर्णयुक्ता तदोपेन्द्रवज्रावृत्तं भवति, इत्यर्थः । उदाहरणं यथा-

**अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।**
**न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ॥**

अत्र पद्ये गणव्यवस्था यथा-

| | | | |
|---|---|---|---|
| अलं | महीपाल | तव | श्रमेण |
| ।ऽ। | ऽऽ। | ।ऽ। | ऽ ऽ |
| जः | तः | जः | गः गः |

उपेन्द्रवज्राच्छन्दसो लक्षणानुसारेणाऽत्र गणा अक्षराणि च सर्वाणि सुष्ठु मिलन्तीति तल्लक्षणसमन्वयो भवति ।

उदाहरणान्तरं यथा-

**त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।**
**त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ! ॥**

## उपजातिः

सम्प्रति पूर्वमत्रेन्द्रवज्रोपेन्द्रवज्रानामके द्वे वृत्ते सलक्षणं सोदाहरणञ्च प्रदर्शिते । त एव यत्र मिश्रिते भवतस्तद् वृत्तमुपजातिरिति कथ्यते । मिश्रणे चैतयोर्द्वयोर्मध्ये कस्यचनैकस्य वृत्तस्य लक्षणानुसारेण एको द्वौ त्रयो वा पादा यथायोगं भवितुं शक्नुवन्ति । तल्लक्षणं यथा-

**अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।**
**इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥**

गणव्यवस्था-

| | | |
|---|---|---|
| अनन्तरोदीरितलक्ष्मभाजौ | पादौ | यदीयावुपजातयस्ताः । |
| ISI SSI ISI S S | SSI | SSI ISI S S |
| जः तः जः गः गः | तः | तः जः गः गः |

अनन्तरमितःपूर्वं ये छन्दसीन्द्रवज्रोपेन्द्रवज्राख्ये सलक्षणं सोदाहरणञ्चोक्ते तयोर्लक्षणेन युक्तौ पादौ यत्र पद्ये भवतस्तत्रोपजातिवृत्तमित्यर्थः ।

उदाहरणं यथा-

**रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्त्वम्**
**न कारणात् स्वाद् विभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥**

अत्र पद्ये गणव्यवस्था यथा-

| | |
|---|---|
| रूपं तदोजस्वि तदेव वीर्यं | तदेव नैसर्गिकमुन्नतत्त्वम् |
| SSI SSI ISI S S | ISI SSI ISI S S |
| तः तः जः गः गः जः | तः जः गः गः |

| | |
|---|---|
| न कारणात् स्वाद् | विभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥ |
| ISI SSI ISI S S | ISI SSI ISI S S |

तः तः जः गः गः    तः जः गः गः

जः

जः    तः जः गः    तः जः गः गः

गः जः

अस्मिन्नुदाहरणे प्रथमः पाद इन्द्रवज्रावृत्तानुकूलः, शेषेषु पादेषूपेन्द्रवज्राच्छन्दसः सङ्गतिरिति द्वयोर्मिश्रणेन प्रयोगादुपजतिवृत्तस्यात्र लक्षणसमन्वयो भवति ।

उदाहरणान्तरं यथा-

**स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।**
**जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥ इति ।**

# अभ्यासः

## १. निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) अनुष्टब्वृत्तस्य लक्षणं किम् ?

(ख) अनुष्टुब्वृत्ते एकस्मिन् पादे कति वर्णा भवन्ति ?

(ग) आर्याच्छन्दो वर्णगणनाधीनं मात्रागणनाधीनं वा ?

(घ) आर्याया लक्षणं किम् ?

(ङ) 'जरौ लगौ' इति कस्य वृत्तस्य लक्षणम् ?

(च) इन्द्रवज्रावृत्तस्य लक्षणं किम् ?

(छ) इन्द्रवज्रोपेन्द्रवज्रयोः परस्परं को भेदः ?

(ज) कयोर्वृत्तयोर्मिश्रणे उपजातिवृत्तं भवति ?

(झ) अन्यत्रापि मिश्रितच्छन्दसां प्रयोगे किं नाम वृत्तं भवति ?

## २. परस्परं मेलयत

| | |
|---|---|
| मिश्रितच्छन्दोनाम | तौ जगौ गः |
| प्रमाणिका | त्वमेव माता च पिता त्वमेव |
| उपेन्द्रवज्रा | उपजातिः |
| इन्द्रवज्रा | जरौ लगौ |

## ३. निम्नाङ्कितश्लोके किं छन्दः ?

श्लोकेषु नियतस्थाने पदच्छेदं यतिं विदुः ।
तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा ॥

## ४. अधोलिखितपद्ये कस्य वृत्तस्य प्रयोगो वर्तते ? तस्य लक्षणं विलिख्य समन्वयं प्रदर्शयत ।

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥

## ५. कमपि भावं विषयं वावलम्ब्योपजातिच्छन्दसि पद्यमेकं रचयत ।

**एकविंशः पाठः**

# इन्दिरादिद्रुतविलम्बितान्तानां वृत्तानां निरूपणम्

## इन्दिरा

यस्मिन् वृत्ते नगणो द्वौ रगणौ एको लघुरेको गुरुवर्णश्च भवन्ति तद् वृत्तमिन्दिरा कथ्यते। इदं वृत्तमेकादशाक्षरयुक्तं वर्तते। तल्लक्षणमुक्तं छन्दोमञ्जर्याम्-

**नररलैर्गुराविन्दिरा मता।**

गणव्यवस्था यथा-

| | |
|---|---|
| नररलैर्गुराविन्दिरा | मता। |
| ||| ऽ|ऽ ऽ|ऽ | । ऽ |
| नः रः रः | लः गः |

उदाहरणं यथा- **मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण !।**

**विधिकरीरिमा वीर ! मुह्यतीरधरसीधुनाऽऽप्यायस्व नः॥**

अत्र गणसङ्गमनं यथा-

| | | |
|---|---|---|
| मधुरया | गिरा | वल्गुवाक्यया |
| ||| | ऽ|ऽ | । ऽ |
| नः | रः | रः लः गः |

एवमन्येष्वपि पादेषु घटते। अतोऽत्र पद्ये इन्दिराच्छन्दसः समन्वयो भवति।

## वंशस्थम्

वंशस्थवृत्ते जगणस्तगणो जगणो रगणश्चेति क्रमेण चत्वारो गणा भवन्ति। एवं वृत्तेऽस्मिन् प्रतिपादं द्वादशाक्षराणि भवन्ति। एतदेव वृत्तं वंशस्थविलमित्यपि नाम्ना गृह्यते। तल्लक्षणं यथा-

**जतौ तु वंशस्थमुदीरितं जरौ।**

गणव्यवस्था-

| | | | |
|---|---|---|---|
| |ऽ| | ऽऽ| | |ऽ| | ऽ|ऽ |
| जः | तः | जः | रः |

उदाहरणं यथा- **गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम् ।**
**उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ॥ इति ।**

अत्र पद्ये गणसङ्गतिर्यथा-

**गजाननं भूतगणादिसेवितम्**

| ISI | SSI | ISI | SIS |
|---|---|---|---|
| जः | तः | जः | रः |

एवमन्यत्रापि पादेषु योजयितुं शक्यते । अस्मिन् वंशस्थवृत्तस्य लक्षणानुसारेण गणसमन्वयः सम्यग् घटते इति तल्लक्षणस्यात्र समन्वयो भवति ।

अन्यदुदाहरणं यथा- **पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतमङ्गलैः ।**
**अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥**

अत्रापि पद्ये वंशस्थवृत्तस्य गणसमन्वयो जायते । पूर्ववत् तत्प्रदर्शयितुं शक्यते ।

## भुजङ्गप्रयातम्

यस्मिन् वृत्ते प्रतिचरणं चत्वारो यगणा भवन्ति तद् वृत्तं भुजङ्गप्रयातमिति नाम्ना प्रसिद्धमस्ति । अस्मिन् वृत्तेऽपि द्वादशाक्षराणि भवन्ति । तल्लक्षणमुक्तं छन्दोमञ्जर्याम्-

**भुजङ्गप्रयातं चतुर्भिर्यकारैः**

गणव्यवस्था-

| ISS | ISS | ISS | ISS |
|---|---|---|---|
| यः | यः | यः | यः |

उदाहरणं यथा- **गताः कानने क्रीडितुं शैलबालाः किराताः पुनस्तत्र याता भ्रमन्तः ।**
**ततस्तान् विलोक्यैव ता नम्रवक्त्राः सुरक्तानना लोलनेत्रा बभूवुः ॥ इति ।**

अत्रैकस्मिन् पादे गणव्यवस्था यथा-

| **गताः** | **कानने** | **क्रीडितुं** | **शैलबालाः** |
|---|---|---|---|
| ISS | ISS | ISS | ISS |
| यः | यः | यः | यः |

एवमन्येष्वपि पादेषु गणा यथापूर्वं मिलन्ति । अतश्चात्र भुजङ्गप्रयातवृत्तस्य लक्षणसमन्वयो भवति ।

## तोटकम्

यस्मिन् वृत्ते प्रतिपादं चत्वारः सगणा भवन्ति तद् वृत्तं तोटकनाम्ना गृह्यते । अत्रापि भुजङ्गप्रयातवृत्ते इव प्रतिपादं द्वादशाक्षराणि भवन्ति । तल्लक्षणं छन्दोमञ्जर्यामुक्तम्-

**वद तोटकमब्धिसकारयुतम् ।**

| | | | |
|---|---|---|---|
| IIS | IIS | IIS | IIS |
| सः | सः | सः | सः |

उदाहरणं यथा-

**मणिना वलयं वलयेन मणिर्मणिना वलयेन विभाति करः ।**
**शशिना च निशा निशया च शशी शशिना निशया च विभाति नभः ॥**

अत्र पद्ये गणव्यवस्था यथा-

**मणिना वलयं वलयेन मणिः**

| | | | |
|---|---|---|---|
| IIS | IIS | IIS | IIS |
| सः | सः | सः | सः |

एवेमवान्यत्रापि पादेषु एते एव गणाः प्राप्यन्ते इति तोटकवृत्तस्यात्र लक्षणसमन्वयो भवति ।

उदाहरणान्तरं यथा-

**यमुनातटमच्युतकेलिकलालसदङ्घ्रिसरोरुहसङ्गरुचिम् ।**
**मुदितोऽट कलेरपनेतुमलं यदि चेच्छसि जन्म निजं सफलम् ॥**

## स्रग्विणी

यस्मिन् वृत्ते प्रतिपादं चत्वारो रगणा भवन्ति तत् स्रग्विणीनामकं वृत्तमिति कथयन्ति छन्दोविदः । एतस्मिन्नपि वृत्ते चत्वारि चरणानि द्वादशैरक्षरैर्युक्तानि भवन्ति । तल्लक्षणमुक्तं छन्दोमञ्जर्याम्-

**कीर्तितैषा चतूरेफिका स्रग्विणी ।**

| | | | |
|---|---|---|---|
| SIS | SIS | SIS | SIS |
| रः | रः | रः | रः |

उदाहरणं यथा-

**अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।**
**श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे ॥**

अत्र पद्ये गणा यथा-

**अच्युतं केशवं रामनारायणम्**

ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

रः रः रः रः

एवमन्यत्रापि पादेषु गणाः सन्ति समानाः । अतश्चात्र स्रग्विणीवृत्तस्य लक्षणसमन्वयो भवति ।

अन्यदुदाहरणं यथा-

**राधिका नागता क्रीडने नो मनः कारणं किं भवेदित्यसौ शोचति ।**
**खिन्नचित्तः पुनर्देवकीनन्दनो यामुनं तीरमालम्बते कौतुकी ॥**

## द्रुतविलम्बितम्

यस्मिन् वृत्ते आदौ नगणस्तदुत्तरं द्वौ भगणौ ततो रगणश्च भवन्ति तद् द्रुतविलम्बितं नाम वृत्तम् ।

अस्मिन् वृत्तेऽपि प्रतिपादं द्वादशाक्षराणि भवन्ति । तल्लक्षणं यथा छन्दोमञ्जर्याम्-

**द्रुतविलम्बितमाह नभौ भरौ**

।।। ऽ।। ऽ।। ऽ।ऽ

नः भः भः रः

उदाहरणं यथा-

**शरदि दिग्विजयैः प्रथितप्रथो मृगयया च मधौ बलवत्तनुः ।**
**विहितयज्ञशतः स घनागमे सुजनता जनतापहराऽभवत् ॥**

(नहुषचरितवर्णने पद्यमिदमायाति यदुवंशमहाकाव्ये)

अत्र पद्ये गणव्यवस्था यथा-

**शरदि दिग्विजयैः प्रथितप्रथः**

।।। ऽ।। ऽ।। ऽ।ऽ

नः भः भः रः

एवमन्त्र पादेष्वपि नभभराख्याश्चत्वारो गणा प्राप्यन्ते इति द्रुतविलम्बितच्छन्दसो लक्षणस्यात्र सङ्गतिर्जायते ।

# अभ्यासः

## १. निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) इन्दिरावृत्तस्य लक्षणं किम् ?

(ख) जतजराः कस्य वृत्तस्य गणाः ?

(ग) कस्मिन् वृत्ते चत्वारो यगणा भवन्ति ?

(घ) 'मणिना वलयं वलयेन मणिः' इत्यत्र किं वृत्तम् ?

(ङ) स्रग्विणीवृत्तस्य लक्षणं लिखत ।

(च) द्रुतविलम्बितवृत्तस्योदाहरणं पाठान्तरादन्विष्य प्रदर्शयत ।

## २. सत्यासत्यं निरूपयत

(क) इन्दिरावृत्ते चत्वारः सगणा भवन्ति ।

(ख) 'गजाननं भूतगणादिसेवितम्' इत्यत्र वंशस्थवृत्तं वर्तते ।

(ग) भुजङ्गप्रयातवृत्ते त्रयो यगणा भवन्ति ।

(घ) तोटकवृत्ते प्रतिपादं चत्वारः सगणा भवन्ति ।

(ङ) द्रुतविलम्बितवृत्ते प्रतिपादमेकादशाक्षराणि भवन्ति ।

३. क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥

**इत्यत्र वृत्तलक्षणं सङ्गमयत ।**

## ४. अधस्तनपद्ये किं वृत्तम्, तस्य लक्षणसमन्वयं प्रदर्शयत

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनो भरैः ॥

द्वाविंशः पाठः

# सभेदमलङ्कारस्वरूपादिज्ञानमनुप्रासयमकनिरूपणञ्च

## अलङ्कारस्वरूपम्

अलङ्करोति भूषयति काव्यमित्यलङ्कारः, अलङ्क्रियतेऽनेन काव्यमिति वाऽलङ्कारः । उक्तया व्युत्पत्त्या अलङ्कारपदेन काव्यशोभासम्पादकाश्चमत्कारजनकशब्दार्थसन्निवेशविशेषा यमकोपमादयो बुध्यन्ते । यथा शरीरे कटककुण्डलादीनि भूषणानि शरीरस्य सौन्दर्यं वर्धयन्ति तथैवोपमानुप्रासादयोऽलङ्कारा अपि शब्दार्थशरीरस्य काव्यस्य शोभां वर्धयन्ति ।

शब्दार्थौ काव्यस्य शरीररूपौ भवतः । तत्र रसादयश्चात्मरूपाः स्वीकृताः सन्ति । शरीरस्याङ्गेषु निहितानि भूषणानि शरीरस्य शोभां वर्धयन्ति । कटककुण्डलनूपुरादीनि शरीरस्य यस्मिन् अङ्गे धार्यन्ते तानि प्रथमं तदेवाङ्गं भूषयन्ति । परम्परया च शरीरस्थं जीवात्मानमुपकुर्वन्ति । तेनैव प्रकारेण अलङ्कारा अपि काव्यस्य शरीरे शब्दविशेषस्यार्थविशेषस्य च माध्यमेन शोभां वर्धयित्वा रसादिरूपस्यात्मन उपकारं कुर्वन्ति । अतोऽलङ्काराः काव्यस्य अस्थिरतत्त्वानि, रसादिश्च स्थायी । अलङ्कारलक्षणं कुर्वंश्चन्द्रालोककारो जयदेवः कथयति-

**शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा ।**
**हारादिवदलङ्कारः सन्निवेशो मनोहरः ॥**

## अर्थः

कवेः प्रसिद्ध्या कल्पनाप्रौढ्या वा शब्दार्थयोर्मनोहरश्चमत्कारजनकः सन्निवेशो विन्यासो वा हारादिवद् अलङ्कारो भवति । अन्यच्च-

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥ इति ।**

शब्दार्थयोः शोभावर्धकाः काव्यस्य चास्थिरा धर्मा मानवशरीरे हारादय इव काव्येऽलङ्कारा भवन्ति इत्यर्थः ।

## अलङ्कारविभागः

काव्यस्य सौन्दर्यवर्धका अलङ्काराः सामान्येन द्विप्रकारका भवन्ति- शब्दालङ्काराः अर्थालङ्काराश्च । तयोर्भेदयोः परिचयोऽधः प्रस्तूयते ।

शब्दमाश्रित्य स्थिता अलङ्काराः शब्दालङ्कारा भवन्ति । शब्दस्य प्रधानता शब्दालङ्कारेषु दृश्यते । ते शब्दपरिवर्तनं नैव सहन्ते । अर्थात् समानार्थकानां पर्यायवाचिनां वा शब्दानां परिवर्तने येषामलङ्कारता न भवति ते शब्दालङ्काराः कथ्यन्ते । अतश्च शब्दपरिवृत्त्यसहत्वं शब्दालङ्काराणां मुख्यं वैशिष्ट्यम् ।

अर्थालङ्काराश्च शब्दस्यार्थमाश्रित्य तिष्ठन्ति । तत्र शब्दस्य नहि शब्दानामर्थस्य प्रधानता भवति । ते शब्दपरिवर्तनं सहन्ते । तत्र समानार्थकानां पर्यायवाचिनां वा शब्दानां परिवर्तनेऽपि तेषामलङ्कारता न त्रुट्यति । अतश्च शब्दपरिवृत्तिसहत्वमर्थालङ्काराणां मुख्या विशेषता वर्तते ।

## शब्दालङ्काराः

शब्दप्रधानभूतेषु शब्दालङ्कारेषु विषयेऽस्मिन् द्वौ शब्दालङ्कारौ अनुप्रासयमकाख्यौ पाठ्यत्वेन निर्धारितौ स्तः । अतस्तयोर्लक्षणमुदाहरणञ्च प्रदर्श्यते ।

## अनुप्रासः

शब्दसाम्यमनुप्रासालङ्कारस्य लक्षणम् । शब्दे समानता यत्र भवति तत्रानुप्रासोऽलङ्कार इत्यर्थः । स्वरवर्णस्य वैषम्येऽपि (सादृश्याभावेऽपि) यत्र व्यञ्जनवर्णानां समानता दृश्यते तत्रानुप्रासनामकोऽलङ्कारो भवति । तस्य लक्षणं यथा-

**अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।**

अर्थात् समानानां व्यञ्जनवर्णानां वारं वारमावृत्तिर्यत्र प्राप्यते तत्रानुप्रासोऽलङ्कारः । अनुप्रासस्यापि छेकवृत्तिलाटादयो भेदाः सन्ति । तत्र सामान्येन पद्यमेकमुदाहरणरूपेण दीयते । यथा-

**लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्**
**समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।**
**मरुन्मन्दं मन्दं दलितमरविन्दं चपलयन्**
**रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥**

अत्र पद्ये कुञ्ज-गुञ्ज-पुञ्जानामनङ्ग-अङ्गयोर्मन्द-अरविन्दयोर्वृन्द-विन्दयोश्च समानानां व्यञ्जनवर्णानां वारं वारमावृत्तिः प्राप्यते । एतेन च मनोहरशब्दविन्यासेन शृङ्गारो रस आस्वाद्यमानः सम्पादित इति अनुप्रासस्यात्र सङ्गतिर्जाता ।

उदाहरणान्तरं यथा-

**अग्रे वह्निः पृष्ठे भानू रात्रौ चिबुकसमर्पितजानुः ।**

**करतलभिक्षा तरुतलवासस्तदपि न मुञ्चत्याशापाशः ॥**

अत्रापि भानु-जानु-वास-पाशशब्दानां परस्परं वर्णसाम्यं वर्तते इति अनुप्रासस्य लक्षणसमन्वयो भवति ।

## यमकम्

यत्र समानेनैव क्रमेण शब्दानामावृत्तिर्जायते तत्र यमकालङ्कारो भवति । यमके हि समानवर्णविन्यासयुक्तयोरपि शब्दयोर्भिन्नार्थकत्वेन प्रयोगान्न पुनरुक्तार्थता जायते । पूर्वपश्चाद्भावेन वर्णानां पुनःप्रयोगे दमो मोदः, इत्यादौ न यमकम् । आवृत्तानाञ्च शब्दानां क्वचित् कस्यचन सार्थकता कुत्रचिच्च द्वयोरपि निरर्थकता चेत्यादिकी स्थितिः सम्भवति । अस्यापि पादमध्यपादान्ताद्यनेके भेदाश्काव्यःशास्त्रेषु प्राप्यन्ते । यमकस्य लक्षणं यथा साहित्यदर्पणे -

**सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।**

**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥**

अर्थे विद्यमाने सति पृथक् पृथगर्थयुक्तस्य स्वरव्यञ्जनसमूहस्य पूर्वस्थितेन क्रमेणैवावृत्तिर्यत्र भवति तत्र यमकालङ्कार इत्यर्थः । अर्थे सति इति कथनात् आवृत्तानां पदानाञ्च क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वम्, क्वचिदेकस्य सार्थकत्वमन्यस्य निरर्थकत्वमित्याद्यवस्था जायते इति बोध्यम् ।

चन्द्रालोके च तल्लक्षणं यथा-

**आवृत्तवर्णस्तवकं स्तवकन्दाङ्कुरं कवेः ।**

**यमकं प्रथमाधुर्यमाधुर्यवचसो विदुः ॥**

उदाहरणमपि पद्येऽस्मिन्नेव वर्तते । प्रथमार्धे स्तवक-स्तवक इत्यत्र, उत्तरार्धे च माधुर्य-माधुर्य इत्यत्र । पूर्वत्र प्रथमस्य स्तवकशब्दस्य सार्थकता परत्र च द्वितीयस्य माधुर्यस्य सार्थकता विद्यते ।

उदाहरणं यथा-

**वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।**

**कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥**

अत्र पूर्वार्धे 'गजौ-गजौ' इत्यत्र उत्तरार्धे च 'यमौ-यमौ' इत्यत्र समानक्रमेण पदयोर्वर्णावृत्तिर्वर्तते इति यमकलक्षणस्य समन्वयो भवति । उदाहरणान्तरं यथा-

**चिरमवर्द्धत भूरिपराक्रमो वपुरपुष्यदमुष्य च तानवम् ।**
**गुणवतीव वधूर्मृगयाऽभवद्विहरतो हरतोषककर्मणः ॥ इति ।**

अत्र पद्ये चतुर्थपादे 'विहरतो-हरतो' इत्यत्र 'हरतो' इत्यस्यावृत्तिः समानेन क्रमेण विहितास्ति, द्वयोरपि पदयोरत्र निरर्थकता वर्तते इति यमकस्य लक्षणसङ्गतिः ।

## अभ्यासः

### १. निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) अलङ्कारस्य सामान्यं स्वरूपं किम् ?

(ख) जयदेवेन प्रतिपादितमलङ्कारलक्षणं किमस्ति ?

(ग) अलङ्कारस्य सामान्यतः कति भेदाः सन्ति ?

(घ) शब्दालङ्कारस्य मुख्यं वैशिष्ट्यं किमस्ति ?

(ङ) अर्थालङ्कारस्य मुख्यं वैशिष्ट्यं किमस्ति ?

(च) अनुप्रासालङ्कारस्य लक्षणं किम् ?

(छ) यमकालङ्कारस्य स्वरूपं किमस्ति ?

(ज) यमकलक्षणे 'सत्यर्थे पृथगर्थायाः' इति कथनस्य तात्पर्यं किमस्ति ?

(झ) चन्दनं खलु गोविन्दचरणद्वन्द्ववन्दनम्, इत्यत्र कोऽलङ्कारः ?

### २. अधस्तनपद्ये पठित्वा तत्रत्यमलङ्कारं लक्षणे सङ्गमयत

(क) अग्रे वह्निः पृष्ठे भानू रात्रौ चीबुकसमर्पितजानुः ।
करतलभिक्षा तरुतलवासस्तदपि न मुञ्चत्याशापाशः ॥

(ख) न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि ॥

### ३. कुतश्चन काव्याद् अनुप्रासस्य यमकस्य चालङ्कारस्य प्रयोगयुक्तानि पद्यानि अन्विष्य तयोर्लक्ष्ये लक्षणस्य समन्वयं प्रदर्शयत ।

# उपमादि-स्वभावोक्त्यन्तानामलङ्काराणां निरूपणम्

### अर्थालङ्कारेषूपमादेर्निरूपणम्

अर्थमात्रस्य चमत्कारपूर्णेन विन्यासेन काव्ये या शोभा समायाति तत्रार्थालङ्कारा भवन्ति । शब्दपरिवृत्तिसहत्वं तेषां मुख्यं वैशिष्ट्यमिति पूर्वं प्रतिपादितमेव । सम्प्रति तादृशानामलङ्काराणां सोदाहरणं निरूपणस्य क्रमो वर्तते । अर्थालङ्कारेषु पाठ्यक्रमेऽस्मिन् स्वभावोक्त्यलङ्कारः प्रथमं स्थापितोऽस्ति । अलङ्कारनिरूपकेषु ग्रन्थेषु तु सर्वेषां सादृश्यमूलानामलङ्काराणां बीजभूत उपमालङ्कारः प्रथमं पाठ्यते । अतश्चात्र प्रथमं तस्य एव लक्षणमुदाहरणञ्च प्रस्तुत्य समन्वयः प्रदर्श्यते ।

### उपमा

यस्मिन् काव्ये उपमानोपमेययोः सादृश्यशोभा प्रकाशते, तत्रोपमालङ्कारः । उपमालङ्कारस्य प्रयोगे सामान्यतश्चत्वारि तत्त्वान्यावश्यकानि भवन्ति । तानि उपमेयम् उपमानं साधारणो धर्म उपमावाचकपदञ्चेति । येन वस्तुना व्यक्तिविशेषेण वा कस्यचन प्रकृतस्य वर्णनीयस्य तुलनया सादृश्यं प्रकाश्यते तदुपमानम् । यस्य तुलनान्येन सह क्रियते तदुपमेयम् । उभयोरपि विद्यमानं समानगुणरूपादिकं यद् भवति तत् साधारणो धर्मः । इव यथा सदृशमित्यादयः शब्दास्तद्वाचका भवन्ति । उपमापि द्विविधा- पूर्णा लुप्ता च । उपमानोपमेयादीनां चतुर्णां तत्त्वानां सद्भावे पूर्णोपमालङ्कारः । एतेष्वेकस्य द्वयोस्त्रयाणां वाऽसद्भावे लुप्तोपमा भवति । उपमाया लक्षणं यथा चन्द्रालोके-

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।**
**हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव ॥**

### अर्थः

यत्र काव्ये हृदये खेलतोस्तन्वङ्गीस्तनयोरिव द्वयोः उपमानोपमेययोः सादृश्यस्य शोभा प्रकाशते तत्रोपमालङ्कारः । उदाहरणमप्यत्रैव पद्ये वर्तते । अत्र पद्ये 'द्वयोः' इति उपमेयम्, 'तन्वङ्गीस्तनयोः' इति उपमानम्, 'सादृश्यलक्ष्मीः' इति साधारणो धर्मः, 'इव' इति वाचकपदं च सन्ति । एतेषां चतुर्णां तत्त्वानां स्पष्टतयोल्लेखादत्र पूर्णोपमालङ्कारस्य समन्वयो भवति । उदाहरणान्तरं यथा-

**हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते ।**

अत्र कृष्णस्य कीर्तेर्वर्णनीयत्वात् कीर्तिः उपमेयं हंसी उपमानं स्वर्गङ्गावगाहनं साधारणो धर्मः इव वाचकपदमिति पूर्णोपमालङ्कारस्य समन्वयः ।

अन्यदुदाहरणं यथा- **वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥**

अन्यच्च- **स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।**
**जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥**

### रूपकम्

यत्रोपमेये उपमानस्यारोपः क्रियते तत्र रूपकालङ्कारो भवति । अत्रोपमायामिव द्वयोस्तुलना नहि भवति किन्तु द्वयोरुपमानोपमेययोरभेदारोपः क्रियते । अतश्च तल्लक्षणेऽभेदस्य शब्दत उल्लेख कृतोऽस्ति । यथा-

**तद्रूपकमभेदो य उपमानोपमेययोः ।**

अस्मिन्नलङ्कारे उपमानेन सह उपमेयस्य भिन्नता नास्तीति प्रतिपाद्यते । चन्द्रलोके च तल्लक्षणं पृथक् प्रस्तुतमस्ति- **यत्रोपमानचित्रेण सर्वथाऽप्युपरज्यते ।**
**उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥**

### अर्थः

यत्रोपमानरूपेण चित्रेण उपमेयरूपा भित्तिः उपरक्ता भवति तत्र रूपकालङ्कारः । उदाहरणमप्यत्रैव श्लोके वर्तते । यतो ह्यत्र उपमाने चित्रस्यारोपः उपमेये भित्तेरारोपश्चेति उभयत्र रूपकं सङ्गच्छते । उदाहरणान्तरं यथा- **मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः ।**
**विराजते व्योमसरःसरोजं कर्पूरपूरप्रभमिन्दुविम्बम् ॥**

अत्र पद्ये मनोजे (कामदेवे) राज्ञ आरोपो हरित्सु (दिशासु) अङ्गनाया आरोपो व्योम्नि सरस आरोपश्च कृतोऽस्ति । एतेषामारोपश्च चन्द्रविम्बे सितातपत्रस्य श्रीखण्डचित्रस्य सरोजस्य चारोपेऽङ्गभूतमिति साङ्गरूपकालङ्कारस्य समन्वयो भवति ।

### उत्प्रेक्षा

यत्र प्रकृतस्य (वर्णनीयस्य) उपमेयस्य अप्रकृतेन (अवर्णनीयेन) उपमानेन सम्भावना क्रियते तत्रोत्प्रेक्षालङ्कारो भवति । तल्लक्षणं यथा- **सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्**

अर्थादुत्प्रेक्षालङ्कारे उपमेये सामान्येन वर्णनीये वस्तुनि उपमानस्य उत्कृष्टकोटिकस्य वस्तुनः सम्भावना क्रियते इति बोध्यम् । अस्मिन्नलङ्कारे मन्ये शङ्के ध्रुवं प्रायः नूनम् इव इत्यादयो वाचकशब्दाः प्रयुज्यन्ते । उक्तञ्च-

**मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।**
**उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥**
**उत्प्रेक्षालङ्कारस्य लक्षणं यथा चन्द्रालोके-**
**उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना**

**अर्थः**

यत्र निह्नुतिं निषेधं गोपनं वा विना हेत्वादिः- हेतुः फलं स्वरूपं वा, उन्नीयते- उत्कटकोटिकसन्देहस्य विषयीक्रियते तत्रोत्प्रेक्षालङ्कारः । उदाहरणं तत्रैव- **त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी ।**

सूर्योदये पद्मानां विकासो भवति परं चन्द्रोदये तेषां सङ्कोचो जायते । अत्र कविना तु शशिपद्मयोः स्वाभाविके प्राकृते वा विरोधे दृष्टेऽपि चन्द्रस्तव मुखशोभाप्राप्तये कमलैः सह वैरं करोति किमिति सम्भावना कृतास्ति । कमलैः सह चन्द्रस्तव मुखस्य शोभां प्राप्तुं वैरं करोति किम् इति कल्पयित्वा कान्तामुखशोभालब्धिरूपो हेतुरत्रोत्प्रेक्षितः । नूनम् इति चोत्प्रेक्षालङ्कारस्य वाचकपदमत्र प्रयुक्तमस्ति । अतश्चात्रोत्प्रेक्षालङ्कारस्य सङ्गतिर्जायते । उदाहरणान्तरं यथा- **प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ।**

अत्र अब्जस्य (कमलस्य) सदैव जले वासः प्राकृतिकोऽस्ति । तत्र कस्या अपि सुन्दर्याः प्रशंसां कर्तुं प्रवृत्तेन कविना तस्याश्चरणयोः सादृश्यरूपमैक्यं प्राप्तुं जलाधिवसनरूपं तपः कमलं करोति किमु इत्युप्रेक्षितं वर्तते इति लक्षणस्य समन्वयः ।

**स्वभावोक्तिः**

यत्र हरिणादिपशूनां निश्छलानां बालकादीनां वा स्वभावस्य वर्णनं क्रियते तत्र स्वभावोक्तिरलङ्कारो भवति । तल्लक्षणं यथा- **स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम् ।**

**अर्थः**

जात्यादिषु हरिणत्वादिषु विद्यमानस्य स्वभावस्य क्रियारूपादेर्यद् यथातथ्यं वर्णनं तत् स्वभावोक्तिः ।

काव्यदीपिकायामस्यालङ्कारस्य लक्षणं यथा- **स्वभावोक्तिरसौ चारु यथावद् वस्तुवर्णनम् ।**

**अर्थः**

यत्र कस्यचन वस्तुस्वभावस्य चारुतया यथावद् वर्णनं क्रियते तत्र स्वभावोक्तिरलङ्कारः । उदाहरणं यथा-

**कुरङ्गैरुत्तरङ्गाक्षि ! स्तब्धकर्णैरुदीक्ष्यते ।**

हे उत्तरङ्गाक्षि ! चञ्चलनेत्रे ! स्तब्धकर्णैः- निश्चलकर्णैः कुरङ्गैर्मृगैः उदीक्ष्यते- उपरि विलोक्यते इत्यस्यार्थः । अत्र कर्णौ निश्चलौ विधाय चञ्चलनयनैरुपरि विलोकनरूपस्य मृगजातेः स्वभावस्य वर्णनं वर्तत इति स्वभावोक्त्यलङ्कारस्य लक्षणसमन्वयः । उदाहरणान्तरं यथा-

**तुषारसङ्घातशिलाः खुराग्रैः समुल्लिखन् दर्पकलः ककुद्मान् ।**
**दृष्टः कथञ्चिद् गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद ॥**

अत्र कस्यचन दर्पान्वितस्य तरुणवृषभस्य खुराग्रैस्तुषारशिलास्फोटनस्य सिंहध्वनिसदृशंगर्जनस्य च तज्जातिस्वभावस्य वर्णनं कविना कृतमिति स्वभावोक्त्यलङ्कारस्य लक्षणसङ्गतिः ।

## अभ्यासः

१. **निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) उपमाया लक्षणं किम् ?

(ख) पूर्णोपमालङ्कारे कानि तत्त्वानि प्रयुज्यन्ते ?

(ग) रूपकालङ्कारस्य मुख्यं वैशिष्ट्यं किम् अस्ति ?

(घ) उपमारूपकयोः परस्परं कः भेदः ?

(ङ) उत्प्रेक्षालङ्कारे केषाम् उत्कटकोटिका सम्भावना क्रियते ?

(च) उत्प्रेक्षालङ्कारस्य वाचकाः शब्दाः के सन्ति ?

(छ) स्वभावोक्तौ केषां स्वभावस्य वर्णनं भवति ?

२. **अधस्तनेषु पद्येषु कोऽलङ्कारो भवति, कथञ्च तत्सङ्गतिः, स्पष्टं प्रदर्शयत ।**

(क) मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥

(ख) पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥

(ग) पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥

(घ) कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥

२. **यं कमपि विषयमवलम्ब्योपमालङ्कारयुक्तं पद्यमेकमनुष्टुप्छन्दसि रचयत ।**

३. **उपरि पठितानामलङ्काराणां लक्षणानुकूलानि पद्यानि कुतश्चित् सङ्कलय्य गुरोः सहयोगेन लक्ष्यलक्षणसङ्गतिं दर्शयत ।**

४. **अलङ्काराणां लक्ष्यलक्षणसङ्गतिस्थापनविषयमवलम्ब्य सामूहिकं विमर्शपूर्वकं निर्मितं प्रतिवेदनं गुरोः समक्षं प्रदर्शयत ।**

**चतुर्विंशः पाठः**

# अर्थान्तरन्यासादिदृष्टान्तान्तानामलङ्काराणां निरूपणम्

## अर्थालङ्कारेष्वर्थान्तरन्यासादीनां निरूपणम्

पूर्वपाठे उपमादीनामलङ्काराणां पाठ्यक्रमनिर्धारितानां लक्षणोदाहरणयोः समन्वयप्रदर्शनेन वर्णनं विहितम् । सम्प्रति सामान्यविशेषरूपाणां विषयाणां परस्परं समर्थ्यसमर्थकभावादिषु पक्षेष्वाधृतानां सलक्षणं सोदाहरणं च निरूपणस्य क्रमो वर्तते । तत्रादौ अर्थान्तरन्यासस्य स्वरूपमुदाहरणञ्च प्रतिपाद्यते ।

## अर्थान्तरन्यासः

यत्र सामान्येन विशेषस्य विशेषेण वा सामान्यस्य समर्थनं क्रियते तत्रार्थान्तरन्यासाख्योऽलङ्कारो भवति । तल्लक्षणं यथा- **उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः ।**

**अर्थः**

यत्र विशेषरूपस्य मुख्यार्थस्य समर्थने सामान्यरूपस्यान्यस्य वाक्यार्थस्य अथवा सामान्यरूपस्य मुख्यार्थस्य समर्थने विशेषरूपस्य वाक्यार्थस्य प्रयोगः क्रियते तत्रार्थान्तरन्यासोऽलङ्कारः ।

पुस्तकान्तरे तल्लक्षणं यथा- **सामान्यं वा विशेषो वा यदन्येन समर्थ्यते ।**
**यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥**

**अर्थः**

साधर्म्येण (सादृश्यसम्बन्धेन) वैधर्म्येण (असमानधर्मसम्बन्धेन) वा यत्र सामान्यं विशेषेण विशेषः सामान्येन वा समर्थ्यते तत्रार्थान्तरन्यासः ।

उदाहरणं यथा- **हनुमानब्धिमतरद् दुष्करं किं महात्मनाम् ।**

अत्र वर्णनीयतया प्रकृतो हनुमान् विशेषरूपः सामान्यं च महात्मानः । हनुमत्कृतं समुद्रसन्तरणरूपं कर्म महात्मनां कृते किमपि दुष्करं कार्यं न भवतीति कृत्वा महात्मसामान्येन समर्थितमित्यर्थान्तरन्यासालङ्कारस्य सङ्गतिः ।

उदाहरणान्तरं यथा-

**दिवाकराद् रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।**
**क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसांसतीव ॥**

अत्रापि विशेषभूतस्य हिमालयस्य महत्त्वख्यापकं तत्कृतं दिवाभीतान्धकाररक्षणरूपं कर्म क्षुद्रस्यापि शरणागतस्य रक्षणे ममत्वप्रकाशकानां महतां कर्मणा सामान्येन समर्थितमिति अर्थान्तरन्यासस्य लक्षणसमन्वयः । अत्र पद्ये 'दिवाभीतमिव' इत्यत्रोत्प्रेक्षापि वर्तते । अन्यच्चोदाहरणं (विशेषस्य सामान्येन समर्थने) यथा-

**यावदर्थपदां वाचमेवमादाय माधवः ।**

**विरराम महीयांसः प्रकृत्या मितभाषिणः ॥**

अत्र माधवस्य विशेषस्य विशिष्टार्थयुक्तस्य परिमितकथनस्य समर्थनाय महतां मितभाषणरूपस्य कर्मण उपस्थापनं कृतमित्यर्थान्तरन्यासालङ्कारस्य लक्षणसङ्गतिः । अपरमुदाहरणं (सामान्यस्य विशेषेण समर्थने) यथा- **बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।**

**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥**

अत्र क्षुद्रस्यापि जन्तोर्महतां सहायेन कार्यसिद्धेर्वर्णनं कृतं वर्तते । तस्य समर्थने च क्षुद्रापि पर्वतोद्भूता नदी महानद्या सह मिलित्वा समुद्रं प्राप्नोति, इति विशेषवाक्यस्य प्रयोगः कृत इति क्षुद्रसामान्यस्य क्षुद्रनदीविशेषेण समर्थनादर्थान्तरन्यासालङ्कारस्य सङ्गतिर्जाता ।

## निदर्शना

यत्र सदृशयोर्वाक्यार्थयोरैक्यारोपः, अर्थाद् उपमेयवाक्यार्थे उपमानवाक्यार्थस्याभेदारोपः क्रियते तत्र निदर्शनानामकोऽलङ्कारो भवति । ऐक्यारोपेण चोपमेयोपमानवाक्यार्थयोरसङ्गतोऽपि सम्बन्ध उपमामाध्यमेन सङ्गत इव सम्पाद्यते । तल्लक्षणं यथा- **वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ।**

पुनश्च- **अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः ।**

**निदर्शना भवेत् सेयं मम्मटेन यथोदिता ॥**

अर्थाद् यत्र पदार्थयोर्वाक्यार्थयोर्वा परस्परं सम्बन्धः कथञ्चिदपि न सङ्गच्छते तस्यां च बाधितायामवस्थायां द्वयोर्वाक्यार्थयोर्बिम्बप्रतिबिम्बभावेनोपमायां पर्यवसानं भवति तत्र निदर्शनालङ्कारः ।

उदाहरणं यथा- **यद् दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ।**

अत्र दातुः सौम्यतायाः पूर्णचन्द्रस्य कलङ्करहिततायाश्च यत्तच्छब्दप्रयोगद्वारा परस्परमैक्यारोपः कृत इति लक्षणसमन्वयः ।

उदाहरणान्तरं यथा-

**क्व सूर्यप्रभवो वशः क्व चाल्पविषया मतिः ।**

**तितीर्षुर्दुस्तर मोहादुडुपेनास्मि सागरम् ॥**

अत्र स्वल्पविषयवत्या कालिदासमत्या सूर्यवंशस्य वर्णनरूपस्य वाक्यार्थस्य उडुपेन सागरसन्तरणरूपस्यान्यस्य

वाक्यार्थस्य च परस्परं सम्बन्धो नैव घटते । अतश्च उपमापरिकल्पनेन वाक्यार्थयोः समन्वयः क्रियते । यथा स्वल्पया नौकया सागरस्य सन्तरणमसम्भवं तथैव स्वल्पमत्या सूर्यवशस्य वर्णनमसम्भवम्, इति उपमायाः कल्पना क्रियते । अतो निदर्शनालङ्कारस्य लक्षणसमन्वयः ।

## दीपकम्

यत्र वर्णनीयतया प्रकृतानां पुनश्चावर्णनीयतयाप्रकृतानां च वस्तूनां क्रियया गुणेन वा समानत्वं वर्ण्यते तत्र दीपकालङ्कारो भवति ।

तल्लक्षणं यथा- **प्रस्तुताप्रस्तुतानां च तुल्यत्वे दीपकं मतम् ।**

**अर्थः**

प्रसङ्गे वर्णनीयत्वेन प्रस्तुतानां तथा च तत्सादृश्येन गृहीतानामप्रकृतानाञ्च तुल्यत्वं यत्र प्रतिपाद्यते तत्र दीपकालङ्कारो भवति ।

पुनश्च तल्लक्षणं यथा- **वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ।**

**अर्थः**

प्रसङ्गागतस्य वर्णनीयविषयस्याप्रासङ्गिकेनावर्णनीयेन सह धर्मैक्यं यत्र प्रतिपाद्यते तत्र दीपकालङ्कारो भवति ।

अत्र दीपकालङ्कारे एकेन कारकेण बह्वीनां क्रियाणामेकया क्रियया बहूनां कारकाणां वा दीपनं देहलीदीपन्यायेन उभयत्र प्रकाशनं यद् भवति तन्मुख्यविशेषतारूपेण गृह्यते । यथा द्वारस्य देहल्यां स्थापितो दीपो बहिरन्तश्च गृहस्य प्रकाशयति तथैव अत्र दीपकेऽपि कारकं क्रिया वा मध्ये स्थित्वोभयत्र वर्ण्यावर्ण्ये उपमानोपमेये वा प्रकाशयति इति दीपकालङ्कारस्य नामकरणे हेतुः ।

उदाहरणं यथा-

**मेधां बुधः सुधामिन्दुर्बिभर्ति वसुधां भवान् ।**

अत्र राजवर्णनप्रस्तावे कस्यचन राज्ञो वर्णनं कविना कृतमिति वर्णनीयो राजा प्रकृतः । तत्तुल्यत्वेन गृहीतौ बुधेन्दू चाप्रकृतौ । एतयोश्च प्रकृताप्रकृतयोर्धारणरूपायास्तुल्यक्रियाया अभिसम्बन्धेन तुल्यत्वं स्थापितमिति दीपकालङ्कारस्य लक्षणसमन्वयो भवति ।

अन्यदुदाहरणं यथा- **मदेन भाति कलभः प्रतापेन महीपतिः ।**

अत्र मदयुक्तेन कलभेन (तरुणगजेन) सह प्रतापेन शोभायमानस्य महीपतेः सादृश्यं भानरूपेणैकेन क्रियावाचिधर्मेण स्थापितमिति दीपकालङ्कारस्य सङ्गतिर्जाता ।

तथा चैकस्मिन् कारके विद्यमानेऽनेकक्रियासम्बन्धो यत्र वर्ण्यते तत्रापि दीपकालङ्कारो भवति । यथा-

**विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा**
**प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।**
**तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो**
**विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥**

अत्र विकारः कारकमेकं वर्तते । तस्य च भ्रमयति सम्मीलयति च इति क्रियाद्वयेनान्वयः । एकेन कारकेण द्वयोः क्रिययोर्दीपनादत्र कारकदीपकालङ्कारस्य समन्वयो भवति ।

### दृष्टान्तः

यत्र द्वयोर्वाक्यार्थयोः परस्परं विम्बप्रतिबिम्बभावो वर्ण्यते तत्र दृष्टान्तालङ्कारो भवति । तल्लक्षणं यथा-

**चेद् विम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।**

पुनश्च-

**दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् ।**

अर्थाद् समानधर्मसहितस्य वस्तुन उमापनोपमेयरूपस्य विषयस्य यत् प्रतिबिम्बनं बिम्बप्रतिबिम्बभावत्वेन स्थापनं क्रियते तत्र दृष्टान्तालङ्कारः ।

उदाहरणं यथा-

**त्वमेव कीर्तिमान् राजन् ! विधुरेव हि कान्तिमान् ।**

अत्र प्रथमे उपमेयवाक्ये कीर्तिमतो राज्ञो वर्णनमस्ति । द्वितीय उपमानवाक्ये च कान्तिमतश्चन्द्रस्य वर्णनं वर्तते । उभयोः परस्परं विम्बप्रतिविम्बभावश्च कीर्तिमत्त्व-कान्तिमत्त्वरूपस्य धर्मद्वयस्य प्रतिपादनेन स्थापित इति दृष्टान्तालङ्कारस्य लक्षणसमन्वयः ।

उदाहरणान्तरं यथा-

**दृष्टान्तश्चेद् भवन्मूर्तिस्तन्मृष्टा दैवदुर्लिपिः ।**
**जाता चेत् प्राक् प्रभा भानोस्तर्हि याता विभावरी ॥**

अत्र राजवर्णनप्रस्तावे तन्मूर्तिदर्शनेन दैवलिखिताया दुर्लिपेर्नाशो भवतीत्युपमेयवार्क्थास्य प्राच्यां प्रभाया उदयेन रात्रिर्गतेत्युपमेयवाक्यार्थस्य च परस्परं विम्बप्रातिविम्बभावाल्लक्षणसमन्वयः ।

# अभ्यासः

## (क) अधोलिखितान् प्रश्नान् उत्तरयत

१. अर्थान्तरन्यासस्य लक्षणं किम् ?

२. निदर्शनालङ्कारः कस्यां स्थितौ भवति ?

३. दीपकालङ्कारस्य मुख्यं वैशिष्ट्यं किम् अस्ति ?

४. दृष्टान्तालङ्कारस्य स्वरूपं किम् ?

५. दीपकदृष्टान्तयोः परस्परं पार्थक्यं किम् अस्ति ?

## (ख) अधस्तनपद्येषु प्रयुक्तानामलङ्काराणां परिचयेन सह लक्षणसङ्गतिं प्रदर्शयत

१. यावदर्थपदां वाचमेवमादाय माधवः ।
विरराम महीयांसः प्रकृत्या मितभाषिणः ॥

२. क्व सूर्यप्रभवो वशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तर मोहादुडुपेनास्मि सागरम् ॥

३. तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ॥

४. प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥

५. मेधां बुधः सुधामिन्दुर्बिभर्ति वसुधां भवान् ।

६. मणिः शाणोल्लीढः समरविजयी हेतिदलितः
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता ।
मदक्षीणो नागः शरदि सरितः श्यानपुलिना
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥

५. प्रकृतिप्रतिविम्बनान्मृषा तव कर्तृत्वमबोधहेतुकम् ।
स्फटिके विमले जलेऽपि वा कुसुमादेः शशिनश्च सम्भ्रमः ॥ (रुरुवृत्तम्)

६. इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं क्षेत्तुमसाम्प्रतम् ॥ (कुमारसम्भवम्)